Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

॥ श्रीधर्मरत्नमंजूषा भाग १. ॥

(कर्त्ता—श्रीदेवविजयगणी)

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज (जामनगरवाळा)

वीरसंवत्—२४४१. विक्रमसंवत—१९७१. सने—१९१५.

किं. रु.–४–८–०

☞ श्रीजैनभास्करोदय प्रेस. जामनगर.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥

॥ अथ श्रीधर्मरत्नमंजूषा (दानादिकुलकवृत्तिरूपा) प्रारभ्यते ॥

(प्रथमो भागः)

(कर्ता—श्रीदेवविजयगणी)

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज. (जामनगरवाळा)

ॐनमो नाभिभूपाल—संभवाय स्वयंभुवे ॥ विलसत्केवलालोक—लोकालोकविकासिने ॥
॥ १ ॥ श्रेयसे श्रीमदीक्ष्वाकु—कुलालंकारकारिणे ॥ त्रैलोक्यकमलाराम—विकासैकविवस्वते ॥
॥ २ ॥ युग्मं ॥ श्रीशांतिर्विलसत्कांति—रजस्रं सृजताच्छिवं ॥ अभूद्विश्वत्रये शांति—र्यस्मिन् कु·
क्षिमुपेयुषि ॥ ३ ॥ नमोऽस्तु विश्वविश्वैक—स्वामिने नेमिनेऽर्हते ॥ लसल्लक्ष्मीनिवासाय । विन·
म्रानेकनाकिने ॥ ४ ॥ अश्वसेनधराधीश—वंशाकाशैकभास्करः ॥ पातु पुण्यात्मनो नित्यं । श्री·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पार्श्वः परमेश्वरः ॥ ५ ॥ भव्यानां भद्रसंभारं । संपादयतु सर्वदा ॥ स्वर्णवर्णविराजिष्णुः । सद्ज्ञानो ज्ञातनंदनः ॥ ६ ॥ श्रेयसे संतु वो नित्यं । गौतमादिगणाधिपाः ॥ चारुचारित्रविस्तार—सच्चमत्कारकारिणः ॥ ७ ॥ नमस्कृत्य सरस्वत्याः । पदं श्रीमद्गुरोस्तथा ॥ दानशीलतपोभाव—कुलानि विवृणोम्यहं ॥ ८ ॥ निर्विघ्नग्रंथपरिसमाप्तिकामनया शिष्टाचारपरिपालनाय चासन्नोपकारित्वाच्चरमतीर्थकृतोपकृतस्तत्स्तुतिरूपं मंगलमाचरति—

॥ मूलम् ॥—परिहरिअरज्जसारो । उप्पाडिअसंजमिक्कगुरुभारो ॥ खंधाउ देवदूसं । वियरंतो जयउ वीरजिणो ॥ १ ॥ व्याख्या—' परिहरिअत्ति ' परिहृतं त्यक्तं सर्वसावद्यत्यागाऽऽज्यस्य सारं धनकनकमणिमाणिक्यगजवाजिरथादि येन सः, तथा ' उप्पाडिअत्ति ' उत्पाटितः शिरसोढः संयमस्य सप्तदशभेदरूपस्यैकोऽद्वितीयो गुरुर्महान् भावो येन सः, तथा ' खंधाउ देवदूसंति ' स्कंधादंसस्थलाद्देवदूष्यं देववस्त्रं ' वियरंतो ' वितरन् ददत पूर्वसंगतिकद्विजायेत्यत्र विशेषणद्वाराच्चतुर्ष्वपि धर्मभेदेषु प्रधानतया पूर्वं प्रतिपाद्यं दानमसूचि. ' जयउत्ति ' जयतु ' वीरजिणो ' वीरजिनश्चरमतीर्थेश इत्यक्षरार्थः. ॥ १ ॥ विस्तरार्थस्तु वीरचरित्रादवसेयः. तत्र प्रथमतः पूर्वभवाख्या·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नपूर्वं श्रीवीरदेवचरित्रं कथ्यते, यथा—ग्रामेश १ स्त्रिदशो २ मरीचि ३ रमरः ४ षोढा परिव्राट् ५ सुरः ६। संसारो बहु ७-१६ विश्वभूति १७ रमरो १८ नारायणो १९ नारकी २० ॥ सिंहो २१ नैरयिको २२ भवेषु बहुशश्चक्री २३ सुरो २४ नंदनः २५। श्रीपुष्पोत्तरनिर्जरो २६ ऽवतु भवाद्वीर २७ स्त्रिलोकी गुरुः ॥ १ ॥ प्रथमो भवः—

अस्यैव जंबूद्वीपस्य प्रत्यग्विदेहविभूषणे महावप्रे विजये जयंती नाम पुर्यस्ति, तस्यां पुर्यां महासमृद्धो दोर्वीर्येण नवो जनार्दन इव शत्रुमर्दनो नाम राजास्ति, तस्य राज्ञः सेवकः स्वामिसेवकः स्वामिभक्तोऽकृतपराङ्मुखो दोषान्वेषणविमुखो परगुणग्रहणतत्परो नयसाराभिधानो ग्रामचिंतकोऽस्ति. सोऽन्यदा पृथ्वीपतेः शासनात्सपाथेयो दारुकमादातुं शकटश्रेणिमादाय वने गतः, तस्य वृक्षांश्छेदयतो द्विप्रहरसमये व्योम्नि तपनो जठरेऽग्निरिवाधिकं दिदिपे, यतः—देहस्नेहस्वरमधुरताबुद्धिलावण्यलज्जाः। प्राणोऽनंगः पवनसमता क्रोधहानिर्विलासाः ॥ धर्म्यं शास्त्रं सुरगुरुनतिः शौचमाचारचिंता। भक्ताऽपूर्णे जठरपिठरे प्राणिनां संभवंति ॥ १ ॥ तदानीं समयज्ञैः सेवकैस्तस्य कृते मंडपोपमस्य तरोरधः सारा रसवती निष्पादिता, कृतस्नानविलेपनो नयसारः सेवकैर्भोजनाय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निमंत्रितो मनस्येवमचिंतयत्—यदि कश्चिदतिथिः क्षुधितस्तृषितो वात्र समागच्छेत्तदा वरं भवति. एवं चिंतयतस्तस्य केचन साधवः क्षुधितास्तृषिताः श्रांताः सार्थान्वेषणतत्पराः समाययुः, तान् मुनीन् दृष्ट्वा मुदमापन्नो नयसारो वंदित्वैवमपृच्छत्, भो मुनयोऽस्यामटव्यां यूयं कथं समागताः? यतोऽत्र शस्त्रिणोऽप्येकाकिनो न पर्यटंतीति नयसारेण पृष्टाः संतस्ते प्रोचुः, राजन्! वयं पुरा सार्थेन समं प्रस्थिताः, परं भिक्षार्थं यावद् ग्रामे प्रविष्टास्तावत्सार्थोऽन्यत्र ययौ, सार्थभ्रष्टाश्च वयमत्र समागताः, तत श्रुत्वा नयसारोऽब्रवीदहो सार्थेशो निःकृपः, यतः सह प्रस्थितान् साधून् मुक्त्वान्यत्र ययौ. एवमुक्त्वा नयसारो मुनीन् प्रति पुनरब्रवीत, भो साधवो मत्पुण्यादत्र यूयमागताः, इति कथयित्वा तान् मुनीन् भोजनस्थानं निन्ये. ततः शुद्धान्नपानैः सार्थोपनीतैः प्रत्यलाभयत. साधवोऽपि तत्र गत्वा विधिपूर्वकमभुंजत, नयसारोऽपि स्वस्थाने गत्वान्नादिकं भुक्त्वा मुनिसमीपे गत्वैवमवदत्, भो मुनयो मया सह यूयं चलत? यथा भवतां पुरो मार्गं दर्शयामि, मुनयोऽपि तेन सह चलिताः, क्रमेण नगरप्रत्यासन्नतरोरधश्चोपविश्य नयसारस्य जिनप्रणीतं धर्मं जगदुः, यथा—

सर्वज्ञस्त्यक्तरागादि—दोषस्त्रैलोक्यपूजितः ॥ यथास्थितार्थवादी च । देवोऽर्हन् परमेश्वरः ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महाव्रतधरा धीरा । भैक्ष्यमात्रोपजीविनः ॥ सामायिकस्था धर्मोप—देशका गुरवो मताः ॥ २ ॥ दुर्गतिप्रपतत्प्राणि—धारणाद्धर्म उच्यते ॥ संयमादिर्दशविधः । सर्वज्ञोक्तो विमुक्तये ॥ ३ ॥ सम्यक्त्वमूलानि पंचा—णुव्रतानि गुणास्त्रयः ॥ शिक्षापदानि चत्वारि । व्रतानि गृहमेधिनां ॥ ४ ॥ ततः स नयसारः सम्यक्त्वमूलं द्वादशव्रतरूपं श्राद्धधर्मं समासाद्य स्वं धन्यं मन्यमानस्तान् प्रणम्य वलित्वा दारूणि राज्ञे प्रैषीत्, स्वयं तु स्वग्रामेऽगात, तद्दिनादारभ्य महाधर्मपरायणो नव तत्वानि चिंतयन् महामनाः कतिचिद्वर्षाणि धर्मं पालयामास. ततः स नयसारः स्वायुःपर्यंते विहिताराधनो नमस्कारपरायणो मृत्वा द्वितीयभवे सौधर्मदेवलोके पल्योपमस्थितिकः सुरोऽभवत्. तृतीयभवः— श्रीमदयोध्यायां श्रीयुगादिदेवकृते कृतायां श्रीऋषभस्वामिसूनुर्नवनिधीश्वरश्चतुर्दशरत्नाधिपतिर्भरत-नामा चक्रवर्त्यभूत. तत्र नयसारो ग्रामचिंतकजीवः प्रथमस्वर्गाच्च्युत्वा मरीचिव्यासदेहत्वान्मरीचि-नामा तस्य भरतस्य पुत्रो जातः. क्रमेण वर्धित उद्यौवन आद्ये समवसरणे प्रभोर्महिमानं देवैः क्रियमाणं निरीक्ष्य स्वाम्यंतिके धर्मं चाकर्ण्य सम्यक्त्वलब्धधीर्व्रतमाददे. सम्यग्ज्ञानवान् पंचसमिति-त्रिगुप्तियुक्तो निःकषायो जितेंद्रियः स्थविराणां पुरोंगानि पठन्नेकादशांगपाठी ऋषभस्वामिना सार्धं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विहरतिस्म, एवं कियान् कालो गतः.

एकस्मिन् दिने स मरीचिनामा साधुः स्वेदार्द्रीभूतशरीरस्तृषार्तो ग्रीष्मर्तुना पीडित उष्णांशु-
खरकिरणतप्तगात्रश्चारित्रावरणोदयादिति चिंतयतिस्म. किं त्यजामि व्रतं? परं त्यक्तव्रतो लोके ल-
ज्जामि, अतोऽयं मयोपायो लब्धो येन व्रते क्षमो न भवति, अमी साधवस्त्रिदंडविरताः, दंडैर्निर्जि-
तस्य मे करे त्रिदंडलांछनं भवतु, अमी लुंचितकेशा मुनयः, मम क्षुरमुंडिते शिरसि कलंकसूच-
नाय शिखा भवतु. अमी महाव्रतधराः, ममाणुव्रतानि भवंतु. अम्युपानद्रहिताः, मम पादत्राणं भ-
वतु. मुनयोऽमी निष्कंचनाः, मम मुद्रिकामात्रेण सकिंचनत्वं भवतु. साधवोऽमी विगतमोहाः, मम
मोहछन्नस्य छत्रं भवतु. साधवोऽमी शीलेन सुगंधाः, निःशीलत्वेन दुर्गंधत्वान्मे श्रीखंडतिलकं भ-
वतु. अमी शुक्लवस्त्रा निष्कषायाश्च महर्षयः, मम कषायिणः कषायाणि वासांसि भवंतु. अमी चा-
रित्रेण पवित्रगात्राः, मम तु मितजलेन स्नानादिकं भवतात्. एवं स्वनिर्वाहहेतवे लिंगं विकल्प्य
पारिव्राज्यं प्रतिपन्नवान् मरीचिः क्लेशकातरत्वात्. तं तादृग्वेषं दृष्ट्वाखिलो जनो धर्ममपृच्छत्, सोऽपि
तेषां पुरतः साधुधर्मं जिनोदितं समाचख्यौ. तथा धर्माख्यानप्रतिबुद्धान् भव्यांश्च स्वामिने समर्प-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यामास, इत्याचारः स मरीचिः स्वामिना समं विजहार.

एकस्मिन् दिने श्रीऋषभदेवो विनीतायां पुरि समवासार्षीत्, तत्र वंदनार्थमागतो भरतः प्रभुं नमस्कृत्य पृष्टतिस्म, हे स्वामिन्नस्मिन् भरतेऽर्हच्चक्रिविष्णुप्रतिविष्णुबलाः कति भविष्यंतीति. स्वामिना यथास्थिते प्रोक्ते पुनर्भरतोऽब्रवीत्, हे तातास्यां पर्षदि त्वमिव कश्चित्तीर्थकृद्भावी वर्तते? स्वाम्याख्यद्भो भरत! अयं तव पुत्रो मरीचिनामा पारिव्राज्यप्रवर्तकश्चरमतीर्थंकरो वीरनामा भावी, प्रथमशार्ङ्गभृत त्रिपृष्ठनामा पोतनपुरे भावी, तथा महाविदेहेषु मूकापुर्यां प्रियमित्रनामा चक्रभृद्भावी. तत श्रुत्वा भरतो मरीचिसमीपे गत्वा प्रदक्षिणीकृत्य वंदित्वैवमवोचत, भो मरीचे! तव पारिव्राज्यं नाहं वंदे, किंतु त्वमिह भारते श्रीवीरोऽर्हन् भावीति वंद्यसे, तमित्युक्त्वा वंदित्वा स्वामिनं च प्रणम्य मुदितमना भरतो विनीतां पुरीं प्रविवेश. अथ तदाकर्ण्य मरीचिर्भुजास्फोटं कृत्वा नृत्यन्नेवं वाचमुवाच, यदादिमो विष्णुर्मूकायां नगर्यां चक्रवर्ती चरमोऽर्हंश्चाहं भविष्यामीत्यपरेण मे पर्याप्तं, इति कथयित्वा जातिमदमकरोद्यथा—आद्योऽहं वासुदेवानां। पिता मे चक्रवर्तीनां ॥ पितामहस्तीर्थकृता—महो मे कुलमुत्तमं ॥ १ ॥ एवं जातिमदं कुर्वन्। भुजामास्फोटयन् मुहुः ॥ नीचगोत्रा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्निधं कर्म । मरीचिः समुपार्जयत ॥ २ ॥ स मरीचिः श्रीऋषभदेवनिर्वाणादूर्ध्वं साधुभिः सार्धं विहरन् भव्यान् प्रबोध्य साधुसन्निधौ प्राहिणोत्. सोऽन्यदा व्याधिग्रस्तोऽयमीति कृत्वान्यसाधुभिर-पाल्यमानो मनस्येवमचिंतयत्, अहोऽमी साधवो निर्दाक्षिण्याः कृपोज्झिताः परमार्थपराङ्मुखा वि-नीतमपि मां नेक्षंते, तर्हि मम पालनं दूरेऽस्तु, अतः कंचिच्छिष्यं करोमि, यो मम परिचारको भ-वति. एवं ध्यायन् विधिवशात्स स्वस्थो जातः, तस्य कपिलनामा कश्चित्कुलपुत्रको मिलितः, तं च धर्मार्थिनं ज्ञात्वा मरीचिरार्हतं धर्ममकथयत. तेनोक्तं त्वमेवंविधं किं धर्मं न करोषि? मरीचिनोक्त-महं धर्मं कर्तुं न समर्थः, कपिलेनोक्तं त्वन्मार्गे किं धर्मो न विद्यते? तं जिनधर्मालसं ज्ञात्वा स्व-शिष्यमिच्छन्निति जगौ, जिनमार्गे यथा धर्मोस्ति तथा मम मार्गेऽपि धर्मो विद्यते. इत्याकर्ण्य स म-रीचिशिष्यो जातः.

अनेन दुर्भाषितेन मरीचिः सागरकोटाकोटिमितं संसारमार्जयत. तच्छिष्यः कपिलो मिथ्याध-र्मोपदेशकोऽभवत. एवं मरीचिः संसारं समुपार्ज्य विहितानशनस्तदनालोच्य मृतस्तुर्यभवे ब्रह्मलो-के दशसागरायुः सुरोऽभवत्. कपिलोऽपि सूर्यादिशिष्यान् स्वकीयमाचारमुपदिश्य मृत्वा ब्रह्मलोके

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवोऽभवत्, स कपिलदेवोऽवधिज्ञानेन ज्ञात्वा भूतलेऽभ्येत्य शिष्यमोहात्स्वयं कृतं सांख्यमतं सूर्यादिशिष्यानबोधयत्, तद्दिनादारभ्यास्मिन् लोके सांख्यमतं प्रवृत्तं. पंचमभवे मरीचिदेवजीवो कोल्लाकसन्निवेशेऽशीतिपूर्वलक्षायुः कौशिकाख्यो ब्राह्मणोऽभवत्, सोंते त्रिदंडी भूत्वा मृत्वा षष्ठभवे देवो जातः. ततश्च्युत्वा बहून् भवान् भ्रांत्वा सप्तमभवे स्थूणाख्ये सन्निवेशे पुष्पमित्राभिधानो द्विजोऽभूद् द्वासप्ततिपूर्वलक्षायुः, तत्रापि तापसो भूत्वाष्टमभवे सौधर्मे मध्यमस्थितिकः सुरोऽभूत. ततोऽपि च्युत्वा नवमभवे चैत्यसन्निवेशेऽग्निद्योतद्विजोऽभवत्पूर्वलक्षचतुःषष्ट्यायुष्कः, तत्रापि त्रिदंडी भूत्वा मृत्वा दशमभवे ईशाने मध्यमायुः सुरोऽभवत्. एकादशभवे मंदिरसन्निवेशेऽग्निभूतिरिति नामा षट्पंचाशत्पूर्वलक्षायुष्को विप्रो जातः, सोऽपि त्रिदंडी भूत्वा मृतो द्वादशभवे सनत्कुमारे मध्यमायुः सुरोऽभवत्. ततश्च्युत्वा त्रयोदशभवे श्वेतांबिकापुर्यां भारद्वाजो द्विजोऽभवच्चतुश्चत्वारिंशत्पूर्वलक्षायुः, तत्रापि त्रिदंडी भूत्वा मृतश्चतुर्दशभवे माहेंद्रकल्पे मध्यमस्थितिकः सुरोऽभूत्. ततश्च्युत्वा भवं भ्रांत्वा पंचदशभवे राजगृहे स्थावरो द्विजोऽभूच्चतुस्त्रिंशत्पूर्वलक्षायुष्कः, सोऽपि त्रिदंडी भूत्वा विपद्य षोडशभवे ब्रह्मलोके मध्यमायुः सुरोऽभवत्. ब्रह्मलोकाच्च्युत्वा बहून् भवान् भ्रांत्वा यत्रोत्पन्नस्तदा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दाह—सप्तदशभवः—राजगृहनगरे विश्वनंदी राजा, तस्य लघुभ्राता विशाखभूतिर्युवराजोऽस्ति, तयोर्द्वयोर्द्वे पत्न्यौ प्रियंगुसुंदरीधारिणीनाम्न्यौ, तयोर्द्वयोर्द्वौ पुत्रौ, तत्र राजपुत्रो विशाखनंदी १ युवराजपुत्रश्च मरीचिजीवो विश्वभूतिरिति जातः

इतश्चैकस्मिन् दिने भद्यौवनो विश्वभूतिः सांतःपुरः पुष्पकरंडकाख्ये वने रेमे नंदनवने सुरकुमार इव, तदानीं विशाखानंदी राट्पुत्रः क्रीडेच्छुर्द्वारपालनिवारितत्वात्प्रवेशमलभमानो द्वारपाल इव तत्रैवास्थात्, एतत्स्वरूपं पुष्पदासीतो मत्वा राज्या स्वपुत्रपराभवो राजाग्रे निवेदितः. स्त्रीहितकामनया राजा कपटेन प्रयाणभंभामवादयत्. ऋजुर्विश्वभूतिर्वनात्समागत्य राजानं व्यजिज्ञपत हे तात! त्वं गृहे तिष्ठ स्वस्थचित्तः? संग्रामार्थमहमेव यास्यामीति, पश्चाद्विश्वभूतिः सर्वमसत्यं ज्ञात्वा पुनस्तत्रैव पुष्पकरंडकाख्ये वने गतः, तदानीं द्वारपालेनोक्तं मध्ये विशाखनंदी राजपुत्रोऽस्ति, तत श्रुत्वा विश्वभूतेः कोपो जातः, अहोऽहं राज्ञा मायया वनाद्बहिष्कृतः, द्वाःस्थ पुरत इत्युक्त्वा मुष्ट्या कपित्थवृक्षं ताडयित्वा सर्वाणि फलान्यपातयत्, यतः—पातयामि शिरांस्येवं । सर्वेषां भवतामपि ॥ ज्यायसि ज्यायसी ताते । न चेद्भक्तिर्भवेन्मम ॥ १ ॥ भोगैरीदृग्वंचनाद्यैर्ममालमिति स

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्रुवन् संभूतिमुनिपादांते गत्वा स व्रतमुपाददे. तं प्रव्रजितं ज्ञात्वा सावरजो राजा समागत्य नत्वा क्षमयित्वा च भोगाय निमंत्रयामास. साधुं भोगमनिछंतं ज्ञात्वा नृपो गृहमगमत, गुरुणा सार्धं मुनिरन्यत्र व्यहार्षीत्. गुर्वनुज्ञयैकाकित्वविहारेण विहरन् स मथुरां ययौ, तदा तन्नृपात्मजामुद्वोढुं विशाखनंद्यागात्, विश्वभूतिसाधुरपि मासक्षपणपारणके तां पुरीं प्राविशत, मार्गे च धेन्वाक्रुष्टो भूमौ पपात. तदा स कपित्थपातनक्षमं तवौजः क गतमिति विशाखनंदिसेवकैः स हसितः, तदा सकोपः साधुस्तां गां शृंगे धृत्वा मस्तकोपरि भ्रुधाभ्रामयत्, निदानं च चकार, यथानेन तपसा भूयिष्टवीर्योऽस्य मृत्यवे च भवांतरे भूयासमिति कोटिवर्षायुः संपूर्य तन्निदानमनालोच्य मृतोऽष्टादशे भवे महाशुक्रे सप्तमदेवलोके प्रकृष्टायुः सुरोऽभवत्.

इतश्चात्रैव भरते पोतनपुरे नगरे जितशत्रुनामा राजाभूत्, तस्य राज्ञो भद्रा नाम राज्ञी, तयोः पुत्रश्चतुःस्वप्नसूचितो बलभद्रोऽचलाभिधानोऽभवत्. पुनस्तस्य जितशत्रुराज्ञो मृगावतीनाम्नी पुत्र्यभूत्. तामत्यंतरूपवतीं यौवनवतीं च दृष्ट्वा मात्रा प्रेषिता सा सभामध्ये गत्वा पितुरुत्संगे स्थिता. तद्रूपमोहितो राजा पुरीवृद्धानाहूय पृछतिस्म. भो महाजनाः! अस्यां रत्नगर्भायां यानि रत्नानि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जायंते तानि कस्येति निर्णयं कृत्वा ब्रूत? तद्वचः समाकर्ण्य तैरुक्तं तानि तवैवेति. तद्वचनमुपादाय स स्वीयां मृगावतीं पुत्रीं परिणेतुं सज्जो जातः. तद् दृष्ट्वा लज्जिता लोकाः स्वस्थानं जग्मुः. तदानीं राजा च तां मृगावतीं कन्यां गांधर्वेण विवाहेन पर्यणैषीत्. लज्जाक्रोधाकुला भद्रादेवी महीपतिं मुक्त्वाचलेन पुत्रेण सह निर्गत्य दक्षिणापथे प्रययौ. तत्र माहेश्वरीं नवीनां पुरीं कृत्वा बलदेवो मातरं संस्थाप्य पुनः पितुरंतिके जगाम. तत्पिता प्रजायाः पतित्वेनाखिलैर्जनैः प्रजापतिरिति प्रोचे, अहो बलीयान् कर्मपरिणामः! विश्वभूतिजीवः शुक्रदेवलोकाच्च्युत्वैकोनविंशतितमभवे महादेव्या मृगावत्याः कुक्षौ सप्तस्वप्नेन सूचितः पुत्रत्वेन विष्णुभावेनोत्पन्नः, काले सुदोहदैः सूनुः सुषुवे, त्रिकरंडकपृष्टत्वात् त्रिपृष्ट इति तस्य नाम दत्तं, अशीतिधनुःप्रमाणदेहः सोऽचलेन सह क्रीडां कुर्वन्नधीतसकलकलः क्रमेण यौवनं प्राप्तः. विशाखनंदिजीवोऽपि भवं भ्रांत्वा तुंगगिरौ मृगाधिपो जातः, शंखपुरदेशे चोपद्रवं कुर्वन् स सुखेनास्थात्. तदानीमश्वग्रीवेन भूभुजा कश्चिन्नैमित्तिकः पृष्टो यथा भो दैवज्ञ! मम मृत्युः कुतो भावी? दैवज्ञेनोक्तं श्रूयतां यथा—हंता स ते चंडवेगं। यो दूतं धर्षयिष्यति ॥ मारयिष्यति यस्तुंग—गिरिसिंहं च हेलया ॥ १ ॥ तत श्रुत्वाश्वग्रीवः शंखपुरे शाली-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नवापयत, तद्रक्षार्थं च वारकेण महीपतीनादिदेश. इतः सोऽश्वग्रीवः प्रजापतेस्तौ पौत्रौ महावीर्यावश्रौषीत, तस्मै च स स्वचंडवेगं दूतं प्रैषीत्, तदानीं पुत्रयुक्तः प्रजापतिर्नृपो नाट्यं कारयन्नासीत्, क्षुभितः प्रजापतिः, नाट्यरंगे च भंगो जातः, तं रंगभंगं दृष्ट्वा कुपितौ तौ त्रिपृष्ठाचलौ स्वान्नरानूचतुः, यथा कार्यं कृत्वा व्रजन्नयं दूतोऽस्माकं ज्ञापनीयः. अथ प्रजापतिना मानितः पूजितो विसृष्टो दूतो निर्जनै रैस्ताभ्यां ज्ञापितः. कुमारौ मार्गार्धे गत्वा भटैस्तमकुट्टयतां, तत्सहायास्तु काकवत्पलायांचक्रिरे, तत्प्रजापतिना राज्ञा ज्ञातं, भीतेन राज्ञा स पुनर्गृहे समानीतः, भृशं सत्कृत्यैवं भाषितश्च, भो चंडवेग! कुमारयोर्दुर्विनयत्वं स्वाम्यग्रे न वाच्यं, यतः संतो नतवत्सला भवंतीत्युक्त्वा विसृष्टो दूतः स्वस्थानं गतः. राज्ञोऽग्रे गत्वालीकाख्यानकातरेण दूतेन यथातथमुक्तं, तत श्रुत्वा कुपितेनाश्वग्रीवेण तस्मिन् वर्षे शालिरक्षार्थं शंखपुरे प्रजापतेरुक्तं, तदादेशं ज्ञात्वा प्रजापतिपुत्रौ तत्र गतौ, शालिगोपकैरुक्तं भो कुमारौ! चतुरंगचमूचक्रैः सिंहो महता कष्टेन रक्ष्यते, युवां द्वावेव भ्रातरौ कथं रक्षथः? ताभ्यामुक्तं भो शालिगोपकाः! सिंहं दर्शयत? यथा तस्य भयं वयं स्फेटयामः, ततस्ते तुंगाचलगुहागतं तं सिंहमदर्शयन्. रामशार्ङ्गिणौ रथारूढौ तां गुहां जग्मतुः, तत्र गुहापार्श्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योऽजना उच्चैः कलकलं चक्रुः, तं श्रुत्वा स केसरी जृंभादिविदीर्णवक्त्रो गुहातो विनिर्गत्य सन्मुखमागात्, तमापतंतमरथिनं च दृष्ट्वा त्रिपृष्टो रथमत्यजत्, तं निरस्त्रं दृष्ट्वा त्रिपृष्टः शस्त्राण्यप्यत्यजत, तत्प्रेक्ष्य जातजातिस्मृतिः केसर्यचिंतयत, अहो महदाश्चर्यं यदेकोऽयं मद्गुहाद्वारे समागात्, द्वितीयं रथादुत्तरणं, तृतीयं च शस्त्रमोचनं, अहोऽस्य मदांधत्वं! तर्हि हन्म्येनमेवं चिंतयित्वा व्यात्ताननः सिंहस्त्रिपृष्टोपरि धावितः, त्रिपृष्टोऽपि तमापतंतं दृष्ट्वा क्रोधाकुलः कराभ्यां तस्योष्टौ ृगृह्य तं जीर्णवस्त्रवत्पाटयामास, तदानीं देवतास्तस्योपरि पुष्पाभरणवस्त्राणि ववृषुः, लोकाश्च विस्मयं प्राप्ताः साधु साध्विति तं तुष्टुवुः, अहोऽहं कुमारेणानेन कथं मारित इत्यमर्षेण द्विधा कृतमपि स्फुरंतं तं दृष्ट्वा सारथिना गौतमजीवेन स इत्याश्वासितः, भो सिंह! त्वं खेदं मोद्वह! पशुसिंहस्त्वमेष तु नृसिंहः, अत एवापमानं मुधा धत्से. तत श्रुत्वा तुष्टमनाः स मृत्वा चतुर्थ्यां नरकावन्यां नारको जातः. तच्चर्म गृहीत्वा कुमारौ चलितौ स्वपुरंप्रति, ग्राम्यानित्यूचतुश्च, यथा—शालीन् खाद यथेष्टं त्वं । विश्वस्तस्तिष्ठ संप्रति ॥ असौ हृदयशल्यं ते । केसरी यन्निपातितः ॥ १ ॥ इति चाश्वग्रीवाय कथनीयमित्युक्त्वा तौ पोतनपुरे गतौ. अश्वग्रीवो जनमुखात्तद् ज्ञात्वा भीतस्तौ कुमारौ दूतेनाजूहवत्,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रजापतिना तौ कुमारौ प्रेषितौ. ततो द्वयोस्त्रिपृष्ठाश्वग्रीवयोर्युद्धं जातं, युद्धे जायमाने त्रिपृष्टेन स्वचक्रेण हतोऽश्वग्रीवः, त्रिपृष्टस्य राज्यं जातं, सुखेन च स राज्यं करोति.

एकस्मिन् दिने केचन गायना निशायां तत्पार्श्वे गानं कुर्वंतिस्म, तेन शय्यापालकस्योक्तं मयि शयाने एते गायना विसृष्टव्याः, राज्ञि निद्रायमाणे गानलुब्धेन शय्यापालेन गायना न विसृष्टाः, जागरितो राजा, पृष्टं च भो शय्यापालक! गायनाः कथं न विसृष्टाः? सोऽप्यूचे गीतलोभतः, तत् श्रुत्वा कुपितो विष्णुः प्रभाते तस्य कर्णयोस्तप्तं त्रपु अक्षेपयत्, तेन कर्मणा च स वेद्यं कर्म न्यकाचयत, अन्यदपि पापकर्म कृत्वा स चतुरशीत्यब्दलक्षायुः प्रतिपाल्य मृत्वा सप्तमावन्यां विंशतितमभवे नारको जातः, अचलोऽपि प्रव्रज्य केवलं लब्ध्वा शिवं ययौ. एकविंशतितमभवे त्रिपृष्टजीवो नरकादुध्धृत्य केसरी जातः, ततो मृत्वा द्वाविंशतितमभवे स चतुर्थं नरकं ययौ. ततो निर्गत्य भूरिशो भवान् भ्रांत्वा मनुष्यं जन्म च प्राप्य महत्पुण्यं चोपार्ज्य त्रयोविंशतितमभवेऽपरविदेहे मूकापुर्यां धनंजयस्य राज्ञो धारिण्याः पट्टराज्ञ्याः कुक्षौ चतुर्दशस्वप्नसूचितः पूर्णमासि संपूर्णलक्षणः सूनुर्जातः, जातकर्मकरणानंतरं पितरौ प्रियमित्र इति तन्नाम चक्रतुः, पित्रोः मनोरथैः सार्धं क्रमेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वबृधे. संसारनिर्विण्णो धनंजयो राजा प्रियमित्रं पुत्रं राज्ये निधाय स्वयं च दीक्षामुपाददे. प्रियमित्रचक्री समुत्पन्नचतुर्दशरत्नः षट्खंडं विजेतुं चक्रानुगोऽचलत्. क्रमेण षट्खंडं साधयित्वा प्रियमित्रचक्री मूकानगर्यां समागात्, द्वादशवार्षिकश्च तस्य राज्याभिषेको जातः, कोटिवर्षोनचतुरशीतिपूर्वलक्षायुः प्रतिपाल्य पोट्टिलाचार्यसमीपे च धर्मं श्रुत्वा दीक्षां लात्वा कोटिवर्षं यावत्प्रव्रज्यां प्रपाल्य मृत्वा चतुर्विंशतितमभवे शुक्रदेवलोके सर्वार्थसिद्धिविमाने स देवो जातः, पंचविंशतितमभवे देवभवाच्च्युत्वेह भरते छत्रापुर्यां जितशत्रोर्भद्रादेव्याः कुक्षौ नंदनो नाम नंदनोऽजनिष्ट, तं पुत्रं राज्ये न्यस्य जितशत्रुराट् परिव्रज्यामुपाददे, नंदनो राट्लोकानां हृदयानंदो वसुंधरां पाकशासन इव यथाविधि शशास. चतुर्विंशतिवर्षलक्षाणि जन्मतो व्यतीत्य विरक्तो राट् पोट्टिलाचार्यसमीपे व्रतमाददे, ग्रामाकरपुरादिषु गुरुणा सार्धं व्यहार्षीत्. एकधर्मरतः, आर्त्तरौद्रध्यानविवर्जितः, सदा त्रिदंडरहितः, चतुर्धर्मपरायणः, पंचव्रतैर्युक्तः, षड्जीवनिकायरक्षकः, सप्तभीस्थानवर्जितः, विमुक्ताष्टमदस्थानः, नवब्रह्मगुप्तिकः, दशविधधर्मधारकः, सम्यगेकादशांगभृत, तपो द्वादशधा कुर्वन्, द्वादशप्रतिमारुचिः, एवंविधः स नंदनसाधुर्लक्षवर्षं यावन्मासक्षपणमासक्षपणैः पारणकमकरोत्. तत्रैकलक्ष-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्षदीक्षायां मासक्षपणानि यथा—इक्कारसलक्खाइ । असीइसहस्सा य छसयपणयाला ॥ मासक्ख-
वणा नंदण—भवंमि वीरस्स पंचदिणा ॥ १ ॥ अर्हद्भक्त्यादिभिर्विंशतिस्थानकैः स दुरर्जं तीर्थकृ-
न्नामकर्मार्जयामास. आयुरंते सम्यगाराधनां कृत्वा साधून् साध्वीश्च क्षमयित्वा षष्टिदिनान्यनशनं
पालयित्वा पंचविंशत्यब्दलक्षायुः परिपाल्य मृतः षड्विंशतितमे भवे प्राणतदेवलोके पुष्पोत्तरना-
म्नि विमाने उपपादशय्यायामुदपद्यत, पंचविधपर्याप्तिपर्याप्तो निष्पन्नशरीरः शय्यायामुपविष्टो देवर्द्धिं
दृष्ट्वा मनसि मुदमापन्नश्चिंतयति, अहो! प्रभावोऽर्हद्धर्मस्य! अवधिज्ञानेन च पूर्वभवमपश्यत. त-
पसः प्रभावं ज्ञात्वा व्रतपालनं च सम्यगालोच्य पुनः पुनरर्हद्धर्मं देवसभायां वर्णयति. अथ तद्वि-
मानवासिनो देवास्तंप्रति प्रतिपादयंति यथा—

इदं विमानं भवतो । वयमाज्ञाकराः सुराः ॥ अमून्युपवनान्युच्चै—रमूर्मज्जनवापयः ॥ १ ॥
इदं च सिद्धायतनं । सुधर्मेयं महासभा ॥ मज्जनौकोऽलंकुरुष्वा—भिषेकं कुर्महे यथा ॥ २ ॥
एवममरैरुक्तः स मज्जनौकसि गत्वा सिंहासने सपादपीठे निषसाद. तत्रामरैर्दिव्येन पयसाभिषि-
क्तः, ततोऽलंकारनिकेतनं गत्वा देवदूष्यवस्त्रपरिधानपूर्वं कृतांगरागो भूषणैर्भूषितः. ततो व्यवसाय-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सभां गत्वा पुस्तकं वाचयित्वा पुष्पादिसामग्रीं समादाय स सिद्धायतने गतः. तत्र प्रतिमानामष्टोत्तरशतमर्चयित्वा नवीनैः स्तोत्रैः स्तुत्वा च ववंदे. अथ सुधर्मसभायां गत्वा स नाट्यमकारयत्. एवं दिव्यान् भोगान् भुंजानोऽसौ विंशतिसागरोपमाण्यायुः परिपूरयामास. इति पूर्वभवाः कथिताः. अथ सप्तविंशतितमे भवे श्रीवीरो जातस्तच्चरित्रं यथा—

इतश्चास्मिन् जंबूद्वीपे भरतक्षेत्रे ब्राह्मणकुंडग्रामे कोडालसगोत्र ऋषभदत्तो नाम ब्राह्मणोऽस्ति. तस्य जालंधरकुलोत्पन्ना देवानंदा नाम भार्यास्ति. नंदनजीवो दशमदेवलोकाच्च्युत्वोत्तराफाल्गुनीस्थे निशाकरे आषाढश्वेतषष्ठ्यां तस्याः कुक्षाववातरत्. तदानीं सा देवानंदा इमांश्चतुर्दशस्वप्नानद्राक्षीत्, यथा—गय १ वसह २ सीह ३ अभिसेअ ४ । दाम ५ ससि ६ दिणयर ७ झयं ८ कुंभं ९ ॥ पउमसरं १० सागर ११ । विमाणभवण १२ रयणुच्चय १३ सिहिं च १४ ॥ १ ॥ ततस्तया देवानंदाब्राह्मण्या ऋषभदत्तस्याग्रे गत्वा विज्ञप्तं, अहो स्वामिन्मयैते स्वप्ना दृष्टाः. एषां किं फलं भविष्यति? तेनोक्तं तव महान् पुत्रो भावी. तत् श्रुत्वा हर्षिता ब्राह्मणी तं गर्भं परिवहति. तद्गर्भानुभावतस्तस्य गृहे महती ऋद्धिर्जाता. एवं काले गच्छति स्वामिनि गर्भस्थिते व्यशीतिदिवसेषु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यतीतेषु सौधर्माधिपतेरासनमकंपत. ततः सौधर्मेंद्रोऽवधिना देवानंदागर्भगतं प्रभुं ज्ञात्वा सिंहासनात्समुत्थाय सप्ताष्टपदानि सन्मुखं गत्वा शक्रस्तवं कृत्वैवमचिंतयत्. अर्हच्चक्रिवासुदेवबलदेवा उत्तमकुलेषूत्पद्यंते. यत्पुनरयं जिनो मरीचिजन्मनि कुलमदं कृतवान्, तेन नीचकुलेषूत्पन्नः. अथास्माकं तं महाकुले क्षेप्तुमधिकारोऽस्ति, अतोऽहमपि गर्भपरावर्तं कारयामि.

अथावधिज्ञानेन क्षत्रियकुंडग्रामस्वामिनं सिद्धार्थक्षत्रियमीक्ष्वाकुवंशविभूषणं, तस्य गृहे च पट्टराज्ञीं सतीमुख्यां त्रिशलाख्यां गुर्विणीं ज्ञात्वा स पदात्यनीकपतिं हरिणैगमेषिणं देवं समाकार्यैवमादिशत. भो हरिणैगमेषिन्! गर्भपरावर्तं विधेहि? तथेति कृत्वा तेन देवेन कृष्णाश्विनत्रयोदश्यां हस्तोत्तरास्थिते चंद्रे देवानंदात्रिशलयोर्गर्भव्यत्ययः कृतः. ततस्तुष्टमना देवः स्वस्थानमगमत्. तन्निशायां सा देवानंदा तान् महास्वप्नांस्त्रिशलादेव्या हृतानद्राक्षीत्. अथ सा राज्ञी त्रिशला पूर्वोक्तांस्तान् स्वप्नानपश्यत्, यथा—गजो १ वृषो २ हरिः ३ साभि—षेकश्रीः ४ स्रक् ५ शशी ६ रविः ७ ॥ महाध्वजः ८ पूर्णकुंभः ९ । पद्मसरः १० सरित्पतिः ११ ॥ १ ॥ विमानं १२ रत्नपुंजश्च १३ । निर्धूमोऽग्नि १४ रिति क्रमात् ॥ ददर्श स्वामिनी स्वप्ना—न्मुखे प्रविशतस्तदा ॥ २ ॥ तद्दि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नादारभ्य मुदिता देवी त्रिशला गर्भं दधार. प्रभौ गर्भस्थे शक्राज्ञया जृंभकामराः सिद्धार्थवेश्मनि भूयोभूयो निधानानि समानीय न्यधुः. तथान्ये राजानः प्राभृतपाणयः पुरः प्राभृतानि मुक्त्वा प्रणेमुः. स्वामिनः प्रभावात्तत्कुलं सिद्धार्थराजगृहं चातिशयेन ववृधे. गर्भवासस्थितो वीरो मातृमोहात्संलीनांगः स्थितो ध्यानस्थयोगिवत. तदानीं त्रिशला चिंतयति नष्टो मे गर्भो गलितो वेत्यादि चिंतयंती रुदती प्रकृतिजनांश्च रोदयंती शोकसागरे निममज्ज. तत्प्रभृति तत्कुलं शोकसंकुलं विज्ञाय स्वामिना किंचित्स्पंदितं. हर्षितः सिद्धार्थः, हर्षिता त्रिशला, गर्भस्पंदनशंसनात्सर्वैरपि हर्षितं. अहो मातापित्रोर्मोहः! अतो मातापित्रोर्जीवतोरहं प्रव्रज्यां नोपादास्ये इत्यभिग्रहं स सप्तमे मासि जग्राह. अथ प्रसन्नासु दिक्षूच्चेषु च ग्रहेषु, प्रदक्षिणानुकूलेषु भूमिसर्पिषु मारुतेषु, प्रमोदपूर्णेषु च जगत्सु, जयिषु शकुनेषु, अर्धाष्टमदिवसेषु नवसु मासेषु गतेषु, चैत्रशुक्लत्रयोदश्यां तिथौ, हस्तोत्तरागते चंद्रे सिंहांकं कांचनरुचिं सुतं स्वामिनी सुषुवे. तस्मिन् समये षट्पंचाशद्दिक्कुमार्यो भोगंकरादयोऽभ्येत्य स्वामिनः स्वामिमातुश्च सूतिकर्माणि चक्रिरे. सूतिकर्मकरणानंतरं शक्रोऽप्यासनकंपेन सपरिच्छदस्तत्रागत्य पंच रूपाणि कृत्वा स्वामिनं करसंपुटे गृहीत्वा मेरुमस्तकं ययौ. तदा नाथं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्नपयितुमपरेऽपि त्रिषष्टिरमरेश्वराः समाययुः. अष्टोत्तरसहस्रसंख्यान् क्षीरनीरभृतान् पृथक्पृथक्कुंभान् स्वामिनोऽभिषेकायोपस्थितान् दृष्ट्वा शक्रेशः शशंके, यथेयंतं वारिसंभारं कथं स्वामी सहिष्यतीति? श्रीवीरोऽवधिज्ञानेन तद् ज्ञात्वा तदाशंकापनोदाय वामपादांगुष्ठाग्रेण मेरुमस्तकमपीडयत्. मेरुमस्तके च पीडिते यज्जातं तन्निशम्यतां, यथा—कंपमाने गिरौ तत्र। चकंपे च वसुंधरा॥ शृंगाणि सर्वतः पेतु—श्चुक्षुभुः सागरा अपि॥ १॥ ब्रह्मांडस्फोटसदृशे। शब्दाद्वैते प्रसर्पति॥ रुष्टः शक्रोऽवधेर्ज्ञात्वा। क्षमयामास तीर्थपं॥ २॥ संख्यातीतार्हतां मध्ये। स्पृष्टः केनापि नांह्रिणा॥ मेरुः कंपमिषादित्या—नंदादिव ननर्त सः॥ ३॥ तत्र जन्मोत्सवं विधाय सर्वे सुरेश्वरास्तदभिषेकजलं ववंदिरे, तथा सर्वांगेषु परिचिक्षिपुः. एवं सर्वेऽपि जन्ममहोत्सवं कृत्वा नंदीश्वरे देवान्नमस्कृत्य स्वस्थानमगुः. अथ सौधर्मेशो यथाविधि जिनं स्नपयित्वारात्रिकं मंगलप्रदीपं च कृत्वा, स्तुत्वा, जिनगृहे मातुरंतिके च मुक्त्वा, द्वात्रिंशत्कोटिस्वर्णवृष्टिं च विरचय्य, मुकुटं कुंडलयुगलं चोच्छीर्षके मुक्त्वा, श्रीदामरत्नदामाख्ये गेंडुके च पालनकोपरि कृत्वा, नंदीश्वरे यात्रां कृत्वा स्वस्थानमगमत. तदेंद्रादिष्टधनदप्रेरितजृंभकामराः सिद्धार्थनृपौकसि स्वर्णमाणिक्यरत्नवृष्टिं ववृषुः. तदानीं सिद्धार्थः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूनोर्जन्मोत्सवे जायमाने बंदीनमोचयत्, पूजामकारयत, दानानि चादात्. तृतीयेऽह्नि चंद्रसूर्ययोर्दर्शनं पितरौ प्रीत्या स्वयं कारयामासतुः. षष्ठेऽह्नि कंठावलंबितमालाभिः कुलस्त्रीभी रात्रिजागरणं कारयामासतुः.

एवं महोत्सवे जाते सिद्धार्थनृपतिरेकादशे दिने, निवर्तितेऽशुचिजातकर्मणि, संप्राप्ते द्वादशे दिने ज्ञातिस्वजनानाहूय दानसन्मानपूर्वकं धनादिभिर्वर्धितत्वात्तस्य वर्धमान इति नाम विदधे. वज्रिणा महोपसर्गैरक्षोभ्यं विदित्वा महावीर इत्यपरं नाम विदधे. क्रमेण न्यूनाष्टवत्सरोऽष्टोत्तरसहस्रलक्षणैर्लक्षितो निसर्गेण गुणी निजवयोऽनुरूपाभिरामलक्यादिभिः क्रीडाभिः क्रीडन् स वयसा ववृधे. अथ साग्राष्टवत्सरं स्वामिनं पित्राध्यापनाय लेखशालायामुपाध्यायसमीपमानीतमवधिना विज्ञाय तत्रागत्य शक्रेण स्वामी सिंहासने निवेशितः, प्रणम्य पृष्टश्च शब्दपारायणं जगौ. सप्तहस्तोन्नतो यौवनस्थः पित्रा समरवीरराजपुत्रीं यशोदानाम्नीं महामहेन परिणायितः. श्रीवीरो यशोदयादेव्या समं वैषयिकं सुखं बुभुजे. यशोदया सार्धं भोगान् भुंजानस्य तस्य प्रियदर्शना दुहिता जाता, सा च समये जमालिना राजपुत्रेण परिणीता. स्वामिनो जन्मतोऽष्टाविंशेऽब्दे गते विहितान-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शनौ मातापितरौ विपद्य तुर्यं माहेंद्रदेवलोकं गतौ. ततश्च्युत्वापरविदेहाख्ये क्षेत्रेऽव्ययं प्राप्स्यतः. पूर्णप्रतिज्ञः स्वामी ज्येष्ठबांधवं नंदिवर्धनं राजानं शोकमग्नमूचे, यथा—सदा सन्निहितो मृत्यु—र्जीवितं न स्थिरं सदा ॥ उपस्थिते वास्तवेऽस्मि—न्न शोकस्य प्रतिक्रिया ॥ १ ॥ धैर्यालंबनपूर्वं च । धर्मानुष्ठानमेव हि ॥ युज्यते न तु शोकादि । भ्रातः कापुरुषोचितं ॥ २ ॥ इत्यादिवचनैर्बोधितो नंदिवर्धनः सामंतै राज्ये स्थापितः.

अथ श्रीवीरः संसारविमुखः प्रव्रज्याभिमुखो नंदिवर्धनं भ्रातरमापप्रच्छे. भो भ्रातस्तवाज्ञयाहं दीक्षामंगीकरोमि. तदा नंदिवर्धनो वीरंप्रत्याह, हे बांधव! शोकमग्ने मयि त्वं किं क्षते क्षारं निक्षिपसि? अथ ममोपरोधात्त्वं वर्षद्वयं तिष्ठ? तद्वचनमंगीकृत्य ब्रह्मव्रतधरो विशुद्धध्यानतत्परः प्राशुकान्नभुग्महात्मना वर्षमेकमत्यवाहयत. ततः समागता लोकांतिका देवाः, तीर्थं प्रवर्तयेत्युक्त्वा प्रतिबोधितो नाथो वर्षं यावद्दानं ददाति. यथा—सारस्सयमाइच्चा । वण्हीवरुणा य गद्दतोया य ॥ तुसिया अव्वाबाहा । अग्गिचा चेव रिठा य ॥ १ ॥ एए देवनिकाया । भयवं बोहिंति जिणवरिंदं तु ॥ सव्वजगजीवहियं । भयवं तित्थं पवत्तेह ॥ २ ॥ संवच्छरेण होही । अभिनिक्खमणं तु जिणव-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रिंदाणं ॥ तो अब्भसंपयाणं । पवत्तए पुव्वसूरम्मि ॥ ३ ॥ एगा हिरण्णकोडी । अठेव य णूणगा सयसहस्सा ॥ सूरोदयमाईयं । दिज्जइ जा पायरासाउ ॥ ४ ॥ तिन्नेव य कोडिसया । अठासीअं च हुंति कोडीउ ॥ असीअं च सयसहस्सा । एयं संवछरे दिन्नं ॥ ५ ॥ एवं दानं दत्वा पंचाशद्धनुरायामां, पंचविंशतिधनुर्विस्तृतां, षट्त्रिंशद्धनुरुन्नतां चंद्रप्रज्ञाख्यां शिबिकां भ्रातृकृतां. दिव्यानुजावात्सुरकृतशिबिकांतर्नवनादेकीनूतां समारूढो जगवान् पालके विमाने देवराज इव शुशुभे. पुव्विं उक्खित्ता माणुसेहिं । साहट्टरोमकूवेहिं ॥ पच्छा वहंति सीयं । असुरिंदसुरिंदनागिंदा ॥ १ ॥ तां शिबिकामारूढो जगवान् ज्ञातखंडवनं सुरनरगणैः परिवृतः समागात. शिबिकायाः समुत्तीर्य स जूषणान्यत्यजत्, पंचमुष्टिजिः केशानुदध्रे, तानिंद्रः क्षीरसमुद्रे चिक्षेप, प्रजोः स्कंधे च देवदूष्यं निदधे. एको जगवान् वीरः कृतषष्ठतपाः करेमि सामाईयमिति कृत्वा चारित्रं प्रत्यपद्यत. जन्मतस्त्रिंशत्तमे वर्षे व्यतीते मार्गशीर्षे श्यामायां दशम्यां तिथौ हस्तोत्तरास्थे चंद्रे पश्चिमे यामे चारित्रेण समं प्रजोस्तुर्यं मनःपर्यवज्ञानं समुदपद्यत. ततः स्वामी जगन्नायकः सोदर्यं नंदिवर्धनं ज्ञातिवर्गं चापृच्छ्य चारित्ररथमारूढो विहाराय प्रतस्थे. मुहूर्तशेषे दिवसे प्रवरं कुमारग्राममनुप्राप्तः तत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गरबहिरुद्याने च निःप्रकंपः स्वामी प्रतिमया स्थितः. तदा कश्चिद्गोपः सर्वं दिनं वृषान् वाहयित्वा सायं स्वामिसमीपे मुक्त्वा गोदोहाय गृहं गतः, ते तु स्वैरं वने गताः, स चागतः स्वामिनं वीक्ष्या· पृच्छत्. स्वामिन्यदत्तोत्तरे न वेत्तीति रात्रौ वने विलोकयतिस्म, परं नापश्यत. रात्रिशेषे स्वयमेवा· गता वृषाः. सोऽप्यागतस्तान् दृष्ट्वा नूनमनेन गोपिता इति रुष्टः सेल्हकमुत्पाट्य स स्वामिनंप्रति धावितः, अवधेरागत्य शक्रेण च स शिक्षितः. ततो मारणांतिकोपसर्गवारणार्थं बिडौजाः सिद्धार्थ· नामानं स्वामिमातृष्वस्रेयं व्यंतरवरं प्रभुपांते मुक्त्वा स्वस्थाने गतः. ततः प्रभुः कोल्लाकसन्निवेशे ब· हुलब्राह्मणगृहे सपात्रो धर्मो मया प्रज्ञापनीय इति प्रथमपारणं गृहस्थपात्रे परमान्नेन चकार. तत्र पंच दिव्यानि प्रादुर्भूतानि, यथा—

चेलोत्क्षेपः १, गंधोदकपुष्पवृष्टिः २, दुंदुभिनादः ३, व्योम्नि अहो दानमहो दानमित्याघोष· णा ४, वसुधारावृष्टिश्चेति ५. अद्धतेरसकोडीउ । उक्कोसा तह होइ वसुहारा ॥ अद्धतेरसलक्खा । जहण्णिया होइ वसुहारा ॥ १ ॥ विहरन् स्वामी मोराकसन्निवेशे ययौ, तत्र तापसाश्रमो विद्यते, तत्र च पितुर्मित्रं कुलपतिर्वर्तते. ते बाहुः प्रसारितः, स्वामिनापि पूर्वाभ्यासाद्बाहुः प्रसारितः. तस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रार्थनया स्वामी तत्रैकां रात्रिमवसत्. तस्याग्रहाच्च स्वामी अष्टौ मासान् विहृत्य वर्षाचतुर्मासीं स्थातुं तत्रागमत्, तेनार्पिते उटजे च वर्षाकालं स्थितः. तस्याप्रीतिं दृष्ट्वा चार्धमासादनंतरं स्वामी ततो निर्गत्य अस्थिकग्रामं समाजगाम. तत्र चतुर्मासीं स्थितः पारणके पृथ्वीं पावयन् विचरतिस्म. तदानीं पितुर्मित्रं सोमब्राह्मणः समागत्य स्वामिनं प्रार्थयामास. हे स्वामिंस्त्वं संवत्सरं यावद्दानमदाः, अदरिद्रं च जगज्जज्ञे मंदभाग्यमेकं मां विना, अतो मे किंचिद्देहि? अहं दारिद्र्यपीडितो जवदरणमागतोऽस्मीति. कारुण्यात्स्वाम्युवाच भो विप्र! त्यक्तसंगोऽस्मि संप्रति, तथाप्यंसशस्थितस्यास्य वाससोऽर्धं गृहाण? एवमुक्त्वा वासोऽर्धं दत्वा स तोषितः, तदर्धमादाय च स निजगृहं ययौ. एवं स्वामिना पूर्वसंगतिकविप्राय दानं दत्तमिति चरित्रं कथितं, अथावशिष्टं किंचिदुच्यते यथा—ततो महोपसर्गान् सहमानः श्रीवीरो दीक्षादिनादारभ्य सपक्षां सार्धद्वादशाब्दीं महातपांस्यनंभांसि नित्यभक्तचतुर्थवर्जितानि चकार. क्रमेण विहरन् स्वचरणन्यासैः पृथ्वीं पावयन् स जृंभकं सन्निवेशं प्राप. तत्र ऋजुवालुकानदीतीरे श्यामाकगृहिणः क्षेत्रे सालतरोस्तले अव्यक्तचैत्यस्यासन्ने सिंधुरोधस्युत्तरे विजयमुहूर्ते षष्टतपस उत्कटिकासनस्थितस्य जीर्णरज्जुवद्घनघातिकर्मणि त्रुटिते हस्तोत्तरा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थिते चंद्रे शुक्लवैशाखदशम्यां चतुर्थे यामे विभोः केवलज्ञानमुत्पेदे. कंपितासनाः सुरेंद्रा देवसंघपरिवृताः समागत्य समवसरणं विदधिरे. तत्र क्षणमात्रं देशनां दत्वा श्रीअपापानगर्यां द्वितीयं समवसरणमकरोत्. तस्मिन् समवसरणे च गणधरस्थापनाचतुर्विधसंघस्थापनाद्यकरोत्. प्रभोः परिवारे एकादश गणधरा अभवन्, तथा चतुर्दशसहस्रसंख्याः साधवोऽभवन्, षट्त्रिंशत्सहस्रसंख्याः साध्व्यः, एकोनषष्टिसहस्रयुगेकलक्षमिताः श्राद्धाः, अष्टादशसहस्राधिका त्रिलक्षी श्राद्धीनां बभूव. नवसु गणभृत्सु मुक्तिं यातेषु सगौतमसुधर्मो भगवान् ज्ञातनंदनस्त्रिदशैरावृतोऽपापामगात, तत्रांतिमां च चतुर्मासीं स्थितवान्.

अथेशः कार्तिकेऽमावास्यापश्चिमे क्षणदाक्षणे निर्वाणसमयं ज्ञात्वा षोडशप्रहरात्मिकीं देशनां प्रारेभे. ततः स्वासनकंपात् सर्वे सुपर्वेशाः समाजग्मुः. तेषां मध्यात साश्रुदृग् सुधर्मेंद्रो व्यजिज्ञपत, यथा हस्तोत्तराख्यं त्वज्जन्मनक्षत्रं, तत्र भस्मग्रहो लग्नः, अतः स्वामिन् मुहूर्तमात्रं प्रतीक्षस्व? यत एष दुर्ग्रहो द्विसहस्रवर्षस्थितिकस्तव शासनं पीडयिष्यति. ततस्तं देवेंद्रं युक्त्या प्रतिबोध्य पर्यंकासनभाग् तृतीयशुक्लध्यानाभियोगात् शेषकर्मेंधनानि भस्मीकृत्य स्वातिनक्षत्रे स्वामी परमं पदं प्रा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प. त्रैलोक्येऽपि हि सात्विकेष्वनवधिः प्राग्जन्ममोक्षावधि । श्रीमद्वीरजिनेश्वरस्य चरितं को वक्तु-मीशोऽखिलं ॥ प्रस्तावस्य तथापि हि प्रवचनांभोधेर्गृहीत्वा लवं । किंचित्कीर्तितमीदृशं ननु मया स्वान्योपकारेछया ॥ १ ॥ इति श्रीवीरचरित्रं लेशत उक्तं. एवंविधः श्रीमान् महावीरदेवाधिदेवो देवासुरमनुजपर्षदि दान १ शील २ तपो ३ भाव ४ भेदरूपं चतुर्विधं धर्ममाख्यातुकामः प्रथमं दानं प्ररूपितवान्. तस्य दानस्य त्रैविध्येऽपि धार्मिकदानप्रशंसायां भगवद्वचनसंमतिमाह—

॥ मूलम् ॥—धम्मत्थकामभेया । तिविहं दाणं जयम्मि विक्खायं ॥ तहवि हु जिणिंदमुणिणो । धम्मिअदाणं पसंसंति ॥ २ ॥ व्याख्या—धर्मार्थकामभेदात त्रिविधं दानं जगति विख्यातं वर्तते. तत्र यद्धर्मार्थं साधुभ्यः साधर्मिकेभ्यो वा दानं तद्धर्मदानं १. अर्थदानं स्वार्थाय यत्स्वकीर्तिकारि याचकेभ्यः स्वभृत्येभ्यो वा दानं तदर्थदानं २. काममोहितपुमान् कामार्थं यत्स्वकलत्रपणांगनादिभ्यस्तदर्थं परेभ्यो वा ददाति तत्कामदानमुच्यते ३. ' तह विहुत्ति ' तथापि हु निश्चितं ' जिणिंदमुणिणोत्ति ' जिनेंद्रो वीरजिनो, मुनयो गणधराद्यास्तत्र ' धम्मिअदाणंति ' धार्मिकदानं ' पसंसंतित्ति ' प्रशंसंति वर्णयंतीति गाथाक्षरार्थः ॥ २ ॥ तत्कथं वर्णयंतीत्याकांक्षायां गा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

थाद्वयमाह—

॥ मूलम् ॥—दाणं सोहग्गकरं । दाणं आरुग्गकारणं परमं ॥ दाणं भोगनिहाणं । दाणं ठाणं गुणगणाणं ॥ ३ ॥ व्याख्या—दानं धार्मिकदानमित्यर्थः, सौभाग्यकरं भवति, आरोग्यकारणं नीरोगतायाः परमं प्रकृष्टं कारणं भवति. दानं दत्तं सत् 'भोगनिहाणं' भोगस्य पंचेंद्रियसुखस्य निधानं निधिर्भवति. दानं गुणगणानां स्थानमाश्रयो भवति. गुणानां गणा गुणगणास्तेषां गुणगणानामित्यक्षरार्थः. ॥ ३ ॥

॥ मूलम् ॥—दाणेण फुरइ कित्ती । दाणेण य होइ निम्मला कंती ॥ दाणावज्जिअहिअओ । वयरीवि हु पाणीयं वहइ ॥ ४ ॥ व्याख्या—दानेन कीर्तिः स्फुरति, यतो दानं हि कीर्त्याः कारणं वर्तते, कीर्तिकामः पुमान् दानं ददाति, दानेन च भवति निर्मला कांतिः, शरीरकांतेः कारणमपि दानमेव. दानावर्जितहृदयो दानेन वशीकृतहृदयो वैर्यपि पुमान् हु निश्चितं 'पाणीयं' पानीयं वहत्यानयति, सेवकीभूय चरतीत्यर्थः. ॥ ४ ॥ एवं दानं वर्णयित्वा प्रेक्षावतां प्रवृत्तये तत्फलं दृष्टांतेन दृढयन्नाह—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ मूलम् ॥—धणसज्जवाहजम्मे । जं घयदाणं कयं सुसाहूणं ॥ तक्कारणमुसन्नजिणो । तेलुक्कपियामहो जाउ ॥ ५ ॥ व्याख्या—धनसार्थवाहजन्मनि ऋषन्नदेवपूर्वन्नवे 'जं घयदाणंति' यद् घृतदानं कृतं सुसाधूनां श्रीधर्मघोषसूरिप्रभृतीनां 'तक्कारणत्ति' तस्मात्कारणादित्यत्र प्राकृतत्वाद्विन्नक्तिपरिणामः, 'उसहजिणोत्ति' ऋषन्नजिनः प्रथमतीर्थेशः 'तिलुक्कत्ति' त्रैलोक्यपितामहो जातः, पितुः पिता पितामहो जातोऽन्नूदिति गाथार्थः. ॥ ५ ॥ विस्तरार्थस्तु कथानकादवसेयः. तत्र प्रथमतः पूर्वन्नवाख्यानपूर्वं श्रीऋषन्ननाथचरित्रं यथा—

आदौ सार्थपतिर्धनो १ मिथुनकः २ सौधर्मकल्पे सुरः ३ । खेटेशश्च महाबलो ४ दिविषदीशाने ५ नराधीश्वरः ६ ॥ युग्मी ७ च त्रिदशेश्वरः ८ सुन्निषजः पुत्रो ९ ऽच्युते निर्जरः १० । चक्री ११ सर्वसुरोत्तमः १२ प्रथमकोऽर्हन्नान्निन्नूवः श्रिये ॥ १ ॥ प्रत्यग्विदेहेषु क्ष्मामुकुटोपमं क्षितिप्रतिष्ठितं नाम पुरमस्ति. तस्मिन्नगरे समस्तराजमंमलीसेव्यमानचरणः क्षत्रशिरोमणिः प्रसन्नचंद्रनामा राजास्ति, तत्र पुरे लक्ष्मीनिवासन्नवनं धननामा सार्थवाहोऽस्ति. सोऽन्यदा वसंतपुरे नगरे व्यवहारार्थं गंतुमना यात्रार्थिनः समाह्वातुं मिंडिमं वादयामास. न्नो न्नो लोकाः! अशंबलस्य शंबलं,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अछत्रस्य छत्रकं, अवाहनस्य वाहनं, तथा यस्य यद्विलोक्यते तस्य तद्ददामि, क्षेमेण वसंतपुरं प्रापयामि चेति. ततः सुमुहूर्ते सुलग्ने मंगलध्वनिपूर्वकं शिरसादृतान् बिभ्रन् पुरीपरीसरावनौ पञ्कुट्यां कृतावासः स तस्थौ. अत्रांतरे वसंतपुरं गंतुकामं श्रीधर्मघोषमुनीश्वरं समालोक्य सार्थवाहस्तं पृष्ठतिस्म. भो मुनयो यूयं किमर्थमत्रागताः? वाचंयमशिरोमणिस्तमुवाच, भो सार्थेश! त्वया समं वयं वसंतपुरपत्तनं समेष्यामः. सार्थवाहेनोक्तं पादाववधार्यतां, भवतां च यत्किंचिदाहारादिकं विलोक्यते तद्याचनीयं. अत्रांतरे केनचित्पुरुषेण सार्थवाहपुरतो रसालफलसंभृतं स्थालं प्राभृतीकृतं. सार्थवाहेन गुरोरग्रे मुक्तं प्रोक्तं च, भगवन्निदं गृहाण? मामनुगृहाण च? अहं भवद्भक्तितो धन्योऽस्मि, यदस्मिन्नवसरे यूयमत्रागताः. तदानीं मुनिराह भो महाभाग! फलानि साधूनामकल्प्यानि, साधवस्तानि नेच्छंति, अतोऽहमपि फलानि नेहामि. वयं सिद्धमन्नं प्रासुकं जलं च गृह्णामः. मुनेरेतद्वचनं निशम्य विस्मयस्मेरमानसः सोऽवोचत्—

अहो कष्टमहो धैर्य—महो निःस्पृहता मुनेः ॥ एवं मुनीन् प्रशंसन् संभृतवाहनो धनेन धनदोपमः स धननामा सार्थवाहो मुनिभिः सार्धं शुभशकुनैः प्रेर्यमाणो मार्गे चचाल. एवमविछिन्न-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रयाणैः प्रेर्यमाणः कतिचिद्दिनांते व्यतीतेषु ग्रीष्मर्तुषु वर्षाकालः समागात, अविच्छिन्नधाराभिर्धाराधरो वर्षितुं लग्नः, यतः—पांथानां गच्छतामग्रे । प्राणद्रव्योत्तमर्णकैः ॥ नद्यो गतिनिषेधाज्ञा । रेखा इव कृता घनैः ॥ १ ॥ तदानीं स धनसार्थपतिः सार्थस्य कष्टं दृष्ट्वाटवीतटे सार्थनिवेशं चकार. सार्थपतौ तत्र स्थिते कियद्भिर्वासरैर्जनानां पाथेयानि त्रुटंतिस्म, ततश्च स सार्थलोकः कष्टे पतितः, कंदमूलफलवृत्तिं च कर्तुं प्रचक्रमे. एवं काले गच्छति वर्षर्तुप्रांते सार्थलोकचिंतया धनसार्थपतेर्निद्रा गता. ततो गतनिद्रः सार्थवाहो यामिन्याः पश्चिमे यामे स्वचित्ते चिंतयामास, अहो ते धन्याः साधवो ये मया सार्धं समागता अप्रासुकीकृतं पयोऽपि न पिबंति, तेषां मुनींद्राणां प्राणयात्रा कथं भविष्यतीति! अहो मम मंदभाग्यत्वं! अहो मम मौढ्यं! येन मया सार्धं समागतानामपि साधूनां चिंता न कृता. अथ प्रभाते तत्र गत्वा प्रासुकान्नपानैस्तेषां साधूनां चिंतां करिष्ये. एवं यावता स चिंतयति तावता सूर्योदयो जातः. जाते च सूर्योदये मंगलपाठकेनोक्तं, यथा—

अभूत् पिंगा प्राची रसपतिरिव प्राप्य कनकं । गतच्छायश्चंद्रो बुधजन इव ग्राम्यसदसि ॥ न दीपा राजंते द्रविणरहितानामिव गुणाः । क्षणक्षीणास्तारा नृपतय इवानुद्यमपराः ॥ १ ॥ मंगल-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पाठकस्येदं वचनं श्रुत्वा विधिवत्प्राभातिकं कृत्यं विधाय माणिभद्रनाम्ना मित्रेण सह चलितो गुर्वंतिके गतः, गत्वा वंदिता गुरवः, हृष्टमनाश्च स साधून् ददर्श. कथंभूतान्? कांश्चित्कायोत्सर्गपरान्, कांश्चिद्ध्यानबंधुरान्, कांश्चित्स्वाध्यायतत्परान्. कांश्चित्प्रत्युपेक्षापरान्. तान् सर्वान् प्रणम्य गुरोः पुरस्तादासीनो विनयावनम्रदेहो योजितकरकमलोऽसाववादीत. भो महानुभावाः! यूयं मम सार्थे सह समागताः, परं मया मंदभाग्येन शुश्रूषा न कृता, एष च ममापराधः सोढव्यः. अथ गुरुरभाषिष्ट भोः सार्थाधीश! त्वयास्माकं विरूपं न कृतं, किंतु हितमेव कृतं, यतः संसार इव दुर्लंघेऽस्मिन् कांतारे दुष्टकर्मभ्य इव चौरेभ्यो वयं रक्षिताः, यत्तव सार्थिका अस्माकमन्नपानादि प्रयच्छंति तत्त्वयैव दत्तं. धनोऽप्यूचे यूयं गुणिनः सर्वं गुणमयं मन्यध्वे, अथ कल्पनीयमाहारमादाय ममानुग्रहं कुर्वंतु, ममावासे मुनीन् प्रेषयत? ततो गुरुणा धनस्यानुग्रहकृते मुनिद्वंद्वं प्रेषितं. गृहागतं मुनिद्वंद्वं दृष्ट्वोत्सर्पिवासनः सर्पिषा तत्प्रत्यलाभयत. ततो धनेन तेन द्रव्यशुद्धभावशुद्धदानेन बोधिबीजमवापि. धर्मलाभाशिषं दत्वा मुनयोर्निवृत्तयोर्धनो धन्यं मन्यमानः पूर्णमनोरथः सुखेनास्थात्. साधू अपि तदन्नादिकं समादाय गुरुसन्निधौ जग्मतुः. अथापरेऽह्नि परिवारपरिवृतो धनो गुर्वंतिके समागात्.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुरवोऽपि क्लेशनाशिनीं देशनां ददुः, यथा—

भक्तिः श्रीवीतरागे भगवति करुणा प्राणिवर्गे समग्रे । दीनादिभ्यः प्रदानं श्रवणमनुदिनं श्रद्धया सुश्रुतीनां ॥ पापापोहे समीहा भवभयमसमं मुक्तिमार्गानुरागः । संगो निःसंगचित्तैर्विषयविमुखता हर्म्यिणामेष धर्मः ॥ १ ॥ रागादिविजयी देवः । सच्चरित्रगुरुर्गुरुः ॥ प्राणित्राणप्रधानश्च । धर्मः सम्यक्त्वमुच्यते ॥ २ ॥ तत्त्वायमलंकारो । युज्यते पुरुषोत्तम ॥ आधातुं हृदये श्रीमन् । सम्यक्त्वं कौस्तुभः शुभः ॥ ३ ॥ एतद्धर्मं श्रुत्वा सम्यक्त्वं चांगीकृत्य धनो धन्यं मन्यमानो निजावासं गतः. प्रभाते माणिभद्रेण विज्ञप्तं, हे विभो प्रावृडतिक्रांता, इंद्रेण धनुर्विमुक्तं, वसुधाधवेन गृहीतं, तथा घनैर्नभस्त्यक्तं, बहलधूलिभिर्व्याप्तं, एवमनेके भावाः प्रकटीबभूवुः. सार्थेश एतदाकर्ण्य गुरुणा सार्धं मार्गे संचरन् क्षेमेण वसंतपुरं समाययौ. तत्र राज्ञा सन्मानितः स्वानि भांडानि विक्रीय प्रतिभांडान्युपादाय धर्मघोषमुनीश्वरं चापृच्छ्य कृतकृत्यः क्षेमेण प्रत्यावृत्तः क्षितिप्रतिष्ठितं पुरं प्राप. पूर्णायुर्मृतो धनः. इति प्रथमभवः.

अथ द्वितीयभवे उत्तरकुरुषु कल्पद्रुपूर्णसंकल्पो युग्मधर्मिषु जग्मिवान्. तुर्यभवेऽपरविदेहेषु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मंगलावतीनाम्नि विजये वैताढ्यशैले गंधारदेशे गंधसमृद्धके पुरे शतबलराटूपुत्रश्चंद्रकांतापट्टराज्ञीकुक्ष्युद्भवो महाबलनामा विद्याधरः संजज्ञे. क्रमेण वृद्धिं गतः पित्रा पाठितो यौवनस्थश्च पित्रा परिणायितः सुखान्यनुभवतिस्म. एवं सुखेन कालो याति. एकस्मिन् दिने स साध्वंतिके धर्मं श्रुत्वा वैराग्यवान् महाबलाय राज्यं दत्वा स्वयं दीक्षामंगीकृत्य तपांसि तप्त्वा दिवमासदत्. अथ स महाबलो राट् यौवनोन्मादमेदुरोऽज्ञातधर्मकर्मा स्वेछया राज्यसुखान्यनुभवन्नास्ते. अन्यदा महाबलः सदसि निविष्टः संगीतरसनिमग्नो यावता सभायां नाट्यं कारयति तावता मंत्रीशः स्वयंबुद्धो नाम्ना धर्मतत्वज्ञो नाट्यावसरे समागत्यैवमवादीत. भो राजेंद्र! किं नाट्येन? सावधानो भव? तत्रायुर्मया पृष्टो गुरुरवादीत्. भवद्भर्तुर्मासमेकमायुर्वर्तते, तत् श्रुत्वा भीतो राट्, यतः—सा नत्थि कला तं नत्थि । ओसहं तं नत्थि किंपि विन्नाणं ॥ जेण धरिज्जइ काया । खज्जंती कालसप्पेण ॥ १ ॥ मंत्रिणोक्तं सावधानो भव? धीरत्वमवलंबस्व? पुण्ये प्रवर्तस्व? एकदिनपालितेऽपि चारित्रे जनो यदि मोक्षं नाप्नोति, परं वैमानिको भवत्येव, नात्र संदेहः, अथ मासमेकं पुण्यं कुरुष्व? मंत्रिवचसा राजा जिनप्रासादेऽष्टाह्निकोत्सवं करोतिस्म. ततो गुरुसमीपे दीक्षामुपादायानशनेन द्वाविंशतिदि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नानि स्थित्वा मृत इति चतुर्थो भवः. ततः पंचमे भवे ईशानकल्पे श्रीप्रभाभिधाने विमाने ल- लितांगाभिधो देवोऽभूत्, तस्य प्रिया स्वयंप्रभा. सा स्वयंप्रभा च्युता, तद्विरहे विलापं कुर्वन् ल- लितांगो दृढधर्मदेवेन निवारितो यः पुरा मित्रमंत्रीशः स्वयंबुद्धोऽभवत. तेनोक्तं भो ललितांग! सोऽहं मंत्री स्वयंबुद्धाभिधस्तव विरहे प्रव्रज्यैनां श्रियमाश्रितः. भो ललितांग! अवधिना विज्ञायाहं तव कथयामि, यत्पुनरपि सा स्वयंप्रभा तव भविष्यति. श्रूयतां? धातकीखंडे प्राग्विदेहे नंदिग्रामे- ऽतिदुर्गतो नागिलाख्यो गृहपतिर्विद्यते, तस्य नागश्रियां पत्न्यां पुत्रीषट्कादनंतरं सप्तमी पुत्री जा- ता. तां दृष्ट्वोद्विग्नमानसो नागिलो वैराग्यान्नगरान्निर्गत्य दूरं गतः. तस्या दुर्भगत्वेन जने निर्नामि- केति प्रसिद्धिरभूत. सा क्रमेण दारिद्र्येण सह वर्धिता यौवनोन्मुखी नभस्तिलकपर्वते दारुभारार्थ- मगमत. तत्र सुरासुरनमस्कृतं युगंधरमुनिं दृष्ट्वा नत्वा तद्व्याख्यां श्रुत्वा संवेगमापन्ना जगौ. हे भ- गवन्नस्मिन् संसारे भूयांसो दुःखिनः संति, परं मत्तो मंदभाग्याया दुःखाधिकः कोऽपि नास्ति. मु- निनोक्तं हे वत्से! त्वं दुःखं मुधा धत्से, चतुर्गतिष्वपि संसारिजीवानां यानि यानि दुःखानि वर्तंते तानि तानि श्रुतमात्राणि देहिनां हृदयं भिंदंति. अतोऽस्मिन् संसारसमुद्रे निपततां धर्म एव त्रु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जात्वं धत्ते, धर्माराधनत एव देही चक्रवर्त्यादिपदवीं लभते, अतस्त्वमपि धर्मं विधेहि? यतः—
धर्मः कल्पद्रुमः पुंसां । धर्मः सर्वार्थसिद्धिदः ॥ धर्मः कामदुघाधेनु—स्तस्माद्धर्मो विधीयतां ॥ १॥
देहे द्रव्ये कुटुंबे च । सर्वसंसारिणां रतिः ॥ जिने जिनमते संघे । पुनर्धर्माधिकारिणां ॥ २ ॥
एवं तस्य त्रैलोक्यदर्शिनो मुनेरेतदुपदेशं श्रुत्वा निजदेहेऽप्युद्विग्ना गृहीतानशनाधुना वर्तते. अथ भो ललितांग! त्वं तस्याः स्वरूपं दर्शय? तथा कृते च सा तवानुरागिणी मृत्वा स्वयंप्रभादेवी भविष्यति. तेनापि तथा कृते पुनः सा स्वयंप्रभा जाता. तया सह तथैव भोगान् भुक्त्वा ललितांगदेवश्च्युतः. गतः पंचमभवः.

ततः षष्टे भवे महाविदेहक्षेत्रे लोहार्गलपुरे सुवर्णजंघस्य राज्ञो लक्ष्मीपट्टराज्ञीकुक्षौ स ललितांगजीव उत्पन्नः. शुभस्वप्नेन सूचितः पुत्रो जातः, क्रमेण तस्य वज्रजंघ इति नाम दत्तं. स्वयंप्रभापि च्युत्वा पुंडरीकिण्यां नगर्यां वज्रसेनस्य चक्रिणो गृहे श्रीमतीनाम्नी सुताभवत्. सान्यदा प्रमदोद्याने श्रीमंती देवदानवैर्वंदितं केवलिनं मुनिं वीक्ष्य जातजातिस्मृतिर्जाता. सा श्रीमती पूर्वभवचेष्टितं सर्वं ज्ञात्वा निजधात्रेयीं पंडितां समाचख्यौ. पूर्वजन्मनीशानकल्पे ललितांगदेवप्रियाहं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वयंप्रभाऽभवं, स च मम च्यवनात्पूर्वं च्युतः, परं न ज्ञायते कुत्रोत्पन्न इति, अतोऽस्य तत्प्राप्तये यत्नं कुरु? पंडितापि सख्योक्तं वृत्तांतं श्रुत्वा पूर्वभवचरित्रं पट्टे लिखित्वांगणोपांते वज्रसेनस्य चक्रिणः सेवागतानां कुमाराणां सर्वेषामदर्शयत्. तं दृष्ट्वा वज्रजंघोऽपि जातजातिस्मृतिश्चिंतयति, अहो मम पूर्वभवः केन ज्ञानवता प्रोक्तः? अनया पंडितया च कथं पट्टे लिखितः? ततः पंडितायाः सर्वं वृत्तांतं ज्ञात्वा वज्रसेनश्चक्री वज्रजंघश्रीमत्योः पाणिग्रहणमकारयत्. ततो वज्रजंघः श्वशुरमापृच्छ्य लोहार्गलपुरं गतः, पित्रा च राज्ये निवेश्य स्वयं दीक्षा जगृहे. वज्रसेनोऽपि चक्री पुष्कलपालाख्यं पुत्रं राज्ये न्यस्य स्वयं दीक्षां गृहीत्वा तीर्थंकरो मुनिर्जज्ञे. अन्यदा पुष्कलपालक्ष्मापालं शत्रुभिरावृतं श्रुत्वा वज्रजंघोऽस्य साहाय्यं कर्तुं समाययौ. तत्र शत्रून् विनिर्जित्य श्रीमत्या सहितो यावता स निजं पुरं व्रजति, तावता स्वभ्रातरौ केवलिनौ मुनिसत्तमौ मार्गे मिलितौ, तौ नमस्कृत्य वज्रजंघश्चिंतयति, अहो मम मंदभाग्यता! अहो मम मतिहीनता! यदहं पितुरुच्छिष्टां लक्ष्मीं प्राप्तवान्, एतौ मम सोदरौ तु चारित्रसाम्राज्यं प्रापतुः. अतोऽधुनैव स्वपुरं गत्वा स्वसूनवे च राज्यं दत्वा चारित्राशनिनाहं कर्मद्रुमं भस्मीकरोमि. इति चिंतयित्वा स लोहार्गलपुरं गतः, प्रातः सूनवे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राज्यं दास्यामीति कृत्वा स रात्रौ श्रीमत्या समं सुप्तः. अज्ञातपरमार्थेन पुत्रेण राज्यलुब्धेन विषधू- मयोगेन घातितौ तौ मातापितरौ, इति षष्ठो भवः. सप्तमभवे वज्रजंघजीवस्तया श्रीमत्या दयितया सममुत्तरकुरुष्वेव युगलधर्मेणोत्पन्नस्त्रिपल्यायुः. मृत्वा चाष्टमे भवे सौधर्मे कल्पे सुखैः प्रीणितौ तौ सुरौ जातौ. उक्तोऽष्टमो भवः. अथ नवमभवे जंबूद्वीपे महाविदेहे क्षितिप्रतिष्ठिते पुरे स सुविधे- वैद्यस्य सूनुर्जज्ञे. सत्कर्मकर्मठो जीवानंद इति नाम्ना स वैद्यकर्मविशारदोऽभूत्. तत्रैव नगरे ईशा- नचंद्रस्य राज्ञः कांतया कनकवत्या जातो महीधरनामा पुत्रोऽस्ति. १. तत्रैव नगरे सुनाशीरस्य मं- त्रिणो लक्ष्म्यां कांतायां जातः सुबुद्धिनामा पुत्रोऽस्ति. २. तत्रैव नगरे धनश्रेष्ठिनः शीलवत्यां प्रि- यायां जातो गुणरत्नाकरो गुणाकरनामा पुत्रोऽस्ति. ३. तत्रैव नगरे सागरदत्तस्य सार्थपतेरभयम- त्यां पत्न्यां जातः पूर्णभद्र इति नाम्ना पुत्रोऽस्ति. ४. श्रीमतीजीवः सौधर्मकल्पतश्च्युत्वा तत्रैव नग- रे ईश्वरदत्तस्य श्रेष्ठिनः केशवनामा पुत्रो बभूव. ५. एषां पंचानां समानगुणशालिनां जीवानंदेन वैद्येन समं मैत्र्यमभूत. अमीषां पंचानामेकीभूतानां वैद्यवेश्मनि स्थितानां माधुकरीं भिक्षां कुर्वन् साधुर्दृष्टिपथं ययौ. अकालान्नपानैः कुष्ठाभिभूतसर्वांगं तं मुनिं दृष्ट्वा राजपुत्रो महीधरकुमारो जी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वानंदं वैद्यं धिगिति निंदन्नेवमवोचत्, किं ते शास्त्रकौशलं? किं ते ज्ञातृत्वं? यत्त्वमीदृशानां शरीरेऽपि निस्पृहानां साधूनां कुष्टाभिभूतानां नोपकारं करोषि? अथ साधूनामुपकारकरणेनैव जन्मार्जितं पापमलक्षालनाय. जीवानंदो जगाद भो राजेंद्रनंदन! त्वया युक्तमुक्तं, परं दीनारलक्षलक्षेणैकैकं वस्तु लभ्यते, तेषु लक्षपाकाख्यं तैलं मद्गृहे वर्तते, गोशीर्षचंदनं रत्नकंबलं च विलोक्यते.

तत श्रुत्वा ते पंचापि मित्राणि कंचिन्महेभ्यमभ्येत्य गोशीर्षचंदनं रत्नकंबलं च मूल्येन ययाचिरे, यथा भो श्रेष्ठिन् दीनारलक्षाभ्यां गोशीर्षकंबलौ देहि? श्रेष्ठिनोक्तं किमर्थं? तैरुक्तं मुनेर्वैयावृत्त्यर्थं. तत् श्रुत्वा मुदितमानसः श्रेष्ठी मूल्यं विनैव कंबलचंदने तेषां कुमाराणामर्पयामास. ततस्ते कुमाराः शुभशकुनैः प्रेरिता जीवानंदेन सहिता मुनेरनुपदं ययुः. बाह्योद्याने न्यग्रोधतरोरधः कायोत्सर्गस्थं तं मुनिं ते प्रणमंतिस्म. वैद्यपुत्रश्च तस्य मुनेर्वैयावृत्यं करोति यथा—ततो मुनिमनुज्ञाप्य ! तैलेनाभ्यंग्य वैद्यसूः ॥ विलिप्तचंदनं देहे । क्षिप्तवान् रत्नकंबलं ॥ १ ॥ तैलतापेन ते नाथ । व्याकुलास्तत्कलेवरात ॥ निःसृत्य शीतले लीनाः । कृमयो रत्नकंबले ॥ २ ॥ अथ गोशव-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मानीय । तस्योपरि दयापरः ॥ कंबलात्पातयामास । कृमीन् वैद्यः कृती स्वयं ॥ ३ ॥ गोशीर्षचंदनस्पंदै—रिंदुनिस्पंदसुंदरैः ॥ शमिनः शमयामास । संतापव्यापदं मुदा ॥ ४ ॥ त्रीन् वारानेवं कृत्वा सर्वान् कृमीन् त्वग्मांसास्थिगतान् पातयामास. केश्चिद्दिनैः स शमिस्वामी चामीकरच्छविर्जातः, तैः क्षमितश्च स पुनर्नववपुर्विहाराय ययौ. स कंबलचंदनदायी वणिग् तद्दानवैनवादंतकृत्केवलिजावं तस्मिन्नेव जवेऽजजत्. तेऽपि कंबलगोशीर्षशेषं विक्रीय तल्लब्धकांचनलक्षद्वयेन जिनप्रासादं कारयामासुः. कियता कालेन व्रतं लात्वा ते षडपि पूर्णायुषो मृत्वा दशमजवेऽच्युते कल्पे द्वाविंशतिसागरायुषस्त्रिदशश्रियं शिश्रियुः.

एकादशे जवे ते षमप्यच्युताच्च्युताः, जंबूद्वीपे प्राग्विदेहे लवणवारिधेस्तटे पुष्कलावतीविजये पुंमरीकिण्यां नगर्यां वज्रसेनस्य राज्ञो धारिण्यां सहचारिण्यां पुत्रो जीवानंदजिषग्जीवश्चतुर्दशमहास्वप्नसूचितो वज्रनाजाजिधो जज्ञे. तस्य वज्रनाजस्य चक्रिणः पूर्वसहचरास्ते चत्वारोऽपि नृपामात्यश्रेष्ठिसार्थेशपुत्राः क्रमेण बाहुसुबाहुपीठमहापीठाख्याश्चत्वारोऽपि बांधवाः संजज्ञिरे. केशवजीवोऽपि सुयशोनामा राजपुत्रक आसीत्. प्राग्जवस्नेहतः सोऽपि वज्रनाजमशिश्रियत्. एवं ते षमपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मित्राण्येकीभूतानि सुखमनुबभूविरे. एकस्मिन् दिने लोकांतिकैर्विज्ञप्तो वज्रसेनो राट् सांवत्सरिकं दानं दत्वा वज्रनाभाभिधे पुत्रे राज्यं न्यस्य चारित्रं प्रतिपद्य मनःपर्यायज्ञानमासदत्. ततो वज्रसेनजिनस्य केवलं वज्रनाभस्य च चक्रं सममेवोदपद्यत. वज्रसेनस्य देवेंद्रैः केवलमहिमा चक्रे, चक्रस्याष्टाह्निकोत्सवं वज्रनाभश्चक्रे. ततोऽसौ देशसाधनाय विनिर्गतः पुष्कलावतीविजयं विजित्य प्राप्तचक्रिपदो वज्रनाभश्चक्री धर्मकर्माणि निर्ममे. अन्यदा जातवैराग्यो नृपः सुते राज्यं न्यस्य चतुर्भिर्बंधुभिः सह सुयशाराजपुत्रेण च सह दीक्षां जगृहे. वज्रसेनजिनो भवोपग्राहिकर्माणि क्षिप्त्वा मोक्षं गतः. द्वादशांगधरोऽनेकलब्धिमान् वज्रनाभमुनिराचार्यपदे स्थापितश्च. एकादशांगधराः पंचापि ते गुरुणा सार्धं विहरंतिस्म. अथ वज्रनाभमुनिरर्हद्भक्तिप्रभृतिविंशतिस्थानकैराराधितैस्तीर्थकृत्कर्म निर्ममे. बाहुः साधुः पंचशतसाधूनामशनपानादिदानेन चक्रिपदं संदधे. सुबाहुसाधुस्तु वैयावृत्त्यपरो बाहुबलं समुपार्जयत्. वज्रनाभमुनींद्रस्तयोः प्रशंसां चक्रे, पीठमहापीठावीर्ष्यावंतौ मायामिथ्यात्वयोगतः स्त्रीभावफलमुपार्जयतां, क्रमात्ते षडपि पूर्वलक्षान् दीक्षां पालयित्वा मृत्वा च द्वादशभवे सर्वार्थसिद्धिसौख्यं त्रयस्त्रिंशत्सागराण्यनुभवंतिस्म. इति पूर्वभवाः ॥ १२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ त्रयोदशभवे श्रीवज्रनाभस्य जीवस्त्रयस्त्रिंशत्सागराण्यायुर्भुक्त्वा सर्वार्थसिद्धितश्च्युत्वा कृष्णाषाढचतुर्थेऽह्नि उत्तराषाढास्थिते चंद्रे श्रीनाभिकुलकरपत्न्याः श्रीमरुदेवायाः कुक्षाववातरत्, प्रभोस्तत्रावतारे भुवनत्रयं क्षणं ध्वस्तध्वांतमभूत्, तदानीं मरुदेवेमान् चतुर्दश स्वप्नानवालोकयत, यथा—वृषेभसिंहश्रीदाम—चंद्रादित्यान् ध्वजं घटं ॥ सरोवार्धिविमानानि । रत्नौघज्वलितानलौ ॥ ॥ १ ॥ इमान् चतुर्दश महास्वप्नान् दृष्ट्वा जागरिता सा समागत्य श्रीनाभेरचीकथत, सोऽप्युवाच ते सुतो महान् कुलकरो भावी, ततोऽप्यासनकंपेन समागतो शक्रो मरुदेव्याः पुरतः स्वप्नार्थं जगौ, तथान्येऽपि सुरेश्वरा मरुदेवीं नमस्कृत्यामंदानंदमेदुरा निजं निजं स्थानं जग्मुः. तद्दिनादारभ्य रत्नगर्भा निधानमिव मरुदेवी गर्भं बभार. क्रमेण परिपूर्णेषु दिनेषु श्यामे चैत्राष्टमीदिने उत्तराषाढास्थिते चंद्रे शुभलग्ने वहमाने मरुदेवी युगलधर्मिणं सुतरत्नमसूत, तदा सुखवातैर्वातं, नारकैर्मुदितं, जगतत्रये तेजोऽभूत, तथा दिवि दुंदुभयो नेदुः. कंपितासनाः षट्पंचाशद्दिक्कुमार्यः समभ्येत्य विधिवत्सूतिकर्माणि चक्रिरे, तथैव कंपितासनाश्चतुःषष्टिसुरेशाः समागताः, तैरपि विधिपुरस्सरं जिनं मेरुमस्तके नीत्वा जन्माभिषेकश्चक्रे. अथ शक्रो वृषभरूपेण स्नपनं विधायारात्रिकं मं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गलप्रदीपं कृत्वा तं समानीय मातृसमीपे मुक्त्वा स्वर्णरत्नवृष्टिं विधाय बाढस्वरेणैवमवोचत्, यथा–
जिनस्य जिनमातुर्वा । योऽवद्यं चिंतयिष्यति ॥ तन्मूर्धा शतधा भावी—त्युच्चैर्गीरमुदीर्य सः ॥१॥
धातृकर्मप्रपंचाय । तत्पंचाप्सरसो हरिः ॥ आदिदेश सदेशस्थाः । शश्वद्विश्वत्रयीगुरोः ॥ २ ॥

एवं सर्वे सुरेश्वराः श्रीजिनस्य महिमानं विधाय नंदीश्वरेऽष्टाह्निकां कृत्वा स्वस्थानमगुः, पूर्वं स्वप्ने ऋषभदर्शनादूरुस्थऋषभचिह्नत्वाच्च पितरौ प्रभोः ऋषभ इत्याख्यां चक्रतुः, तद्युग्मजन्मजाताया धन्यकन्यायाः सुमंगलेति नाम चक्रतुः, स्वामिनो जन्मतो वत्सरे संपूर्णे जाते सौधर्मेंद्रः सेक्षुयष्टिः पुरो भूत्वा स्वामिंस्तव रोचते? इत्युक्त्वेक्ष्वाकुवंशं कृत्वेंद्रः स्वस्थानमगमत्. ततःप्रभृति विभुर्वर्धमानो दिव्यैरुत्तरकुरूद्भवैः फलैरप्रीयत. एवं क्रमेण वर्धितः पंचशतधनुर्देहमानो देवदेवीगणपरीवृतो युवतीजननयनमनोहारियौवनं प्राप, एकस्मिन् दिने कश्चिन्मिथुनकस्तालफलेन हतो मृतः, तद्युग्मजाता बालिकान्ययुगलैर्नाभयेर्पिता, सा सुनंदेति नाम दत्वा पुत्रीवत्पालिता. प्रभुरवधिज्ञानेन त्र्यशीतिपूर्वलक्षाणि यावद्भोगफलोदयं ज्ञात्वा शक्रकृतोत्सवो रतिप्रीतिनिभे सुमंगलासुनंदे पर्यणैषीत.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऋषभदेवस्ताभ्यां सार्धं किंचिदूनषट्पूर्वलक्षाणि सुखान्यनुभवतिस्म. सर्वार्थसिद्धितश्च्युतौ बाहुपीठयोर्जीवौ सुमंगला गर्भेऽधात्. तथा—सुनंदापि कृतानंदा । तदानीमुदरे दधौ ॥ तौ सुबाहुमहापीठौ । तत एव दिवश्च्युतौ ॥ १ ॥ परं सुमंगलादेवी चतुर्दशस्वप्नांश्चक्रभृज्जन्मसूचकान् दृष्ट्वा जागरिता. शुभे दिवसे च युग्मजातयोस्तयोरभिधाने इत्यभूतां, सुतो भरतनामेति. सुता च ब्राह्मीनाम्नीति. सुनंदा बाहुबलिनं सुंदरीं चाजीजनत्, पुनरेकोनपंचाशत्पुत्रयुग्मानि सुमंगलासूत. एवं सुखान्यनुभवतः स्वामिनो विंशतिपूर्वलक्षाणि जग्मुः. कलिकदर्थितैर्लोकैर्विज्ञप्तो नाभिराट्, तदा राज्यदानाय ऋषभं तैः सार्धं स प्रेषयामास. तेऽपि स्वामिनमेकत्र संस्थाप्य जलार्थं गताः, तदानीमेवासनकंपेन शक्रः समागात्, तत्र महांतमेकं मंडपं सिंहासनयुक्तं कृत्वा तत्र स्वामिनं निधाय देवैः परिवृतः शक्रस्तीर्थोदकै राज्याभिषेकं चक्रे. तत्र देवदूष्यवस्त्रैरावृतश्चंदनादिभिर्विलिप्तः कुसुमाभरणादिभिः पूजितः स्वामी पालके विमाने देवराज इव राजते. युग्मान्यपि पद्मपात्रैः पानीयमानीय सर्वत्र भूषितं प्रभुं दृष्ट्वा तत्पादयोर्जलं चिक्षिपुः. ततः शक्रस्तानि विनीतानि ज्ञात्वा तत्र विनीताख्यां नगरीं धनदेनाचीकरत. अथ स्निग्धरुक्षकाले तरुषु स्वयमग्निरुत्पन्नः. अथ स्वामी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लेख्यादिका द्विसप्ततिकलाश्चतुःषष्टिमहिलागुणान् शिल्पशतं च प्रजाहितायोपदिशति. एवं त्रिषष्टिलक्षपूर्वाणि विभो राज्यं कुर्वाणस्य व्यतीतानि. अथ स्वामिनं वैराग्यवासनावासितमानसं ज्ञात्वा लोकांतिकदेवा इति विज्ञपयामासुः. हे नाथ! यथा प्रथमं राज्यं प्रवर्तितं तथा प्रथमं धर्मतीर्थं प्रवर्तय? तत् श्रुत्वा श्रीऋषभो भरतं समाकार्य कथयामास, हे वत्स! राज्यं गृहाण? वयं संयमं गृहीष्यामः. भरतोऽवोचत्—

पित्रोः पुरो निषण्णस्य । या शोभा जायते सुते ॥ उच्चैः सिंहासनस्थस्य । शतांशेनापि सा कुतः ॥ १ ॥ इत्याद्युक्तवंतमपि भरतं संबोध्य स राज्येऽस्थापयत्. बहलीराज्ये बाहुबलिनं संस्थाप्यान्येषां पुत्राणां च राज्यानि दत्वा सांवत्सरिकदानं चापि दत्वा सुदर्शनां शिबिकामारूढो देवसंघपरिवृतो भरतादिभिश्च परिवृतः प्रभुः सिद्धार्थवनमागमत. शिबिकातः समुत्तीर्य कंकेल्लिपादपाधोभागे विभुरलंकारानत्यजत्. ततो विभुश्चतुर्मुष्ट्या केशानुच्चखान. पंचम्या मुष्टिकया यावल्लोचं करोति तावद्वातैर्वातं, सा मुष्टिर्द्विधाभूय द्वयोरंसयोरुपरि भूयसा वेणीव शुशुभे. संसाराब्धिं तरीतुमेषांसे विलग्ना शैवललतेव शोभते. पुनः कथं? यथा—तपोध्यानाग्निना प्रज्वालितानि यानि कर्मेंधनानि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेभ्यः कर्णाभ्यां विनिर्गता धूमरेखेव रेजे. तस्मिन्न समये शक्रः स्वामिस्कंधे देवदूष्यं न्यवेशयत. ' करेमि सामाईयमिति ' कृत्वा चतुःसहस्रसंख्यैर्नृपैर्युतः सिद्धनमस्कारं कृत्वा कृताष्टमतपाश्चैत्रस्या· माष्टम्यां पश्चिमे यामे उत्तराषाढास्थे चंद्रे व्रतमुपाददे. व्रतग्रहणानंतरं वर्षांते श्रेयांसगृहे ईक्षुरसे· न वैशाखशुक्लतृतीयायां प्रभोः पारणकमभूत. तत्र पंच दिव्यानि संजातानि. ततः प्रभृति साक्षयतृ· तीयेति पर्वत्वेन विश्रुता जाता. नृपांगजः श्रेयांसः श्रेयस्कृते तत्र प्रभोः पादयुतं रत्नपीठं चकार. एवमार्यानार्यदेशेषु विहरमाणो भगवानयोध्यामहापुर्यासन्नशाखापुरे पुरिमतालाख्ये समागात. दी· क्षादिनादारभ्य वर्षसहस्रांते फाल्गुने मासि कृष्णैकादश्यां तिथौ उत्तराषाढास्थे सितदीधितौ शुक्ल· ध्यानधनो जिनः केवलज्ञानमवाप. ततश्चासनकंपेन चतुःषष्टिसुरेशैः कृते समवसरणे रत्नचीकरर· जतकृतप्रवरप्राकारे वरे सिंहासने स्थितो भगवान् सुरासुरमनुजपर्षदि यावच्चतुर्धा धर्ममाचष्टे, तावत् केवलज्ञानवर्धापनिकया वर्धितो भरतश्चक्रोत्पत्तिवर्धापनिकयापि वर्धितः. ततः पूर्वं चक्रोत्पत्तिमहो· त्सवं तातज्ञानोत्पत्तिमहोत्सवं वा करोमीति संशयानंतरमिहपरलोकहितत्वात्पूर्वं तातः पूज्य इति कृ· त्वा भरतो मातरं मरुदेवीं प्रत्यागत्य विज्ञपयति. हे स्वामिनि! आगच्छ? तव सुतर्द्धिं दर्शयामीति.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततः स्वामिन्यपि पौत्रेण सह गजारूढा तत्र गता. स्वामिनः समवसरणादिश्रियं दृष्ट्वाऽनित्यभावनया केवलं लब्ध्वा क्षपकश्रेणिमारूढा सा मोक्षमगमत्. तच्छरीरं च त्रिदशैः सत्कृत्य क्षीरनीरधौ निदधे. तद्दिनादारभ्य लोके मृतकपूजनं प्रवृत्तं. समवसरणे समागतो भरतः स्वामिनो देशनां शृणोतिस्म, यथा—

दानं सुपात्रे विशदं च शीलं । तपो विचित्रं शुभभावना च ॥ भवार्णवोत्तारणयानपात्रं । धर्मं चतुर्धा मुनयो वदंति ॥ १ ॥ तवसंजमेण मुक्खो । दाणेण य हुंति उत्तमा भोगा ॥ देवच्चणेण रज्जं । अणसणमरणेण इंदत्तं ॥ २ ॥ इत्यादि साधुधर्मं श्राद्धधर्मं चोपदिश्य स्वामिना गणधरस्थापना संघस्थापना च कृता. तत ऋषभजिनो भव्यान् प्रतिबोधयन् दीक्षाकालादारभ्य पूर्वलक्षं यावत्पृथिव्यां विहृत्य स्वस्य निर्वाणसमयं ज्ञात्वाष्टापदं गिरिं ययौ. तत्र स जिनः साधूनां दशभिः सहस्रैः सह पादपोपगममनशनं प्रत्यपद्यत. ततो माघकृष्णत्रयोदश्यां पूर्वाह्ने अभीचिस्थे चंद्रे प्रक्षीणकर्मा भगवान् परित्यक्ततनुत्रिकः सिद्धानंतचतुष्क एकेन समयेन मुक्तिमगमत्. स्वामिना सार्धं दश सहस्राणि साधूनां मुक्तिं ययुः. प्रथममयमुदारां प्राप्य सम्यक्त्वलक्ष्मीं । तदनु मनुजवर्गस्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्गसाम्राज्यलक्ष्मीं ॥ अथ निरुपमसम्यग्ज्ञानचारित्रलक्ष्मीं । त्रिभुवनपतिराप श्रेयसीं शर्मलक्ष्मीं ॥१॥ एतेन श्रीऋषभदेवचरित्रदिग्मात्रकीर्तनेन ' धणसह्रवाहजम्मे ' इति प्रपंचितं. इति श्रीऋषभनाथ· चरित्रं समाप्तमिति. अथाभयदानं दर्शयन् तदृष्टांतमाह—

॥ मूलम् ॥—करुणाइ दिन्नदाणो । जम्मंतरगहियपुण्णकिरिआणो ॥ तिहयरचक्किरिद्धिं । संपत्तो संतिनाहोवि ॥ ६ ॥ व्याख्या—' करुणाइत्ति ' करुणया पारापताय ' दिन्नं ' दत्तं दानं जीवितदानं येन स तथा, अत एव ' जम्मंतरेत्ति ' जन्मांतरे, एकस्माज्जन्मनोऽन्यज्जन्मांतरं त· स्मिन् जन्मांतरे पूर्वभव इत्यर्थः. गृहीतमंगीकृतं ' पुण्णकिरिआणोत्ति ' पुण्यमेव क्रयाणकं येन स तथा. तेन कारणेन ' तिहयरत्ति ' षोडशतीर्थंकरः पंचमचक्री च तयोः ऋद्धिं लक्ष्मीं ' संपत्तोत्ति ' संप्राप्तः शांतिनाथोऽपि. इदं पूर्वभवसंचिताभयदानफलमिति गाथाक्षरार्थः ॥ ६ ॥ विस्तरार्थस्तु क· थानकादवसेयः, तत्कथानकं च द्वादशभवाख्यानपूर्वकं कथ्यते यथा—श्रीषेणो नृपतिः १ कुरौ मिथुनकः २ सौधर्मकल्पे सुरो ३ । वैताढ्येऽमिततेजखेचरपति ४ र्देवोत्तमः प्राणते ५ ॥ रामः श्री· अपराजितो ६ ऽच्युतपति ७ र्वज्रायुधो ८ निर्जरो । ग्रैवेये ९ नृपति १० स्त्वनुत्तरसुरः ११ शांतिः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१२ सतां शांतये ॥ १ ॥ तत्राद्यभवः कथ्यते यथा—इहैव जंबूद्वीपे भरतक्षेत्रे रत्नपुरं नाम पत्तनमस्ति. तस्मिन् पत्तने न्यायधर्मैकनिपुणः श्रीषेणनामा नृपतिरभूत्. तस्य वामांगहारिण्यौ शीलालंकारधारिण्यौ द्वे भार्ये स्तः, एकाऽभिनंदिता १ द्वितीया शिखिनंदिता च २. तयोर्मध्ये आद्या प्रेयसी ऋतुस्नानानंतरं सुखशय्यायां सुप्ता समधातुशरीरा सती यामिन्यां द्विप्रहरे स्वप्नमध्ये निजोत्संगसंगिनौ मयूखशालिनौ सूर्यचंद्रमसौ ददर्श. तद्दर्शनेन राज्ञी हर्षप्रकर्षं दधौ. ततस्तया तन्निवेद्य तोषितो राजा तत्फलं कथयति, हे देवि! कुलोद्योतकरौ तव प्रवरौ पुत्रौ भविष्यत इति. तद्दिनादारभ्य सा गर्भद्वयं दधती नितरां शुशुभे. ततः संपूर्णसमये तया पुत्रद्वयं सुषुवे. दशाहिकामतिक्रम्य तयोरिंदुषेण १ बिंदुषेणश्चेति नाम विनिर्ममे. तौ द्वावपि स्वजनैर्लाल्यमानौ क्रमेणाष्टवार्षिकौ जातौ. कलाचार्यसमीपे मुक्तौ पाठितौ क्रमेण यौवनं प्राप्तौ.

अन्येद्युः श्रीविमलबोधसूरयः पृथिव्यां विहरंतस्तत्र समागता निरवद्यस्थाने च स्थिताः. ततः सूरीणामागमनं निशम्य तद्वंदनार्थं श्रीषेणनृपतिः सपरिच्छदो ययौ. तत्र गत्वा सूरीन्नत्वा यथोचितस्थाने समुपविष्टो नृपो देशनां शृणोतिस्म. तं नृपं चोद्दिश्य सूरिभिर्धर्मदेशना प्रारेभे, यथा—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जिनेंद्रपूजा गुरुपर्युपास्तिः । सत्वानुकंपा शुभपात्रदानं ॥ गुणानुरागः श्रुतिरागमस्य । नृजन्मवृक्षस्य फलान्यमूनि ॥ १ ॥ या देवे देवताबुद्धि—र्गुरौ च गुरुतामतिः ॥ धर्मे च धर्मधीः श्रद्धा । सम्यक्त्वमिदमुच्यते ॥ २ ॥ सम्यक्त्वरत्नान्न परं हि रत्नं । सम्यक्त्वमित्रान्न परं हि मित्रं ॥ सम्यक्त्वबंधोर्न परो हि बंधुः । सम्यक्त्वलाभान्न परो हि लाभः ॥ ३ ॥ जन्मदुःखं जरादुःखं । मृत्युदुःखं पुनः पुनः ॥ संसारसागरे दुःखं । तस्माज्जागृत जागृत ॥ ४ ॥ इत्यादिधर्मं श्रुत्वा गुर्वंतिके सम्यक्त्वं लात्वा स गृहे गतः. सूरयोऽप्यन्यत्र विहरंतिस्म. श्रीषेणो नृपतिस्तद्दिनादारभ्य राज्यं सम्यक्त्वं च पालयामास.

इतश्चान्यदा कौशांबीस्वामिना बलनृपेन श्रीमतीराज्ञीकुक्षिसंभूता श्रीकांताभिधा पुत्री श्रीषेणसुतस्येंदुषेणस्यार्थं स्वयंवरा प्रेषिता. तदा तां रूपवतीं बालां वीक्ष्य द्वावपि राजसुतौ परिणेतुकामौ देवरमणोद्याने परस्परं गाढं सन्नह्य युयुधाते. यतः—विकलयति कलाकुशलं । हसति शुचिं पंडितं विडंबयति ॥ अधरयति धीरपुरुषं । क्षणेन मकरध्वजो देवः ॥ १ ॥ बहुभिर्निवारितावपि तौ न विरतौ. ईदृशे समये स श्रीषेणनृपः स्वल्पकषायः स्वच्छमानसः श्रीजिनभक्तिभावितस्तौ द्वावपि पु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रौ शत्रू इव वैरायमाणौ निरीक्ष्य निवारयितुमसमर्थः सन्नेवं चिंतयति, अहो विषयलांपट्यं! अहो कर्मणां वैचित्र्यं! एतौ द्वावपि महाप्राज्ञौ मम नंदनौ भूत्वा एककामिनीकृते कलिं कुरुतः. अहमनयोर्दुश्चरित्रेण लज्जमानः सभासदां मुखं कथं दर्शयिष्यामीति विचिंत्य स्वाभिप्रायं पत्न्यग्रे कथयित्वा पंचपरमेष्ठिनमस्कारं स्मरन् विषमिश्रकमलाघ्राणतो विषप्रयोगेण विपन्नः, एवं पत्न्यपि विपन्ना. इतश्च कोऽपि चारणर्षिः समागत्य तयोरित्थमवादीत्. भो कुमारौ! युवयोश्चरित्रं दृष्ट्वा मातापितरौ विषप्रयोगेण मृतौ, युवां किं न लज्जेथे? इति तद्वचसा तौ प्रतिबुद्धौ त्यक्तयुद्धौ जातौ. ततस्तौ चारणर्षिं नत्वा तां कन्यां च विसृज्य पित्रादीनां प्रेतकार्यं कृत्वा गोत्रिणे राज्यं दत्वा धर्मरुचिमुनिपार्श्वे नृणां सहस्रचतुष्टयेन सार्धं व्रतं जगृहतुः. ततस्तावुभावपि विविधं तपः कृत्वा केवलज्ञानं प्राप्य मुक्तिपदं प्रापतुः. गतः प्रथमो भवः.

अथ द्वितीयभवे जंबूद्वीपमध्यवर्तिन्युत्तरकुरुक्षेत्रे श्रीषेणप्रथमप्रियाभिनंदिताजीवौ युगलत्वेनोत्पन्नौ. त्रिपल्यायुः प्रपाल्य ततश्च्युत्वा तृतीयभवे तन्मिथुनद्वयं सौधर्मकल्पे पल्यत्रितयायुरासीत्. उक्तस्तृतीयो भवः. इतश्चतुर्थे भवे श्रीषेणजीवः सौधर्मकल्पतश्च्युत्वार्ककीर्तिविद्याधरनृपगृहे ज्यो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिर्मालाराज्ञीकुक्षिसरोवरे राजहंस इवावतीर्णः, तदा मात्रा बहुतेजसा व्याप्तो रविः स्वप्ने दृष्टः, ततः समये पुत्रजन्म बभूव, ततो महोत्सवपुरस्सरं तस्य पुत्रस्य पित्रा अमिततेजा इति नाम दत्तं, क्रमेण स वर्धतेस्म. इतश्चाग्निनंदिताजीवः सौधर्मकल्पादुध्धृत्य त्रिपृष्टवासुदेवगेहिन्याः स्वयंप्रभायाः कुक्षौ पुत्रत्वेनावतीर्णः, तदा स्वयंप्रभा स्वप्नमध्ये लक्ष्मीदेव्या अभिषेकं ददर्श, तेन तस्यांगजन्मनः श्रीविजय इति नाम दत्तं, सोऽपि क्रमेण वर्धितः कलापारीणो जातो बह्वीः कन्यकाः परिणायितः, क्रमेण त्रिपृष्टवासुदेवे परलोकं प्राप्ते सत्येकदा तत्र पोतनपुरे श्रीश्रेयांसजिनशिष्याः श्रीसुवर्णकलशाख्याः सूरयः परिवारसमन्विताः समायाताः, तदानीं तान् श्रुत्वा पुरोद्याने बलदेवोऽचलनामा प्रणमनार्थं गतः, तत्र गत्वा चाचार्यान्नत्वा मोहनिवारिणीं वाणीं सुश्राव, यथा—संसारे नहि सुहं । जम्मजरामरणरोगसोगेहिं ॥ तहवि हु मिच्छंधजिया । न कुणंति जिणवरं धम्मं ॥ १ ॥ तिव्वयरा गणहारि—सुरवइणो चक्किकेसवा रामा ॥ अवहरिया हयविहिणा । अवरजीवाण का वत्ता ॥ २ ॥ ततः प्रस्तावं दृष्ट्वा तेनेति पृष्टं, हे भगवन्! मम कनिष्ठो गुणज्येष्ठः पुत्रः कां गतिं गतः? इति पृष्टे सूरय ऊचुः, स त्वज्ञाता पंचेंद्रियादिजीववधे रतः कठोरात्मा महारंभतत्परो मृत्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सप्तमनरकं ययौ, तद्वचः श्रुत्वा स्नेहव्याकुलोऽचलः सुतरां विललाप, हा विश्ववीर! हा धीर! तवेदृशी का गतिर्बभूव? तदा गुरुभिरुक्तं, पूर्वं त्वं जिनोदितं वाक्यं शृणु? अस्य जीवश्चरमजिनेश्वरो भविष्यतीत्युक्ते सोऽप्यचलाभिधः श्रीविजयं त्रिपृष्ठपुत्रं राज्ये निवेश्य तथापरं सुतं यौवराज्ये निवेश्य तेषां गुरूणां पार्श्वे दीक्षामग्रहीत्. इतश्चामिततेजो विद्याधरेंद्रः केवलिनं पप्रछ, प्रभो! भव्योऽहमभव्यो वा? इति प्रश्ने कृते केवल्याह हे राजन्! इतो भवान्नवमे भवेऽत्रैव भरते त्वं पंचमश्चक्रवर्ती षोडशस्तीर्थकृच्च भविष्यसि, तथाऽसौ श्रीविजयस्त्रिपृष्ठपुत्रः पोतनेश्वरस्तव पुत्रो भूत्वा तवैवाद्यो गणधरो भविता, इति श्रुत्वा तस्यैव केवलिनः पार्श्वे ताभ्यां सम्यक्त्वमूलः श्राद्धधर्म उपाददे. अथ श्रीकेवलिनं नत्वा तौ श्रीविजयामिततेजसौ स्वस्वपरिवारसमन्वितौ निजं निजं स्थानं प्रयातौ, देवपूजागुरुसेवाप्रभृतिप्रयोजनैश्च श्रावकव्रतं द्योतयंतौ कालं निन्यतुः.

एकदा तेन महात्मनामिततेजसा महीयान् पंचवर्णरत्नमयः प्रासादः कारितः, श्रीजिनानां प्रतिमाश्च तत्र स्थापिताः, तथा तत्समीपे तेन राज्ञा पौषधागारं कारितं, तस्मिन् स्थाने उपविष्टः सन् पौषधमध्ये विद्याधरसभांतरे धर्मकथां कथयति, यथा—अथिरेण थिरो समलेन । निम्मलो प-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खवसेण साहीणो ॥ देहेण जइ विढप्पइ । धम्मो ता किं न पज्जत्तं ॥ १ ॥ पिधानं दुर्गतिद्वारे । निधानं सर्वसंपदां ॥ विधानं मोक्षसौख्यानां । पुण्यैः सम्यक्त्वमाप्यते ॥ २ ॥ इत्यादिधर्मकथां यावता स कथयति तावता चारणश्रमणयुगलं शाश्वतजिनान्नंतुं गछत्तं तुंगं जिनालयं दृष्ट्वा तच्चैत्यवंदनहेतोस्तत्र समवतीर्णं, देवान्नत्वा च पौषधागारे समागतं. तदानीं राज्ञामिततेजसा तौ मुनिवरौ प्रवरासने उपावेश्य भक्तिपूर्वकं वंदितौ. तदा तत्रैकः साधुरित्याचख्यौ, हे राजन्! यदि त्वं धर्ममाख्यातुं स्वयमेव जानासि, तथाप्यस्माकं धर्मः समाख्यातुं युक्तः. ततोऽमिततेजसा प्रोक्तं, भगवन् धर्मं कथय? मुनिनोक्तं शृणु?—मानुष्यकादिसामग्रीं । लब्ध्वा ज्ञात्वा भवस्थितिं ॥ धर्मो निरंतरं कार्यो । निरंतरसुखार्थिभिः ॥ १ ॥ न पौरुषाभिमानोऽत्र । किंतु धर्माभिमानिता ॥ विनार्हंतं विना साधुं । प्रणमाम्यपरं न हि ॥ २ ॥ भो विद्याधरेंद्र! त्वयापि निरंतरं निःकलंकमेव धर्मः कार्यः. इत्युपदेशं श्रुत्वामिततेजा नृपो गुर्वाज्ञां शिरसि दधत्तयोर्मुनिप्रवरयोः पादौ ननाम, तदनंतरं तौ चारणश्रमणौ नभसोत्पत्यान्यत्र गतौ. ततः श्रीविजयामिततेजसौ भूचरखेचरस्वामिनौ धर्मकर्मतत्परौ कालं गमयतःस्म, तथा तौ द्वावपि पुण्यात्मानौ प्रतिवत्सरं यात्रात्रितयं विदधतुः, तन्मध्ये या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आद्यं शाश्वतं, यथा—चैत्रस्य शुक्लपक्षे एका शाश्वती, द्वितीया चाश्विनमासेऽष्टाह्निकाभिधा, तृतीया तु बलभद्रकेवलोत्पत्तिस्थाने सीमनगरे श्रीनाभेयजिनप्रासादे इति. अनेन विधिना बहूनि वर्षसहस्राणि तौ द्वावपि राज्यं कुर्वाणावेकदा मेरुगिरौ शाश्वतजिनान्नंतुं जग्मतुः, तत्र जिनान्नत्वा नंदनाख्ये वने उभौ विपुलमतिमहामतिनामानौ चारणश्रमणावुपविष्टावपश्यतां, तौ नत्वा तद्देशनां च श्रुत्वा तयोः समीपे इति पृष्टं, भो भगवंतौ! आवयोः कियदायुर्वर्तते? तत्कथ्यतां? इति पृष्टे साधुभ्यामुक्तं भो राजानौ! श्रूयतां? षड्विंशतिदिनानि युष्मदायुः शेषं विद्यते, इत्युक्ते तौ व्याकुलीभूतावेवमूचतुः, आवाभ्यां विषयलोलुपतयेयंतं व्रतं नादत्तं, हा हा सांप्रतं स्वल्पायुषौ संतौ किं करिष्यावः? एवं तौ शोचयंतौ दृष्ट्वा मुनिभ्यां प्रोक्तमद्यापि युवयोर्न किमपि विनष्टमस्ति, स्वर्गापवर्गदं संयमं गृहीत्वात्मकार्यं कुरुतां, इत्युक्ते तौ द्वावपि स्वं स्वं पुरं प्राप्तौ, ततस्तौ स्वे स्वे राज्ये स्वं स्वं पुत्रं निवेश्याभिनंदनमुनिसमीपे दीक्षां गृहीत्वा पादपोपगमानशनेन स्थितौ, तन्मध्ये श्रीविजयमुनिना दुःकरं तपः साधयता स्वजनकस्य त्रिपृष्ठवासुदेवस्य तेजः संस्मृत्य तदनंतरं तेनेदृशं निदानं कृतं—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनेन दुःकरतपःप्रभावेणाहमपि तेजसा पितृसमो भूयासमिति. न पुनरमिततेजसा निदानं कृतं, द्वावप्यायुःक्षये निधनं गतौ. उक्तस्तुर्यो भवः ॥ ४ ॥ अथ पंचमभवे तौ द्वावपि प्राणतकल्पे दशमदेवलोके विंशतिसागरोपमायुषौ देवौ जातौ. तत्रामिततेजसो जीवो नंदिकावर्तविमाने दिव्यचूलनामा सुरो जातः, श्रीविजयजीवस्तु स्वस्तिकावर्तविमाने मणिचूलनामा सुरः संजज्ञे. तत्र स्थितौ तौ द्वावपि सुरौ मनसैव दिव्यं विषयसुखं भुंजानौ नंदीश्वरादितीर्थेषु यात्रां कुर्वाणौ देवार्चनस्तोत्रादिधर्मकर्मतत्परौ स्वसम्यक्त्वरत्नं शुभभावेन नितरां निर्मलं चक्रतुः. उक्तः पंचमो भवः. ॥ ५ ॥ अथ षष्ठभवः—अस्मिन् जंबूद्वीपे पूर्वविदेहे मध्यस्थे रमणीयाख्ये विजये सुभगायां महापुर्यां गांभीर्यादिगुणोपेतः प्रौढप्रतापयुक्तः स्तिमितसागरनामा नृपोऽस्ति, तस्य राज्ञः शीलालंकृता प्रधानगुणोचितैका भार्या वसुंधरी, द्वितीया चानुद्धरीनाम्नी बभूव. अथ यो दिव्यचूलनामा अमिततेजसो जीवः स स्वायुःक्षये प्राणतकल्पाच्च्युत्वा राज्ञ्या वसुंधर्याः कुक्षौ सुतत्वेनावतीर्णः. तदा तया गज १ पद्मसर २ श्चंद्र ३ वृषभाख्या ४ श्चत्वारः स्वप्ना हलभृज्जन्मसूचका दृष्टाः. तत्प्रभावेण समये सा राज्ञी कनकवर्णशरीरं तनयं सुषुवे. तस्याभिधानं पित्रापराजित इति विहितं. तद-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नंतरं यो मणिचूलाख्यः सुरः श्रीविजयजीवः सोऽपि प्राणतकल्पतो निजमायुः प्रपूर्य तस्यैव राज्ञो यानुन्धरीनाम्नी द्वितीया पत्नी तस्याः कुक्षौ समुत्पन्नः. तदा तया गज १ सिंह २ वृषभ ३ लक्ष्मी ४ समुद्र ५ चंद्र ६ सूर्याख्याः ७ सप्त स्वप्ना मुखे प्रविशंतो दृष्टाः. प्रभाते सहर्षा सती स्वस्वामिने कथयामास. ततः स भर्ता तान् स्वप्नान् श्रुत्वा स्वप्नशास्त्रविदः समाकार्य स्वप्नविचारं पप्रछ, तदा तैरुक्तं हे राजन्नेतैस्तत्र वासुदेवः पुत्रो भविष्यतीत्युक्त्वा ते स्वप्नपाठका दत्तदानाः स्वस्थानमगुः. राजा राज्यं सुखेन पालयन्नस्ति. अथ संपूर्णसमये सानुन्धरी राज्ञी कृष्णकांतिं सुतं प्राजीजनत्, पित्रा तस्य पुत्रस्यानंतवीर्य इति नाम दत्तं, तौ द्वावपि पुत्रौ क्रमेण वर्धमानौ कलाभ्यासयोग्यौ जातौ, पित्रा तयोः कलाभ्यासः कारितः.

अन्यदा तत्पुरोद्याने विशिष्टज्ञानवान् स्वयंप्रभनामा मुनिरागत्य समवसृतः. इतश्च नृपतिस्तुरंगमवाहनं कृत्वा श्रांतः सन् विश्रामार्थं तस्मिन् नंदनवनोपमे वने समागत्य तत्र क्षणमेकं विश्रांतः, तदनंतरं राजाशोकतरोस्तले ध्यानवंतं तं मुनिं वीक्ष्य शुभभावेन त्रिःप्रदक्षिणीकृत्य विधिना वंदित्वा यथोचितस्थाने समुपाविशत्, मुनिस्तस्य धर्मदेशनां व्याकरोत, स राजा तां देशनां शुश्रा-

व, यथा—कर्तव्यं जिनवंदनं विधिपरैर्हर्षोल्लसन्मानसैः । सच्चारित्रविभूषिताः प्रतिदिनं सेव्याः सदा साधवः ॥ श्रोतव्यं च दिने दिने जिनवचो मिथ्यात्वनिर्नाशनं । दानादौ व्रतपालने च सततं कार्या रतिः श्रावकैः ॥ १ ॥ देवं श्रेणिकवत्प्रपूजय गुरुं वंदस्व गोविंदव—द्दानं शीलतपःप्रसंगसुभगां चान्यस्व सद्भावनां ॥ श्रेयांसश्च सुदर्शनश्च भगवानाद्यः स चक्री यथा । धर्म्ये कर्मणि कामदेववद्दहो चेतश्चिरं स्थापय ॥ २ ॥ इत्यादि स्वयंप्रभमुनिमुखाद्धर्मोपदेशं श्रुत्वा स्तिमितसागरो राजा प्रतिबुद्धोऽनंतवीर्यं नृपत्वे संस्थाप्यापरमपराजिताभिधं कुमारत्वे विन्यस्यास्य मुनेः पार्श्वे दीक्षामुपाददे. स राजा शीतकाले किंचिद्दीक्षां मनसा विराध्य मृत्वाधोभवने सुराधिपश्चमरेंद्रो जज्ञे. इतोऽपराजितानंतवीर्ययोः केनापि विद्याधरेण सह मैत्री जाता, तेन विद्याधरविद्याः शिक्षिताः, ततस्ताभ्यां विहायोगमनक्षमा विद्याः साधिताः. एवं तावुभावपि सिद्धविद्यौ जातौ, क्रमेण विद्याधिराजं त्रिखंडविजयिनं दमितारिं निहत्य रमणीयाख्यविजये त्रिखंडं साधयित्वा सुभगायां महापुर्यां राज्यं कुर्वाणौ स्तः, सोऽनंतवीर्यो विष्णुश्चतुरशीतिपूर्वलक्षाण्यायुः प्रपूर्य व्यपद्यत, ततो द्विचत्वारिंशद्वर्षसहस्रायुः स आदिमे श्वभ्रे निकाचितकर्मवशान्नारको जज्ञे. बलभद्रोऽपराजितो भ्रातृस्नेहमोहितो ध-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्मविदग्धेन नीतिनिपुणेन मंत्रिणा कथंचिद्बोधितः, किंचिद्गतशोको बभूव.

तत्र नगरे तस्मिन् समये यशोधरनामा गणभृत् समाययौ, उद्यानपालकैर्गुर्वागमनवर्धापनिकया वर्धापितोऽपराजितः षोडशभिः सहस्रैर्नृपानां परिवृतो वंदनार्थं जगाम, तत्र गणधरं नत्वा कृतांजलिपुटः पुरो निषण्णो देशनामशृणोद्यथा—शोकोऽभीष्टवियोगेन । जायते दारुणो जने ॥ स सद्भिः परिहर्तव्य—स्तत्स्वरूपमिदं यतः ॥ १ ॥ नामांतरः पिशाचोऽयं । पाप्मा रूपांतरस्तथा ॥ तारुण्यं तमसो ह्येष । विषस्यैष विशेषतः ॥ २ ॥ तस्मादिष्टवियोगाख्य—महद्रोगनिपीडितैः ॥ सुश्रुतोक्तक्रियायुक्तैः । कार्यं धर्मौषधं महत् ॥ ३ ॥ इंद्रजालसरिसं । विज्जुचमक्कारसच्छहं सव्वं ॥ सामन्नं खणदिट्ठं । खणनट्ठं कोत्थ पडिबंधो ॥ ४ ॥ इत्यादि मुनिनोक्तां देशनां श्रुत्वापराजितो बलभद्रो गतशोको जातः, ततः समुत्पन्नव्रतपरिणामो गृहमागत्य स्वनंदनं राज्ये संयुज्य स परिव्रज्यां समाददे, बहूनि वर्षाणि यावत्तपस्तप्त्वांतेऽनशनं कृत्वा विपद्य सप्तमे भवेऽच्युतकल्पे द्वाविंशतिसागरोपमायुस्त्रिदशेश्वरः संजज्ञे. अथानंतवीर्यो नरकादुध्धृत्य जंबूद्वीपे भरतक्षेत्रे वैताढ्ये दक्षिणश्रेण्यां गगनवल्लभे पुरे मेघवाहनस्य राज्ञो राज्ञी मेघमालिनी, तस्याः कुक्षौ पुत्रत्वेनोदपद्यत. क्रमेण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जातः पित्रा मेघनाद इति नाम दत्तं. यौवनस्थः पित्रा बह्वीः कन्यकाः परिणायितः. ततः स्वे राज्ये मेघवाहनपुत्रं संस्थाप्य स्वयं दीक्षां समादाय प्राणांते गृहीतानशनः स्वर्गं जगाम. अथ मेघनादो विद्याधराधिराजः श्रेणिद्वयस्वामी दशोत्तरं शतं देशान् साधयित्वा बहूनि वर्षाणि राज्यं करोतिस्म. अथैकस्मिन् दिने मेरुमस्तकं गत्वा स शाश्वतार्हतां यावता पूजां करोति, तावता कल्पनिवासिनः सेंद्रा देवाः सपरिवाराः समाययुः. तत्रासौ मेघनादोऽच्युतेंद्रेण दृष्टः, स्नेहात्संभाषितश्च. सोऽच्युतेंद्रस्तं तत्पूर्वभवादिकं कथयित्वा संयमधर्मे स्थिरं कृत्वा निजं स्थानं ययौ. मेघनादो विद्याधरेंद्रः स्वनंदने राज्यं निधायामरगुरोः पार्श्वे दीक्षामुपाददे. स उपात्तदीक्षो बहूनि वर्षाणि जगतीतले विहृत्य समाधिना चांते मृत्वाच्युतेश्वरोऽभूत्. अथाष्टमो भवः—

जंबूद्वीपमध्यगे पूर्वविदेहे मंगलावतीविजये सीतानदीतटे तीर्थंकरादिपुंरत्नसंचया रत्नसंचया नाम नगर्यस्ति. सा च शाश्वती सिद्धांतविख्याता देवनिर्मितेव विराजते. तस्यां नगर्यां दुर्नीतिवारकः प्रजायाः क्षेमकारकस्तीर्थंकरो क्षेमंकरो राजा जज्ञे. तस्य नृपते रत्नमालाभिधा प्रिया बभूव. असावपराजितजीवो द्वाविंशतिसागराण्यायुः परिपूर्याच्युतेंद्रपदाच्च्युत्वा रत्नमालाकुक्षाववातरत्. त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दानीं सा राज्ञी चक्रभृज्जन्मसूचकान् गजादिचतुर्दशस्वप्नानद्राक्षीत. तया प्रजातोत्थितया महीभर्तुस्ते कथिताः. राज्ञापि सा राज्ञी पुत्रजन्मकथनेनाह्लादिता. ततः सा राज्ञी संपूर्णसमये सुतरत्नमजीजनत्. सुतजन्मवर्धापनिकया वर्धापितो राजा तेषां बहूनि दानान्यदापयत. माता पंचदशे स्वप्ने वज्रायुधं ददर्श तेन पित्रा पुत्रस्य वज्रायुध इत्यभिधानं निर्ममे. पंचभिर्धात्रीभिर्लाल्यमानो वज्रायुधः क्रमेणाष्टवर्षीयो जातः. ततः क्षेमंकरेण राज्ञा कलाचार्यसन्निधौ तस्य सकलकलाभ्यासः कारितः. क्रमेण संप्राप्तयौवनोऽसौ वरां कन्यां लक्ष्मीवतीं परिणायितः. तया सह भोगान् भुंजानस्य तस्य कालो याति. अनंतवीर्यजीवोऽच्युतकल्पतश्च्युत्वा वज्रायुधलक्ष्मीवत्योः सुतोऽभवत सहस्रायुधनामा. एवमस्मिन् भवे तौ द्वावपि पितापुत्रौ जातौ. सहस्रायुधोऽपि संप्राप्तयौवनस्तातेन नृपसुतां सुरूपां कनकश्रियं परिणायितः. तया सार्धं बंधुरान् भोगान् भुंजानस्य तस्य क्रमेण शतबलाभिधः पुत्रः संजज्ञे. अन्येद्युः क्षेमंकरो राजा पुत्रपौत्रसमन्वितः सिंहासनोपविष्टः सभांतरे यावदस्ति तावदीशानकल्पवासी चित्रचूलनामा कश्चिन्मिथ्यात्वी सुरो मिथ्यात्वमोहितमतिर्नास्तिकवादी तत्रागातः यथा—नास्ति देवो गुरुर्नास्ति । नास्ति पुण्यं न पातकं ॥ न जीवः परलोको वे—त्यादिना-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तिकवाद्यसौ ॥ १ ॥ ततोऽसौ सुरो वज्रायुधकुमारेण भणितो भो देव! तव नास्तिकवादो न युज्यते, यतः पुण्यं विना त्वं देवः कथं जातः? इत्यादि हेतुभिर्निरुत्तरीकृत्य स प्रतिबोधितः. ततः स देवो जगाद भो कुमारेंद्र! त्वयाहं भवार्णवे पतन् हस्तावलंबनेनोध्धृतोऽस्मि. ततः स देवो वज्रायुधकुमारसमीपे सम्यक्त्वरत्नं समाददे. किं ते प्रियं करोमीत्युक्त्वा तस्मै निस्पृहाय मनोज्ञमाभरणं दत्वा देवः स्वर्गे ईशानेंद्रसमीपं जगाम. तत्र स्वधर्मलाभादिस्वरूपे तेन प्रोक्ते ईशानेंद्रेणायं वज्रायुधो नृपः षोडशो जिनेंद्रो भावीति भक्त्या पूजितः. एवं सुखेन कालो याति. अथैकस्मिन् दिने लोकांतिकामरैरभ्येत्य क्षेमंकरो राट् विज्ञप्तः, हे स्वामिंस्तीर्थं प्रवर्तय? जिनेनाप्यवधिज्ञानेन दीक्षावसरं ज्ञात्वा वज्रायुधं राज्ये निवेश्य वार्षिकं दानं च दत्वा चारित्रमुपाददे. ततः किंचित्कालं जिनलिंगेन विहृत्य घनघातिकर्मक्षयात्स केवलज्ञानमवाप. देवैः समवसरणे कृते तत्रोपविश्यासौ जिनो धर्मदेशनां चक्रे. वज्रायुधादयो मानवा देवा देव्यश्च तां देशनां शृण्वंति, यथा—

तद्भो भव्या अहिंसादि—लक्षणं धर्ममुत्तमं ॥ परीक्ष्य विदधीतेति । क्षेमंकरजिनोऽब्रवीत् ॥ ॥ १ ॥ इमां देशनां श्रुत्वानेकशो जीवाः प्रतिबुद्धाः. जिनेंद्रेण गणधरादितीर्थं प्रावर्तितं. वज्रायुधो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राड्पि देशनांते सम्यक्त्वमादाय भगवंतं प्रणम्य निजां पुरीं प्रविवेश. अन्यदा तस्यायुधशालायां चक्ररत्नं समुत्पन्नं. तस्याष्टाह्निकां विधाय चक्रानुगोऽसौ षट्खंडं मंगलावतीविजयं साधयामास. ततश्चक्रवर्तिश्रियांचितो वज्रायुधो निजां पुरीं प्राप्तः. द्वात्रिंशद्राजसहस्रैर्मूर्ध्न्यभिषिक्तो वज्रायुधो निजं पुत्रं सहस्रायुधाभिधं यौवराज्ये न्यवेशयत्. सुरराजसन्निभान् भोगान् भुंजमानोऽसौ विहरन्नास्ते. अथान्यदा तस्यां पुरि पूर्वोत्तरदिग्विभागे क्षेमंकरजिनेश्वर आगत्य समवासार्षीत. देवैः कृते समवसरणे उच्चे सिंहासने स्वामी पूर्वाभिमुखो निषसाद. चक्री च पुंभिर्वर्धापितः, ततः सपरिवारोऽसौ जिनं नंतु ययौ. तत्र गत्वा प्रदक्षिणापूर्वं च परमेश्वरं प्रणनाम, धर्मदेशनां शुश्रूषुश्च यथास्थानं निषसाद. स्वाम्यपि तेषां सभासदांप्रति बोधविधायिनीं धर्मदेशनां चक्रे, यथा—कुलं रूपं कलाभ्यासो । विद्या लक्ष्मीर्वरांगना ॥ ऐश्वर्यं च प्रभुत्वं च । धर्मेणैव प्रजायते ॥ १ ॥ धर्मः कल्पद्रुमः पुंसां । धर्मः सर्वार्थसिद्धिदः ॥ धर्मः कामदुघा धेनु—स्तस्माद्धर्मो विधीयतां ॥ २ ॥ वज्रायुधो राजेमां देशनां श्रुत्वा क्षेमंकरं जिनं नत्वा गृहे गत्वा सहस्रायुधं पुत्रं स्वे राज्ये न्यवेशयत्. पुत्राय राज्ये दत्ते वज्रायुधश्चक्री राज्ञीनां चतुःसहस्रैः, पार्थिवानां चतुःसहस्रैः पुत्राणां सप्तशतैश्च सार्धं श्रा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मण्यमग्रहीत्. गुरूणामंतिके च द्विविधां शिक्षां गृहीत्वा वज्रायुधो मुनिः सिद्धिपर्वतनामानं गिरिवरं ययौ. तत्रैको निश्चलोऽसौ रमणे वैरोचनस्तंभे शिलातले सांवत्सरिकीं प्रतिमां तस्थौ, तत्र प्रतिमास्थस्य तस्य वज्रायुधस्य मुनेः पूर्वमत्सरिणो देवा व्याघ्रसिंहश्वापदाद्यनेकोपसर्गादिभिश्चालनां चक्रिरे, परं भगवान् वज्रायुधो मनागपि ध्यानान्न चचाल, स वज्रायुधमहामुनिस्तामतिदुःकरां वार्षिकीं प्रतिमां पारयित्वा पारणं कृत्वा महीपीठे विजहार, क्षेमंकरे जिनपतौ मोक्षं गतेऽन्यदा वज्रायुधो राजर्षिः पृथिव्यां विहरन् रत्नसंचयायां नगर्यां समाजगाम, तत्र सहस्रायुधस्तदंतिके धर्मं श्रुत्वा शतबले पुत्रे राज्यं निवेश्य स्वयं व्रतमाददे, ततस्तावुभौ पितापुत्रौ गीतार्थौ विविधं तपः कुर्वाणौ भूम्यां विहरतःस्म, आयुरंते तौ पितापुत्रावीषत्प्राग्भारनाममहीधरे पादपोपगमेन तस्थतुः, तत्र देहं त्यक्त्वा नवमभवे नवमग्रैवेयके एकत्रिंशत्सागरायुष्कौ तौ देवौ जातौ.

अथास्मिन् जंबूद्वीपे प्राग्विदेहविभूषणे पुष्कलावतीविजये पुंडरीकिणी नाम पूरस्ति, तत्र घनरथाभिधस्तीर्थकरराजाभूत, रूपलावण्यसंयुक्ते तस्योभे प्रिये आस्तां, आद्या प्रीतिमती, द्वितीया च मनोरमानाम्नी. वज्रायुधजीवो नवमग्रैवेयकादेकत्रिंशत्सागरायुषश्च्युत्वाद्यप्रेयसीप्रीतिमतीकुक्षौ शुक्तौ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुक्तामणिरिव मेघस्वप्नोपसूचितः समुत्पेदे, तथैव सहस्रायुधजीवोऽपि ततश्च्युत्वा द्वितीयराजपत्न्या मनोरमायाः कुक्षौ सुस्वप्नसूचितः समुत्पेदे. अथ पूर्णकाले ते देव्यौ शुभलक्षणौ मेघरथदृढरथनामानौ वरनंदनौ सुषुवाते, तावतिक्रांतशैशवौ सुविनीतौ महाप्राज्ञावष्टवर्षीयौ कलाचार्यसन्निधौ सकलाः कलाः पेठतुः, ताश्च लेख्यं गणितमित्यादयः शास्त्रोक्ता ज्ञेयाः, तौ क्रमेण कलाकलापसंपूर्णौ जातौ, यौवनं च प्राप्तौ, तयोर्मध्ये मेघरथः सुमंदिरपुरस्वामिनिहतारिनृपात्मजे प्रियमित्रामनोरमानाम्न्यावुपयेमे, तस्यैव राज्ञः कनिष्ठा पुत्री सुमतिनाम्नी दृढरथस्य पत्नी जज्ञे, मेघरथस्य नंदिषेणमेघसेनाभिधानौ नंदनौ जातौ, दृढरथस्यैको पुत्रो रथसेनाभिधोऽभवत्, ते त्रयोऽपि समये सकलकलाभ्यासं चक्रिरे. अथैकस्मिन् दिने राजा घनरथः पुत्रपौत्रसमन्वितः सिंहासनस्थः सभामंडपमलंचकार, तस्मिन् समये पुत्रपरीक्षार्थं प्रोक्तं मेघरथेन भोः पुत्राः! प्रज्ञाप्रकाशार्थं परस्परं प्रश्नोत्तराणि ब्रूत? तत्कथनानंतरं कनिष्ठेनोक्तं—कथं संबोध्यते ब्रह्मा । दानार्थो धातुरत्र कः ॥ कः पर्यायश्च योग्यायाः । को वालंकरणं नृणां ॥ १ ॥ विचिंत्य द्वितीयेनोक्तं 'कलाभ्यास इति'. स च पाठितवान्—दंडनीतिः कथं पूर्वं । महाखेदक उच्यते ॥ कोऽबलानां गतिर्लोके । पालकः पं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चमो मतः ॥ २ ॥ ज्येष्टेन तस्योत्तरं दत्तं ' महीपतिरिति. ततश्च स पपाठ—किमाशीर्वचनं राज्ञां । का शंजोस्तनुमंडनं ॥ कः कर्ता सुखदुःखानां । पात्रं सुकृतकस्य कः ॥ १ ॥ अन्येष्वजानत्सु मेघरथेन तस्योत्तरमदायि—' जीवरक्षाविधिरिति ' स्वयं जणितवान्. सुखदा का शशांकस्य । मध्ये च भुवनस्य कः ॥ निषेधवाचकः को वा । का संसारविनाशिनी ॥ १ ॥ राज्ञोक्तं—' जावनेति ' इत्यादिवार्ता कुर्वाणस्य तस्य विद्वद्गोष्ठ्या सुखेन कालो याति. अन्यदा घनरथो राजा लोकांतिकामरैः समन्त्येत्य तीर्थं प्रवर्तयेत्युक्त्वा विबोधितो दीक्षाकालं ज्ञापितः. स्वामी सांवत्सरिकं दानं दत्वा मेघरथं सुतं च राज्ये स्थापयित्वा स्वयं दीक्षां जगृहे. ततः श्रीमान् घनरथो जिनः समुत्पन्नकेवलो जव्यान् प्रतिबोधयन् महीपीठे विजहार, युवराजेन दृढरथेन सहितो मेघरथो राट् सुखेन राज्यं पालयामास. एकस्मिन् समये राजा मेघरथो मुक्तालंकरणः पौषधागारे पौषधं विदधे. कृतपौषधकः सुधीर्योगासनस्थितः समस्तभूपानां पुरतो यावता धर्मदेशनां विदधे, तावता कंपमानांगस्तरलेक्षणस्तवाहं शरणागतो मां रक्ष रक्षेति मनुष्योक्त्या भाषमाण आकाशात्समागत्य नृपतेरुत्संगे पारापतः पपात. जयजीतं पारापतं वीक्ष्य दयालुर्महीपतिः प्रोचे, हे जद्र पारापत ! त्वं मम सन्निधौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुतोऽपि माभैषीः? राज्ञैवमाभाषितः पारापतो यावन्निर्भयः समभूत्तावत्तत्र क्रूरः श्येनाभिधो द्विजः समायातः, सोऽवदत् हे राजेंद्र! शृणु? यस्त्वदुत्संगे पारापतो वर्तते, स मे भक्ष्यं वर्तते, अत एनं मुंच? भक्षयामि, यतोऽहं क्षुधितः, त्वं च दयाब्धिर्मयि दयां कुरु? पारापतं मह्यं देहि? तदानीं राजा प्रोचे भो भद्र! ममायं शरणागतस्त्वार्पयितुं न युक्तः, यतः—शूरस्य शरणायातो—ऽहेर्मणिश्च सटा हरेः ॥ गृह्यंते जीवतां नैते—ऽमीषां सत्या भरस्तथा ॥ १ ॥ तथास्य पलले भक्षिते ते क्षणं तृप्तिर्भाविनी, अस्य च प्राणविनाशः सर्वथा भविष्यतीति चित्ते परिभावय? पंचेंद्रियाणां जीवानां वधं कृत्वा दुराशया जीवा नरकं गच्छंति, भो पक्षिराट्! इदं चित्ते विभावय? मेघरथस्येदं वचः श्रुत्वा श्येनोऽवोचद्भो राजेंद्र! यथा मद्भीतो पारापतस्त्वच्छरणं समागतस्तथाहमपि क्षुधाग्रस्तस्त्वच्छरणं समाश्रितः, त्वं नीतिनिपुणोऽसि, कृत्याकृत्यं च वेत्सि? मादृशे च क्षुधिते क्षुद्रकीटे धर्मवासना कीदृशी? यतः—

आख्याहि भद्रे प्रियदर्शनस्य । न गंगदत्तः पुनरेति कूपं ॥ बुभुक्षितः किं न करोति पापं । क्षीणा नरा निःकरुणा भवंति ॥ १ ॥ एवं भो राजन्! क्षुधार्तः सन् कोऽपि कृत्याकृत्यं न जानाति,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अतोऽहमपि न जानामि, अतो मां प्रीणय यावत्प्राणा न यांति? एवं श्येनेन भणितो जगतीपतिः प्रोवाच, हे भद्र! यदि त्वं क्षुधितोऽसि तर्हि ते वराहारं यच्छामि, पक्ष्यूचे हे राजेंद्र! आमीषं विनान्याहारोऽस्माकमिष्टो नास्ति, राजोचे तदपि सूनाया आनाय्य दास्यामि, श्येनोऽवोचद्यदि मम पश्यतोंगिनो मांसं छित्वा छित्वा दीयते तदा मम तृप्तिः स्यात्, राजोचे यत्प्रमाणोऽयं पारापतो भवेत्तत्प्रमाणं तुलाधृतं निजं मांसं यच्छामि यदि तुभ्यं रोचते, श्येनेनोक्तमेवं भवतु, नृपेण समानायिता तुला, तत्रैकपार्श्वे पारापतं द्विजं न्यवेशयत, द्वितीयपार्श्वे च करुणासागरो मेघरथः स्वं देहं तीक्ष्णक्षुरिकयोत्कृत्योत्कृत्याक्षिपत्, एवं स राजा निजकमांसानि छित्वा छित्वा यथा यथा चिक्षेप, तथा तथा पारापतोऽधिकतरमवर्धिष्ट. मंत्रिमुख्यैर्भार्यादिभिश्च वार्यमाणोऽपि मेघरथोऽमुं गुरुभारं ज्ञात्वा स्वयमेव तस्यां तुलायामारुरोह, तुलारूढं राजानं वीक्ष्य सकला अप्यंतःपुरस्त्रियो हाहाकारं कुर्वाणाः सविषादमदोऽवदन्, यथा—हा नाथ जीवितत्याग—साहसं किं करोष्यदः ॥ एकस्य जीवनस्यार्थे । किमस्मांश्चावमन्यसे ॥ १ ॥ हे प्रभो! इदं किंचिदौत्पातिकं संभाव्यते, यतः क्षुद्रकायस्य पक्षिणो नेदृशो भारः संभाव्यते, एवमुक्तोऽपि सरलाशयो मेघरथो ज्ञानवानपि ज्ञानोपयो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गं न ददौ, किंत्विदं चिंतयामास, धरणीतले ते धन्या ये स्वांगीकृतं श्रेयःकार्यं निर्वहंति. अतोऽह-मपि मंत्र्यादीनां वचनमपेक्ष्य स्वां प्रतिज्ञां न त्यजामि.

अत्रांतरे चलत्कुंडलालंकृतगल्लो, हारविराजितवक्षःस्थलः, किरीटाद्याभरणभासुरशरीरो राज्ञः पुरतः कश्चिद्देवः प्रकटीभूयैवं जगाद. भो राजेंद्र! त्वं धन्योऽसि, तव जन्मजीविते सफले, यत्तव गु-णग्रामं शशांकद्युतिनिर्मलं सविस्मय ईशानेंद्रो देवसभामध्ये शशंस, तमहमश्रद्दधानस्त्वत्परीक्षणा-यागतः. मया चैतौ पूर्वमत्सरिणौ पारापतश्येनावधिष्ठितौ, एषा च देवमाया मया दर्शिता, परं ध-न्यस्त्वं यो देवमायया न चलितः. इत्युक्त्वा तस्योपरि पुष्पवृष्टिं कृत्वा स देवो देवलोकं गतः. मे-घरथोऽपि तं पौषधं पारयित्वा विधिना पारणकं कृत्वा भूयोऽपि देवसन्निभान् भोगान् बुभुजे. पुन-रन्यदा पौषधे पौषधागारे स्थितः कृताष्टमतपाः परीषहोपसर्गेभ्योऽभीतः संवेगरससागरनिमग्नः स्थि-रः प्रतिमया तस्थौ. अत्रांतरे ईशानेंद्रेण भक्तिनिर्भरेण जल्पितं यथा—माहात्म्यनिर्जिताशेष—त्रैलोक्यगतकल्मष ॥ भविष्यदर्हते तुभ्यं । महासत्व नमो नमः ॥ १ ॥ तद्वचनं समाकर्ण्य समी-पस्थास्तत्प्रियाः पृछंतिस्म. हे स्वामिन्नधुना कस्य नमस्कारो विहितः? ईशानेंद्रोऽवदत् क्षितिमंडले

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुंडरीकिण्यां नगर्यां मेघरथो राजा कृताष्टमतपा भाविजिनेश्वरः प्रतिमया स्थितः शुभध्याने वर्तमानो मया भक्त्या नमस्कृतः. एवंविधे शुभध्याने च वर्तमानं तं राजानं सेंद्रा अपि देवाश्चालयितुं न समर्थाः. इत्याकर्ण्य सुरूपातिरूपेतिनाम्न्यौ तद्वल्लभे अस्य नृपस्य क्षोभनार्थं तत्समीपमुपेयतुः. ततस्ताभ्यामुक्तं स्वामिन्नावां देवांगने त्वयि मोहिते स्वर्गादिहायाते तव वल्लभे, ततस्त्वमावयोर्भोगेच्छां पूरय? यतस्त्वमावयोः प्राणप्रियोऽसि. आवां त्रिदशाधीशं स्वाधीनं निजकं पतिं विमुच्य त्वद्गुणयौवनलुब्धे इहागते. इत्यादिभिस्तयो रागपेशलैर्वचनैर्हावभावैश्च मेघरथस्य मानसं न क्षुब्धं. एवं सकलां निशामनुकूलोपसर्गान् विधाय प्रातः प्रशांतहृदये भिन्नविक्रिये ते एवं संस्तुवतःस्म, यथा—सरागं हृदयं चक्रे—ऽरागेणापि त्वयावयोः ॥ अहो चित्रं न रक्तोऽसि । प्रक्षिप्तोऽप्यत्र सुंदर ॥ १ ॥ विलीयते नरो लोह—मयोऽप्यस्मद्विचेष्टया ॥ न स्तोकमपि ते धीर । चचाल हृदयं तथा ॥ २ ॥ ततस्ते देव्यौ स्वापराधं क्षमयित्वा तं नृपं नत्वा तद्गुणश्लाघां कुर्वत्यौ निजाश्रयं जग्मतुः. पौषधं प्रतिमां च पारयित्वा मेघरथो राजा प्रातः पारणं विदधे. एकस्मिन् दिने उद्यानपालकैर्भक्तिपूर्वं स विज्ञप्तः, स्वामिन्! संवर्ध्यसे यदद्यात्रनगरे तव जनको घनरथो जिनः समवासार्षीत्.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत श्रुत्वा तस्मै पारितोषिकं दानं दत्वा कुमारसंयुतो राजा जिनेश्वरं नंतुं समाययौ. तत्र गत्वा जिनं नत्वा भक्तिभावितमानसो यथास्थानं निषसाद. अत्रांतरे घनरथो जिनः सर्वभाषानुगया वाण्या जंतूनां प्रतिबोधार्थं धर्मदेशनां विदधे, यथा—

भो भव्या इह कर्तव्यो । जिनार्चननमस्कृतौ ॥ अपूर्वपाठश्रवणे । चाप्रमादो निरंतरं ॥ १ ॥ पुण्यात्मा यो भवेज्जीवो—ऽप्रमत्तो धर्मकर्मणि ॥ तस्यापदपि सौख्याय । भवेद्भाग्योदयस्तथा ॥ ॥ २ ॥ इमां देशनां श्रुत्वा मेघरथो राजा जातव्रतपरिणामो गृहं गत्वा दृढरथंप्रति प्रोचे. बंधो! राज्यं गृहाण? अहं तु व्रतं प्रतिपद्ये, सोऽवादीदहमपि त्वया सह व्रतं करिष्ये. ततो मेघरथेनात्मतनयो मेघसेनो राज्ये निवेशितो, दृढरथात्मजो रथसेनाभिधश्च यौवराज्यपदे स्थापितः. ततः स्वयं नृपाणां चतुःसहस्रैः पुत्राणां सप्तशतैश्च सार्धं बंधुना च समं जिनांतिके प्रवव्राज. स मेघरथो राजर्षिः सदा समितिगुप्तिसंयुक्तो निजदेहेऽपि निरपेक्षः परीषहानधिसेहे. एवं काले गच्छति बहून् जीवान् प्रतिबोध्य जगतीतले विहृत्य धौतकर्ममलो घनरथो जिनो मोक्षं ययौ. मेघरथर्षिणा च स्थानकैर्विंशतिभिस्तीर्थकरगोत्रकर्मार्जितं. तानि विंशतिस्थानकानि यथा—अरिहंत १ सिद्ध २ पव-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यण ३ । गुरु ४ थेर ५ बहुस्सुय ६ तवस्सीसु ७ ॥ वच्छलया एएसिं । अभिक्खनाणोवओगे अ ८ ॥ १ ॥ दंसण ९ विणए १० आव—स्सए य ११ बंभवए निरइआरो १२ ॥ खणलव १३ तवच्चिआए १४ । वेआवच्चे १५ समाहीअ १६ ॥ २ ॥ अपुवनाणग्गहणे १७ । सुअभत्ती १८ पवयणे १९ पभावणया २० ॥ एएहिं कारणेहिं । तित्थयरत्तं लहइ जीवो ॥ ३ ॥ ततः स सिंहनिःक्रीडितं तपश्चचार. एवमन्यान्यपि तपांसि तेन तप्तानि. सम्यग् संयमं वर्षलक्षमन्यूनं पालयित्वा सानुजो भगवान् मेघरथो राजर्षिस्तिलकाचले पर्वतेऽनशनं व्यधात्. मासपर्यंतेऽनशनं समाप्य स समाधिना कालं चक्रे. गतो दशमो भवः. एकादशे च भवे स सर्वार्थसिद्धिसंज्ञे विमाने सुरः संजज्ञे. अथ द्वादशो भवः कथ्यते यथा—

इतश्चात्रैव भरतक्षेत्रे कुरुदेशे प्रवरप्राकारोपगूढं, कपाटपरिखापरिमंडितं, सतोरणं, चतुर्दिक्षु वापीकूपतडागवाटिकाभिरामं, भूभामिनीभालस्थलतिलकोपमानं, पंडितसमूहैर्नगरगुणवर्णनावसरे स्तूयमानं, सर्वगुणैः सुंदरं हास्तिनापुरं नाम नगरमस्ति. यस्मिन्नगरे दारिद्र्यस्यैव दारिद्र्यमस्ति, अधर्मस्यैव पीडनं, अन्यायस्यैव च निग्रहो नान्यस्येति. तस्मिन्नगरे इक्ष्वाकुवंशतिलको विष्वक्सेन इव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सेनावान् विश्वसेनो नाम नृपोऽस्ति. तस्य राज्ञः पुण्यलावण्यनिपुणा धर्मरुचिराऽचिरादेवीति प्रि-
यास्ति. इतश्च भाद्रपदे मासे कृष्णसप्तम्यां भरणीगते चंद्रे सर्वग्रहेषूच्चस्थानस्थितेषु निशांतरे स-
र्वार्थसिद्धिविमानात् त्रयस्त्रिंशत्सागराण्यायुः परिपूर्य मेघरथदेवजीवोऽचिरादेव्याः कुक्षिसरसि हंसव-
दवतीर्णः. तस्मिन् समये सुखसुप्ता देवी चतुर्दशमहास्वप्नानद्राक्षीद्यथा—मातंग १ वृष २ हर्यक्षाः ३
। साभिषेकेंदिरा ४ तथा ॥ पुष्पमाले ५ दु ६ सूर्यौ ७ च । ध्वज ८ कुंभौ ९ सरोवरं १० ॥ १ ॥
सागरश्च ११ विमानं १२ च । रत्नानां संचयस्तथा १३ ॥ निर्धूमो हुतभुक् चेति १४ । स्वप्ना आग-
मभाषिताः ॥ २ ॥ देवीमान् स्वप्नान् दृष्ट्वा जागरिता सती नृपराजं गत्वा प्रमोदभरनिर्भरा समाच-
ख्यौ. तान् स्वप्नान् श्रुत्वा प्रहृष्टमुखपद्मो जगतीपतिर्जगाद. हे देवि! सर्वलक्षणसंपूर्णस्तवात्मजो भा-
वी. स्वप्नस्यैतत्फलं श्रुत्वा राज्ञी कुस्वप्नालोकशंकिनी धर्मचिंतया रात्रिशेषक्रमतिक्रमयतिस्म. प्रगे सं-
जाते राज्ञा निजपूरुषैरष्टांगनिमित्तज्ञानपंडिताः समाहूताः. ते कृतमंगलोपचारा नृपौकसि संप्राप्ता
दत्तासनेषु चोपविष्टाः. कुसुमादिभिश्चार्चिता राज्ञा स्वप्नफलं पृष्टाश्चैवं बभाषिरे, हे जगतीपतेऽस्माकं
शास्त्रे द्विचत्वारिंशत्स्वप्नाः संति, तेषु त्रिंशन्महास्वप्नाः संति. तत्रार्हतां चक्रिणां च मातर एनांश्चतु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दश स्वप्नान् पश्यंति, अर्धचक्रिणां मातरः सप्त, शीरिणां चतुरः, तथा प्रत्यर्धचक्रिणां त्रीन्. अन्येषा-
मुत्तमजन्मिनां मातरश्चैकैकं स्वप्नं पश्यंति. हे राजन्! यदचिरादेव्या चतुर्दश महास्वप्ना दृष्टास्तेन
तव षट्खंडभरताधिपश्चक्री विश्वत्रितयाधीशवंदितचरणो जिनो वा सुतो नावी. तत श्रुत्वा मुदितो
राजा, सा तत्प्रियापि मुमुदे. दानमानादिभिस्तोषिताः स्वप्नपाठका विसृष्टाः स्वस्वगृहं ययुः. सा
सेवधिं रत्नगर्भेव गर्भं बभार. ततो गर्भहितार्थमतिक्षारमतिमधुरमतितिक्तमतिरुक्षमतिस्निग्धमाहारं
राज्ञी वर्जयामास. तद्देशे तस्मिन् समये तत्पुरे पूर्वं महदशिवमासीत. तेन मांद्यदोषेण लोकस्य
महान् प्रलयः संजातः, प्रभोर्गर्भगतस्य प्रभावात्तत्क्षणं तन्मंमूलमुपशांतरोगं जातं. सर्वस्मिन् देशे
ग्रामे तस्मिन्नगरे च शांतिर्जाता. सार्धाष्टमदिनाधिके नवममासे गते ज्येष्ठकृष्णत्रयोदश्यां भरणी-
स्थे चंद्रे उच्चस्थानस्थितेऽन्यग्रहे शुभलग्ने चारुमारुते प्रवाते निशीथसमये सुवर्णवर्णं मृगलांछनं
विश्वत्रयसुखावहं साचिराराज्ञी विश्वदीपकं पुत्रं सुषुवे. अत्रांतरे कंपितासनाः षट्पंचाशद्दिक्कुमार्यः
समागत्य जिनजन्मोत्सवं यथोक्तं विदधुः. ततश्चलितासनाश्चतुःषष्टिसुरेंद्राः समन्येत्य मेरुशिरसि
नीत्वा तस्य जन्ममहं चक्रुः. सौधर्मेंद्रः कृतजन्ममहः स्वामिनं समानीय मातुरर्पयामास. ततः सौध-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मैंद्रो बाढस्वरेणैवं बभाषे, यथा—

जिनस्य जिनमातुश्च । यो दुष्टं चिंतयिष्यति ॥ एरंमफलवद् ग्रीष्मे । स्फुटिष्यत्यस्य मस्तकं ॥ १ ॥ ततो रत्नसुवर्णादिवृष्टिं कृत्वा नंदीश्वरेऽष्टाह्निकां च कृत्वा सौधर्मेंद्रः स्वस्थाने गतः. एवं सुरेश्वराः सर्वदिक्कुमार्योऽपि नंदीश्वरे यात्रां कृत्वा निजं निजं स्थानं जग्मुः. अथ प्रभाते संजाते गाढं प्रस्खलद्गतयोंगप्रतिचारिकाः समागत्य राजानं पुत्रजन्मवर्धापनिकया वर्धापयामासुः, असौ राजा मुकुटं विना निजांगलग्नभूषणमासप्तसंततिं यावद्वृत्तिं च ताभ्यां ददौ, अन्येषामपि याचकजनानामनिवारितदानान्यदापयत, द्वादशे दिने राजाशेषं बंधुवर्गं भोजयित्वा गौरवेण तत्समक्षमदोऽवदत, अस्मिन् जिने गर्भगतेऽशिवशांतिर्जाता, तदस्य सुतस्य सुंदरं शांतिरिति नामास्तु, तत एतन्नाम सर्वेषां संमतं संजातं, जन्ममहे शक्रसंक्रामितांगुष्ठामृतेनाहारेण संवर्धितो भगवान् विशिष्टरूपलावण्यसंपन्नः क्रमाद्ववृधे, अष्टोत्तरसहस्रलक्षणैरलंकृतो लोकोत्तरगुणगणाभिरामो मतिश्रुतावधिसंज्ञैस्त्रिभिर्ज्ञानैः समायुक्तोऽशेषविज्ञानपारगः सर्वजननयनमनोहारियौवनश्रियाभिरामस्तातेन परिणायितः, पंचविंशतिवर्षसहस्रेषु गतेषु भगवान् जनकेन राज्ये निवेशितः, परिणायिताश्चानेकाः सर्वो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्कृष्टरूपाः कुलकन्यकाः. तस्य सर्वांतःपुरमनोहरा मनोज्ञरूपा यशोमती जज्ञे. अथ दृढरथस्य जीवस्त्रयस्त्रिंशत्सागराण्यायुः परिपाल्य सर्वार्थसिद्धिविमानात्परिच्युतो यशोमतीकुक्षौ चक्रस्वप्नोपसूचितः समागात्, समये यशोमत्याः सुतो जज्ञे, तस्य स्वप्नानुसारतः शांतिजिनेन चक्रायुध इति नाम चक्रे. क्रमेणाष्टवर्षीयः कलाचार्यसमीपे कृतसकलकलाश्रमः सकलशस्त्रशास्त्रपारंगमी प्राप्तयौवनो राज्ञा राजकन्यकानां पाणिग्रहणं कारितः, चक्रायुधस्ताभिः सह दोगुंदकदेव इव भोगान् बुभुजे.

अथान्यदायुधशालायां रविबिंबनिभं सहस्रारं चक्ररत्नं समुत्पन्नं, शस्त्रागाररक्षकेण राज्ञोऽग्रतस्तदुत्पत्तिर्निवेदिता, स्वामिना श्रीशांतिनाथेन तस्याष्टाह्निकोत्सवश्चक्रे. ततश्चक्रमायुधशालाया विनिर्गत्यांबरवर्त्मना चचाल, तदनु शांतिनाथः सैन्यसमन्वितः प्राचलत्, यक्षसहस्रेणाधिष्ठितं चक्रं प्रथमं पूर्वस्यां मागधतीर्थासन्नवेलाकूले समागतं, तत्र चक्री सेनाया निवेशं कृत्वा शुभासने निषण्णः, मागधतीर्थाभिमुखो मागधतीर्थाधीशं च मनसि कृत्वा तस्थौ, पूर्वस्यां दिशि समुद्रमध्ये द्वादशयोजनांते जलस्याधोभागे मागधदेवस्य स्थानं वर्तते, तस्यासनं चलितं, तेन देवेनावधिज्ञानं प्रयुक्तं, षट्खंडसाधनोद्यतमागतं शांतिजिनं चक्रवर्तिनं च ददर्श. दध्यौ च स भयान्योऽपि चक्री

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आराध्यः, अयं तु जिनचक्री, अस्य नक्तिं सेंद्रा देवा अपि कुर्वते, अतो मयाप्यस्य सेवा कार्या. एवं विचार्य तेन सुवस्त्रानरणान्यादाय प्रनोरग्रे मुक्तानि, एवं च न्नाशंस—तवाज्ञाकारकः स्वामिन्। पूर्वदिक्पालकोऽस्म्यहं ॥ आदेष्टव्यं सदा कृत्यं । स्वाकिंकरसमस्य मे ॥ १ ॥ नगवान् श्रीशांतिजिनस्तं देवं सन्मान्य विससर्ज. ततः सुदर्शनसहितः शांतिजनः यामीं दिशंप्रति चलतिस्म. स जिनो वरदामतीर्थस्यासन्ने गत्वा स्थितः. तस्याधिष्टायकं दक्षिणदिग्नायकं वरदाममेवं प्रभुस्तथैवासाधयत्. ततोऽसौ वारुणीमाशां प्रभासतीर्थं साधयितुं गतः, तदपि तीर्थं स तथैवासाधयत्. तत उत्तरस्यां दिशि सिंधुनदीतटे ययौ, तत्रापि पूर्वविधिना तेन साधिता सिंधुदेवी. सा देवी च समागत्य विनो रत्नमयं स्नानपीठमढौकयत्, तथा स्वर्णरूप्यमणिमृदादिमयान् कुंनानन्यामपि च स्नानसामग्रीं सुवस्त्रानरणानि चाढौकयत. ऊचे च हे स्वामिंस्तवाज्ञाकारिण्यस्म्यहं. इत्युक्त्वा सापि विभुना विसृष्टा स्वस्थानं गता.

अथ सेनापतिश्चर्मरत्नेन सिंधुनदीमुत्तीर्य प्रतीचीखंडं साधयित्वा विन्नुपांते समागतः. ततश्चक्रं कृतपूजं स्वामिसैन्यसंयुक्तं वैताढ्यस्य तलेऽगमत्. स्मृतमात्रो वैताढ्याद्रिकुमारः प्रनोर्वशवर्त्यनवत्.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततः खंडप्रपाताया गुहाया द्वारं स्वयमुद्घटितं. कृतमालसुरश्च जगद्भर्तुराज्ञां प्रपन्नवान्. तस्यां गुहायामुन्मग्नानिमग्नानाम्न्यौ द्वे नद्यावतिदुस्तरे स्तः. वार्धकिस्तत्र मनोहरां पद्यां सद्यश्चकार. प्रभुः सैन्यसमन्वितस्तां पंचाशद्योजनायामां द्वादशयोजनोच्चां द्वादशयोजनविस्तीर्णां खंडप्रपातगुहां प्रविवेश. तत्र काकिणीरत्नेन तमो हर्तुं प्रभुर्भित्तौ भित्तावेकोनपंचाशन्मंडलानि चक्रे. एवं जगतत्रितयनायको भगवान् शांतिजिनो गुहायाः परतो निरगात. तत्रापातचिलाताख्यान् म्लेच्छांश्च स तरसा वशीचकार. तत्र सेनानीर्द्वितीयं सिंधुनिष्कुटं साधयित्वा समागतः, ततोऽसौ हिमवत्पर्वतस्याधिदेवं साधयतिस्म. ततोऽग्रे गत्वा वृषभकूटाख्ये गिरौ निजं नाम लिलेख. ततः सेनापतिर्गंगोत्तरनिष्कुटमसाधयत्. विभुश्च तमिस्रायां नाट्यमालं संसाध्य गुहातो निरगात. पश्चाद्गंगां साधयित्वा तस्याः कुले तस्थुषः प्रभोर्नव निधयः प्रादुर्बभूवुः. कथंभूताः? मंजूषाकृतयः, द्वादशयोजनायामाः, नवयोजनविस्तृताः, नवयोजनोच्चाश्चक्रवर्तिभोग्योपस्थिताश्च. यथा—निसर्पः १ पांडुकश्चैव २ । पिंगलः ३ सर्वरत्नकः ४ ॥ महापद्मः ५ कालः ६ महा—कालौ ७ माणव ८ शंखकौ ९ ॥ १ ॥ तत्र स्कंधावारपुरादीनां निवेशः प्रथमे १, सर्वेषां धान्यादीनामुत्पत्तिर्द्वितीये २, महिलानां नराणां च हस्ति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नां वाजिनां चाभरणविधिः सर्वस्तृतीये ३, चतुर्दशापि रत्नान्युत्पद्यंते चतुर्थे ४, वस्त्राणां रंगादीनां च संभवः पंचमे ५, कालत्रयज्ञानं षष्टे ६, स्वर्णरूप्यमणीनां प्रवालानां च संभवः सप्तमे ७, युद्धनीतिः सर्वप्रहरणानि योधानां तनुत्राणादि चाष्टमे ८, समस्तानि तूर्यांगानि, चतुर्विधं काव्यं, नाट्यनाटकयोर्विधिश्चेति नवमे ९. तेषु निधिषु निधानसमनामानः पल्योपमायुष्काः कुलदेवताः परिवसंति. गंगायाः पूर्वनिष्कुटमपि स तथैवात्मवशीचकार.

एवं षट्खंडं भरतक्षेत्रं साधयित्वा महामहेन हस्तिनापुरे ससैन्यः शांतिजिनः समागात्. द्वात्रिंशन्महीपालसहस्रैश्च तस्य द्वादशवार्षिकश्चक्रवर्त्यभिषेको विदधे. राज्याभिषेकादनंतरं प्रत्यहमेकैको राजा स्वामिने प्रचुरं द्रव्यं रूपनिर्जितसुरांगने च द्वे द्वे कन्यके ददौ. एवं विभोश्चतुःषष्टिसहस्राणि प्रिया अभवन्. सेनापतिप्रभृतीनि चतुर्दश रत्नानि यक्षसहस्रेणैकेन समधिष्टितानि भवंति. चतुरशीतिलक्षाणि करिणां, चतुरशीतिलक्षाणि वाजिनां, चतुरशीतिलक्षाणि रथानां, द्विसप्ततिसहस्राणि पुराणां ऋद्धिशालिनां, षण्णवतिकोट्यः पदातीनां ग्रामाणां च, द्वात्रिंशत्सहस्राणि देशानां भूभुजां द्वात्रिंशद्बद्धतरुणीनाटकानां च, विंशतिः सहस्राणि रत्नाकराद्याकराणां, अष्टचत्वारिंशत्सह-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्राणि पत्तनानां. एवमसमां चक्रिपदवीं पालयतस्तस्य पंचविंशतिवर्षसहस्राणि ययुः. अत्रांतरे लोकांतिकानां देवानां सारस्वतादीनामासनानि चलंतिस्म. ते विभोर्व्रतसमयं ज्ञात्वा स्वाम्यंतिके समागत्य जिनं नत्वा जयजयेत्याशिषं दत्वा तीर्थं प्रवर्तयेत्युक्त्वा स्वस्थानमगमन्. स्वाम्यप्यवधिज्ञानेन व्रतसमयं ज्ञात्वा याचकेभ्यो यथारुचि सांवत्सरं दानं ददौ. ततो निजं तनयं चक्रायुधं राज्ये निवेश्य भगवान् दीक्षाग्रहणार्थं समुद्यतो बभूव. अत्रांतरे चलितासनाः सर्वेऽपि सुराधीशाः शांतिनाथस्य निःक्रमणोत्सवं कर्तुमाययुः. श्रीशांतिनाथो देवमनुजकृतां सर्वार्थसंज्ञां शिबिकामारुरोह. देवैः शिरसि धृतातपत्रश्चामरैर्वीज्यमान एवंविधसामग्र्या शनैः शनैर्नगरान्निर्गत्य सहस्राम्रवनाभिधानमुद्यानप्रवरं प्राप. तत्र गत्वा शिबिकायाः समुत्तीर्याभरणानि मुक्त्वा जिनेश्वरः पंचभिर्मुष्टिभिः केशानुच्चखान. तान् केशान् सौधर्मेंद्रो वस्त्रांचले गृहीत्वा क्षीराब्धौ चाक्षिपत. ज्येष्टासितचतुर्दश्यां भरणीगते शशांके सिद्धनमस्कारं कृत्वा प्रभुश्चारित्रमाददे. तत्क्षणोत्पन्नमनःपर्यवज्ञानः कृतषष्टतपा नृपसहस्रेण सार्धमात्तसामायिकः प्रभुर्महीतले विजहार.

स्वामिनः प्रथमपारणकं सुमित्राख्यगृहस्थेन कस्मिंश्चित्सन्निवेशे परमान्नेन कारितं. चतुर्ज्ञान·

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धरो विहुर्महीतलेऽष्टौ मासान् विहृत्य पुनर्हस्तिनापुरे समाययौ. ततो विभुः पत्रपुष्पफलाढ्ये नंदिवृक्षतले तस्थौ. प्रभोस्तदा शुक्लध्याने वर्तमानस्य कृतषष्टस्य शुभायां नवमीतिथौ भरणीस्थे चंद्रे क्षीणे कर्मचतुष्टये समुज्ज्वलं नित्यं केवलज्ञानमुत्पन्नं. समागता देवा देव्यो नरा नार्यश्च. कृतं समवसरणं, पूर्वसिंहासने स्थितो भगवान् मधुक्षीरासवलब्धियुक्तया सर्वभाषानुगया वाण्या धर्मदेशनां विदधे. सहस्रायुधादयः प्रेमपरायणास्तां देशनां शृण्वंति. यथा—निर्जिताः शत्रवो लोके । महाराज त्वमी त्वया ॥ नाद्यापि निर्जिता देहे । रिपवस्त्विंद्रियाह्वयाः ॥ १ ॥ शब्दरूपरसगंध—स्पर्शाख्या विषयाः खलु ॥ अजितेष्विंद्रियेष्वेते । महानर्थविधायिनः ॥ २ ॥ वितत्य कर्णौ व्याधस्य । गीताकर्णनतत्पराः ॥ हरिणा मरणं यांति । श्रोत्रेंद्रियवशंवदाः ॥ ३ ॥ शलभः कनकाकारां । प्रदीपस्योल्लसच्छिखां ॥ पश्यन् प्रविश्य तत्राशु । म्रियतेऽनिर्जितेक्षणः ॥ ४ ॥ मांसपेशीरसास्वाद—लुब्धः कैवर्तवश्यतां ॥ यात्यगाधजलस्थोऽपि । मीनो रसनया जितः ॥ ५ ॥ भृंगः करिमदाघ्राण—लुब्धः प्राप्नोति पंचतां ॥ दुःखं वा सहते नागो । घ्राणेंद्रियवशः खलु ॥ ६ ॥ हस्तिनीवपुषः स्पर्श—लुब्धोऽथ करिपुंगवः ॥ आलानबंधनं तीक्ष्णां—कुशघातं सहेत भोः ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवमिंद्रियस्वरूपं साधुश्रावकव्रतरूपं धर्मं च श्रीशांतिजिनोदितं श्रुत्वा सकला सभामृतसिक्ते-व बभूव. अत्रांतरे चक्रायुधमहीपतिः समुत्थाय जिनं नत्वा कृतांजलिः प्रभुं विज्ञपयामास हे प्रभो! समस्तसंशयध्वांतनिर्नाशनदिवाकराय तुभ्यं नमोऽस्तु. हे प्रभो मम दुःकर्मनिगडान् भंक्त्वा राग-द्वेषाररीनुद्घात्य भवगुप्तिगृहान्मां निस्सारय? स्वामिनोक्तं भो नरेंद्र! धर्मे प्रमादो न विधेयः. ततो गृहे गत्वा पुत्रप्रदत्तराज्यः पंचत्रिंशन्नृपान्वितश्चक्रायुधो धरापतिर्जिनेंद्रेण दीक्षितः. ततस्तेषां सा-धूनां जिनेन त्रिपद्यारोपिता, ते मुनयो गाढप्रज्ञावंतस्त्रिपद्या अनुसारेण क्षणाद् द्वादशांगानि वि-दधिरे. ते सर्वे द्वादशांगीं विधाय जिनसन्निधौ समागताः, भगवांस्तानागतान् विज्ञाय सिंहासना-दुत्तस्थौ. अत्रांतरे सहस्राक्षः सद्गंधवासपूरितं विशालं स्थालं समादाय शांतिनाथपुरतस्तस्थौ. जि-नेश्वरः समस्तसंघस्य गंधानर्पयामास. ततस्ते साधवः प्रभुं परितः प्रदक्षिणात्रयं ददिरे. तदुत्तमांगे-षु ससंघो जिनो गंधवासानक्षिपत्. जिनेनैवं तेषां गणधरपदस्थापना विनिर्मिता. ततो जिननाथेन बहवः पुरुषाः स्त्रियश्च दीक्षिताः. ततो जिनस्य साधुसाध्वीपरिवारः समजायत. तथा ये नरा नार्य-श्च यतिधर्मासमर्थास्ते स्वाम्यंतिके श्रावकत्वं प्रपेदिरे. एवं चतुर्विधः संघः शांतिजिनस्य प्रथमे स-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मवसरणे समुत्पन्नः. प्रथमपौरुष्यंते समुत्थाय जिनेश्वरो द्वितीयप्राकारमध्यस्थे देवछंदके श्रमापनयनार्थं विशश्राम, ततो जिनेंद्रस्य पादपीठे प्रथमो गणी चक्रायुधो निषण्णो द्वितीयपौरुष्यां तस्याः सदसः पुरो व्याख्यानं चक्रे, यथा—जिनधर्मस्थिरीकार—कारिणीमघहारिणीं ॥ संघस्य कथयामास । सोंतरंगकथामिमां ॥ १ ॥ तथाहि—

अत्र मनुष्यलोके क्षेत्रे शरीरे नगरे बलवान् मोहनामा महीपालः स्वेच्छया विलसति, तस्य मायानाम्नी प्रियास्ति, तत्पुत्रोऽनंगनामा, लोभनामा महामात्यः, क्रोधनामा योधश्चास्ति, रागद्वेषाववतिरथौ मिथ्यात्वनामा मंडलेश्वरश्चास्ति, मोहराजस्य वाहनं मानगजेंद्रोऽस्ति, इंद्रियाश्वमारूढा विषयास्तस्य सेवका वर्तंते. एवं मोहराजस्य सैन्यमतिदुर्धरं वर्तते, तत्र नगरे कर्मसंज्ञाः कृषीवलाः, प्राणाः प्रौढवणिजो, मानसनामा रक्षकश्च वसंति. गुरूपदेशदानेन मानसे प्रेरिते ससैन्यो धर्मराजस्तत्र सैन्ये प्रविवेश, तस्य मनोहराचारवतीनाम्नी पट्टराज्ञ्यस्ति, संतोषनामा महामात्योऽस्ति, सम्यक्त्वनामा मंडलेश्वरोऽस्ति, महाव्रतनाम सामंताः, अणुव्रतादयः पत्तयः, वाहनं च मार्दवनामा गजेंद्रोऽस्ति, उपशमादयो योद्धारो वर्तंते, सच्चारित्ररथारूढः श्रुतनामा सेनानीर्वर्तते, तेन धर्मराजे-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नासौ मोहराजो निर्जित्य शरीरपुरान्निष्कासितः, पश्चाद्धर्मराजः सर्वेषां लोकानामिमामाज्ञां ददाति, भो भो लोकाः! मोहराजस्यावकाशो केनापि न देयः, एवं कृतेऽपि यः कश्चिन्मोहस्यावकाशं दास्यति स पुनः कर्मपरिणत्या संसारपथि संस्थाप्यते. एवं गणधरेण प्रवरा धर्मदेशना कृता, स्वयं निर्मिता द्वादशांगी च कथिता, तथा साधूनां च दशविधा सामाचारी प्रकल्पिता, साधूनामशेषकृत्यं चामुना श्रुतकेवलिना सर्वं समुपदिष्टं. ततः शांतिजिनवरो महीतले भव्यान् प्रतिबोधयन् विजहार, केचिज्जना भगवतः पार्श्वे प्रव्रज्यां जगृहुः, केचिद् गृहस्थधर्मं शुभभावतः प्रपेदिरे, केचन विरतिं, केचन सम्यक्त्वं च प्रपेदिरे, जिनभास्करे उदिते सर्वस्यापि पापतमो नष्टं, परं कौशिकानां यथांधत्वं न नश्यति, तथाऽभव्यानां जिनेनापि सिद्धिर्न जायते. श्रीमच्छांतिजिनश्चतुस्त्रिंशदतिशयैर्विराजमानः पंचत्रिंशद्वाग्गुणैर्विभूषितो भव्यान् प्रतिबोधयन् मह्यां विहरतिस्म, चक्रायुधगणधरः शुश्रूषां कुर्वाणः शांतिजिनेंदुना सह भूतले विचचार. पृथिव्यां विहरता शांतिनाथेन षट्त्रिंशद्गणधरैः संयुक्ता द्वाषष्टिसहस्राणि मुनिपुंगवा दीक्षिताः, षट्शतैरधिकान्येकषष्टिसहस्राणि शीलशोभितानि प्रभुदीक्षितानां श्रमणीनामभूवन्, श्रीशांतिनाथेन बोधितानां शुद्धसम्यक्त्वधारिणां श्राद्धानां नवति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सहस्रयुक्ता लक्षद्वयी जाता, शुद्धसम्यक्त्वधारिणीनां श्राद्धीगुणैरलंकृतानां श्रीजिनप्रतिबोधितानां त्रिनवतिसहस्राधिकत्रीणि लक्षाणि श्राद्धीनां चाभवन्. जिनानां जिनसदृशानां चतुर्दशपूर्वभृताम-ष्टसहस्राणि चाभवन्. शांतिजिनस्य सहस्रत्रितयमवधिज्ञानिनामभवत, मनःपर्यवज्ञानिनां सहस्रच-तुष्टयी जाता, केवलज्ञानयुक्तानां मुनीनां त्रिशताधिकचतुःसहस्राणि बभूवुः. वैक्रियलब्धिमतां ष-ट्सहस्राणि, चतुःशताधिके द्वे सहस्रे वादिनां, तथा वैयावृत्त्यकरः संघप्रत्यूहहरः शांतिजिनेशितु-स्तीर्थरक्षाकरो गरुडनामा यक्षोऽभूत्, शांतिनाथतीर्थरक्षाकारिणी निर्वाणीनाम्नी विश्रुता शासनदे-वता जज्ञे, तथा शांतिनाथस्याष्टौ प्रातिहार्याण्यशोकादीनि जज्ञिरे.

एवं श्रीशांतिनाथः पंचविंशतिवर्षसहस्राण्यनगारतां पालयन् पृथिव्यां विहरतिस्म, तत्राष्टौ मा-सांश्छद्मस्थत्वेन, शेषाणि च केवलित्वेन विचचार, प्रभोः कौमारत्वे पंचविंशतिवर्षसहस्राणि, तावं-ति वर्षसहस्राणि मंडलिकत्वे, पंचविंशतिवर्षसहस्राणि चक्रित्वे, पंचविंशतिवर्षसहस्राण्यणगारत्वे, एवं च प्रभोर्वर्षलक्षं सर्वायुरभवत्. अथ जगद्गुरुः स्वस्य निर्वाणसमयमासन्नं ज्ञात्वा स्वयं सम्मेतशि-खरे आरुरोह, स्वाम्यासन्ननिर्वाणं ज्ञात्वा सर्वे सुरेश्वराः समभ्येत्यांतिमं समवसरणं चक्रुः, भगवां-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तत्रोपविश्यांतिमायां देशनायां सर्वजावनामनित्यतां समाचख्यौ. अत्रांतरे चक्रायुधगणधरः पाद-प्रणामपूर्वकं सिद्धशिलास्वरूपं सिद्धस्वरूपं च पप्रछ, भगवानपि तयोः स्वरूपं प्रोवाच यथा—पंच-चत्वारिंशल्लक्षाणि योजनानां विस्तृता श्वेतोत्तानछत्रसंस्थिता सकललोकस्योपरि प्रतिष्ठिता पिंडेऽष्टौ योजनानि क्रमात संक्षिप्तांते मक्षिकापत्रतन्वी सिद्धशिला वर्तते, तस्योपरि योजनस्य षष्ठांशकेऽनं-तसौख्यसमन्विताः सिद्धाः प्रतिष्ठिताः, तत्र तेषां सिद्धानां जन्मजरामरणरोगशोकाद्युपद्रवो नास्ति, तत्र निरुपमं सौख्यं सिद्धानां वर्तते. यतः—जं च कामसुहं लोए । जं च दिव्वं महासुहं ॥ वीय-रायसुहस्सेहिं । अणंतजागंपि नग्घइ ॥ १ ॥ एवमंतिमां देशनां समाख्याय जगवांस्ततः स्थानात समुत्थाय महीभृतः क्वापि प्रधानशिखरे आरुरोह. केवलज्ञानिनां साधूनां नवजिः शतैः सार्धं तत्रै-कमासिकमनशनं व्यधात. तस्मिन् समये सपरिवाराः सर्वेऽपि सुरेंद्राः परमप्रीतिसंपन्नाः प्रभुपर्युपास-नां चक्रिरे. ज्येष्ठश्यामत्रयोदश्यां निशाकरे जरणीस्थे शुक्लध्यानस्य चरमं जेदं ध्यायन् प्रजुः शांति-जिनः सिद्धिं ययौ. ते सर्वेऽपि साधवः केवलज्ञानिनोऽनशनिनः स्वामिना सह मोक्षं ययुः. सि-द्धिगतं नाथं ज्ञात्वा देवासुरमनुजगणाः साश्रुपूर्णाक्षाः प्रजोर्गुणान् स्मारं स्मारं विलपंतिस्म. हा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाथ! संशयध्वांतविच्छेदनदिवाकर! अस्माननाथान् मुक्त्वा त्वं क गतोऽसि? भवंतं विना स्वभाषापरिणामामाह्लाददायिनीं धर्मदेशनां कः कर्ता भविष्यति? इत्यादिविलापान् कृत्वा श्रीशांतिजिनेशितुः शरीरं क्षीरोदध्यादिवारिणा स्नापयामासुः. ततो नंदनवनसमुद्भगोशीर्षचंदनेनानुलिप्य, देवदूष्यवासांसि परिधाप्य मुखे कर्पूरं दत्वा, चंदनादिभिः पूजयित्वा, वररत्ननिर्मितायां शिबिकायां क्षिप्त्वा, ततः समुत्पाट्य चंदनदारुकृतचितामध्ये तज्जिनेंद्रवपुरक्षिपन्. शेषानगाराणां शरीराणि वैमानिकामरास्तथैव चंदनादिभिः संपूज्य शिबिकायां समारोप्य चितायामक्षिपन्.

ततोऽग्निकुमारा देवा मुखेऽग्निं ददुः, वायुकुमारा देवा वातं ववुः. एवमग्नौ प्रदीप्ते दग्धे मांसशोणिते. ततो मेघकुमारेण सुरभिशीतलं वारि मुक्तं, निर्वापिता चिता. ततश्चोर्ध्वस्थां दक्षिणां दंष्ट्रामाद्यवासवेंद्रो जग्राह, अधःस्थितां चमरेंद्रो, वामामुपरिस्थामीशानेंद्रोऽधःस्थां बलींद्रश्च. शेषाष्टाविंशतिर्दंतास्तत्संख्यैः शेषवासवैर्जगृहिरे. शेषास्थीनि पुनर्देवैर्जगृहिरे. जगद्गुरोश्चितान्भस्म विद्याधरनरैः सर्वोपद्रवरक्षार्थं जगृहे. एवं विहितसंस्काराः सुरेंद्रास्तद्भूमौ स्वर्णरत्नमयं स्तूपं चक्रुः. तस्योपरि जगद्गुरोः स्वर्णमयीं प्रतिमां कृत्वा देवेंद्राः पूजयामासुः. ततो नंदीश्वरयात्रां कृत्वा ते स्वं स्वं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थानंप्रति ययुः. चक्रायुधो भगवान् भव्यान् प्रतिबोधयन् महीपीठे विजहार. पृथिव्यां विहरतश्चक्रायुधमुनेः केवलमुत्पन्नं. सोऽपि केवली चक्रायुधो गणभृद्बहुसाधुपरिवृतः कोटिशिलायां शिवं प्रययौ. सर्वोपसर्गाः स्मरणेन यस्य । व्रजंति यः कामितकल्पवृक्षः ॥ भव्यांगिनां यो वरदानदक्षः । स शांतिनाथः प्रकरोतु शांतिं ॥ १ ॥ इत्थं यः सकलोपसर्गहरणः कल्याणकृद्देहिनां । ख्यातो द्वादशभिर्भवैर्गुणवतां पूज्यो जगत्त्रायकः ॥ भीतो येन जिनेन कंपितवपुः पारापतो रक्षितः । स श्रीशांतिजिनो जगत्त्रयपतिर्भूयात्सतां शांतये ॥ २ ॥ इति श्रीशांतिनाथचरित्रं संक्षेपतः समाप्तं. शांतिचरित्रेण दिग्मात्रदर्शितेन 'करुणाइ दिन्नदाणो' इति प्ररूपितं. अथ साधूनामन्नादिदानफलमाह—

॥ मूलम् ॥—पंचसयसाहुभोअण—दाणावज्जिअसुपुण्णपब्भारो ॥ अच्छरियचरिअभरिओ । भरहो भरहाहिवो जाओ ॥ ७ ॥ व्याख्या—एकादशभवे बाहुसाधुर्भरतजीवः 'पंचसएत्ति' पंचशतसाधूनां 'भोअणत्ति' भोजनमन्नपानादि, तद्दानेनावर्जितः सुपुण्यप्राग्भारो येन स तथा 'अच्छरिअत्ति' आश्चर्यकारि यच्चरितं तेन भृतः 'भरहोत्ति' भरतः प्रथमचक्रवर्ती 'भरहाहिवोत्ति' भरताधिपः षट्खंडनायको जात इति गाथाक्षरार्थः. विस्तरार्थस्तु कथानकादवसेयः, तत्कथा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चेयं—ऋषभदेवैकादशभवे वैद्यपुत्रजीवानंदजीवो १, राजपुत्रमहीधरजीवो २, मंत्रिपुत्रसुबुद्धिजीवः ३, श्रेष्ठिपुत्रगुणाकरजीवः ४, सार्थपतिपूर्णभद्रजीव ५ श्चैते पंचापि परममैत्र्या अच्युतकल्पे त्रिदिवश्रियं भुक्त्वा द्वाविंशतिसागराण्यायुः परिपाल्य च्युत्वा जंबूद्वीपे पूर्वमहाविदेहे लवणवारिधेस्तटे पुष्कलावतीविजये पुंडरीकिण्यां नगर्यां वज्रसेनस्य राज्ञो धारिण्यां पट्टराज्ञ्यां कुक्षौ ते पंचाप्यनुक्रमेण पुत्रत्वेनोत्पन्नाः. तेष्वाद्यो भिषग्जीवो वज्रनाभनामा चतुर्दशस्वप्नसूचितो विशिष्टसाम्राज्यवैभवो जातः १. द्वितीयो बाहुनामा २, तृतीयः सुबाहुनामा ३, चतुर्थः पीठनामा ४, पंचमो महापीठनामा ५ चेति. पंचापि परमबांधवाः परमवशंवदाः क्रीडया कालं गमयामासुः. वज्रसेननृपस्यान्यदा लोकांतिकामरैः समागत्य दीक्षासमयो ज्ञापितः. स्वाम्यपि लोकांतिकोक्तं श्रुत्वावधिज्ञानेन च ज्ञात्वा वज्रनाभं ज्येष्ठपुत्रं राज्ये न्यवेशयत्. सांवत्सरिकदानं दत्वा सुमुहूर्ते देवेंद्रकृतमहो भगवान् वज्रसेनो बहुपरिवारपरिवृतः संयममशिश्रियत. तत्क्षणादेव चारित्रसंपदा साकं तुर्यं मनःपर्यायज्ञानमासदत्. स भगवान् वज्रसेनो जिनो मह्यां विहरन् संयमं पालयामास. कतिपयवर्षांते वज्रनाभमहीपती राज्यं पालयन् चक्ररत्नोत्पत्तिवर्धापनिकया वर्धितः, तथा तस्मिन्नेव दिने समकालं वज्रसेन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जिनपतेः केवलोत्पत्तिवर्धापनिकयापि वर्धितः.

ततो राज्ञा वज्रनाभेन वज्रसेनजिनस्य केवलमहिमानं विधाय ततोऽष्टाह्निकोत्सवश्चक्रस्य विदधे, चक्रानुगो वज्रनाभश्चक्री पुष्कलावतीविजयषट्खंडं विजित्य प्राप्तचक्रिपदः कामं धर्मार्थकामान् साधयन्नास्ते. एवं बहूनि वर्षाणि यावत्कृतराज्यो भुक्तचक्रवर्तिभोगः समुत्पन्नवैराग्यः सुतं राज्ये न्यस्य सर्वबंधुसहितो नृपस्तातपादांते दीक्षां जग्राह. वज्रनाभो राजर्षिः स्थविरोपांते द्वादशांगान्यधीत्य सूरिवरो जातः. तेषां सूरीणां चत्वारो बांधवा एकादशांगधरा बभूवुः, ते च गुरूपांते वैयावृत्त्यपराः संयमं पालयामासुः. कियता कालेन वज्रसेनप्रभौ भवोपग्राहिकर्माणि क्षयं नीत्वा निर्वृत्तिं प्राप्ते वज्रनाभो गणभृद्धरायां विजहार. वज्रनाभस्य साधोः सकला लब्धयः सिद्धयश्च समागत्य पादपीठांतिके लुलुठुः, तस्यान्ये बांधवाश्चत्वारोऽप्येकादशांगधराः क्षमासागरा धर्मधुराधौरेया निर्मलं संयमं पालयामासुः. वज्रनाभमुनींद्रोऽर्हद्भक्त्यादिभिर्विंशतिस्थानकैस्तीर्थकृत्कर्म निर्ममे. बाहुसाधुः पंचशतसाधूनां प्राशुकान्नपानादिदानेन चक्रिपदवीं समुपार्जयत्. सुबाहुमुनिवरः पंचशतसाधूनां विश्रामणादि वैयावृत्त्यमकरोत्. तेन पुण्येन स चक्रवर्तितोऽपि बलाधिक्यमार्जयत्. वज्रनाभमुनीश्वरस्तयोः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रशंसां करोति. पीठमहापीठौ महामुनी एकांते स्थितौ तपसि लीनौ वैयावृत्त्यविमुखावीर्ष्यावंतौ मायामिथ्यात्वयोगतः स्त्रीगोत्रकर्म बबंधतुः. क्रमात्ते पंचापि चतुर्दशपूर्वलक्षाणि दीक्षां पालयित्वा युरंते मृत्वा सर्वार्थसिद्धिश्रियमशिश्रियन्.

अस्मिन् जंबूद्वीपे दक्षिणार्धभरते गंगासिंधुमध्यवर्तीक्ष्वाकुभूमौ तृतीयारकपर्यंते चतुरशीतिपूर्वलक्षेषु शेषेषु किंचिदधिकेषु श्रीवज्रनाभस्य जीवः सर्वार्थसिद्धिविमानतस्त्रयस्त्रिंशत्सागरोपमसंमितायुर्भुक्त्वा कृष्णाषाढचतुर्थ्यां नाभिकुलकरमरुदेवाकुक्षौ समवातरत्. प्रभोस्तत्राद्भुतेऽवतारे भुवनत्रयं क्षणध्वस्तध्वांतं शांतदुःखं चाभूत. तथा सा मरुदेवा भगवती जिनजन्मसूचकांश्चतुर्दश महास्वप्नानद्राक्षीत्. ततः परिपूर्णेषु दिनेषु श्यामचैत्राष्टमीदिने उत्तराषाढास्थिते चंद्रे सा मरुदेवी युगलधर्मेण सुतरत्नमसूत. समागता देवा देव्यः, कृतो जन्ममहः, वृषभलांछनत्वाद्वृषभ इति नाम पितरौ चक्रतुः. सुरस्त्रीभिः पाल्यमानोऽसौ वृद्धिं दधौ. ततो देवदेवीपरिवृतः स उत्तरकुरुद्रुवैर्दिव्यैः फलभोजनैरप्रीयत, नंदनवने कल्पपादप इव ववृधे. क्रमेण स रूपसौभाग्यलावण्यपावनं यौवनं ययौ. ततः सुनंदा १ सुमंगला २ चेत्युभे रतिप्रीतिनिभे कन्यके शक्रेण परिणायिते. स्वाम्यपि त्र्यशीति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वलक्षाणि यावद्भोगफलोदयमवधिज्ञानेन ज्ञात्वा परिणीतवान्. स्वामिनो जन्मतः षट्पूर्वलक्षेषु गतेषु तौ बाहुपीठयोर्जीवौ सर्वार्थसिद्धितश्च्युतौ सुमंगलागर्भे समागतौ. सा सुमंगलादेवी च चतुर्दश स्वप्नानद्राक्षीत. सुनंदापि तदानीं तौ सुबाहु १ महापीठजीवौ दिवश्च्युतावुदरे दधौ. ते द्वे अपि पत्न्यौ प्रीते युग्मं प्रसूते. सुमंगलायाः सुतस्य भरत इति, पुत्र्या ब्राह्मीति, सुनंदायाः सुतस्य बाहुबलीति, पुत्र्याश्च सुंदरीति नामानि दत्तानि. पुनरेकोनपंचाशत्पुत्रयुग्मानि सुमंगलासूत. एवं क्रमेण विंशतिपूर्वलक्षेषु गतेषु सौधर्मेंद्रेण स राज्ये स्थापितः. ततस्त्रिषष्टिलक्षपूर्वाणि स राज्यश्रियं बुभुजे. ततो भरतस्य राज्यं दत्वा, सांवत्सरिकं दानं च दत्वा स्वामी दीक्षां जग्राह. ततः प्रभुरप्यनार्यदेशेषु विहृत्य वर्षसहस्रांते पुरिमतालाख्येऽयोध्यापुर्यासन्नशाखापुरे शुक्लध्यानधनः केवलज्ञानमवाप. तदासनकंपेन वासवास्तत्र समीयुः. तैश्च चमत्कारिसमवसरणमकारि. ऋषभजिनः पूर्वद्वारेण प्रविश्य तीर्थं नत्वा सिंहासनं भेजे, सभालोकेषु यथास्थानं निविष्टेषु वासवो जिनं प्रदक्षिणीकृत्य स्तोत्रैः स्तुत्वा कृतकृत्यः प्रभोरुपासनाहेतोरासन्नस्थानमासदत. इतश्च भरतो भक्तिभरतो भगवंतं नंतुमनास्तत्रागतः, सुधारससोदरां स्वामिनो देशनां श्रुत्वा स्वगृहमागत्य चक्रस्याष्टाह्निकोत्सवं कृत्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षट्खंडं साधयितुं प्राचलत्. ततः षष्टिवर्षसहस्राणि देशान् साधयन्नेकं वर्षसहस्रं गंगाया गृहे स्थितः, तया सह च जरतो दिव्यान् जोगान् बुभुजे. ततो देशान् साधयित्वा स गृहे समागात्. एवमसमां चक्रिपदवीं पालयतो भरतस्य किंचिन्न्यूनानि पंचलक्षपूर्वाण्यतीतानि.

एकस्मिन् दिने जरतनृपालो जोजनानंतरं कृतशृंगार आदर्शगृहे स्ववपुरालोकनकृते गतः, पतितमुद्रिकामंगुलीं विरूपां दृष्ट्वा ततोऽन्यान्यप्याजरणान्यपनीय यावता विरूपं स्वं वपुरालोकयति तावता जावनारूढो जगवान् जरतः संसारासारतां चिंतयति, यथा—नित्यमित्रसमो देहः । स्वजनाः पर्वसन्निजाः ॥ नमस्कारसमो ज्ञेयो । धर्मः परमबांधवः ॥ १ ॥ यत्प्रातः संस्कृतं धान्यं । मध्याह्ने तद्विनश्यति ॥ तदीयरसनिष्पन्ने । काये का नाम सारता ॥ २ ॥ सुस्वादून्नन्नपानानि । क्षीरेक्षुविकृतीरपि ॥ जुक्तानि यत्र विष्टायै । तच्छरीरं कथं शुचि ॥ ३ ॥ अन्यक्तोऽपि विलिप्तोऽपि । धौतोऽपि घटकोटिजिः ॥ न याति शुचितां कायः । शुंजाघट इवाशुचिः ॥ ४ ॥ इदं शरीरं परिणामदुर्बलं । पतत्यवश्यं श्लथसंधिजर्जरं ॥ किमौषधैः क्लिश्यसि मूढ दुर्मते । निरामयं धर्मरसायनं कुरु ॥ ५ ॥ इत्यादिजावनां जावयन् स केवलज्ञानमवाप, समागता देवाः, समर्पितः साधुवेषः, अन्यू-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नं पूर्वलब्धं केवलित्वे विहृत्याष्टापदे स मोक्षमगमत्. इत्थं मुनिवरदानं । पूर्वभवे भरतचक्रिणा दत्तं ॥ प्रवरं पुण्यनिदानं । मोक्षार्थं कुरुत भो भविकाः ॥ १ ॥ इति दानविषये भरतेश्वरकथानकं समाप्तं. मुनीनामथौषधदानफलमाह—

॥ मूलम् ॥—मुल्लं विणावि दाउं । गिलाणपडिअरणजोगवत्थूणि ॥ सिद्धो अ रयणकंबल—चंदणवणिउव्वि तंमि भवे ॥ ८ ॥ व्याख्या—' मुल्लं विणेत्ति ' राजपुत्रादिभ्यो मूल्यं विनापि, अपिरवधारणार्थः, तेन मूल्यं विनैवेत्यर्थः, ' दाउं ' दत्वा कानि ग्लानप्रतिचरणयोग्यवस्तूनि, ग्लानो गलत्कृमिकुष्ठव्याप्तदेहो मुनिस्तत्प्रतिचर्यायोग्यवस्तूनीत्यर्थः. ' सिद्धोत्ति ' सिद्धः शिवं प्राप्तः, ' रयणकंबलत्ति ' रत्नकंबलचंदनदानोपलक्षितो वणिगित्यर्थः, इति गाथार्थः ॥ ८ ॥ विस्तरार्थस्तु कथानकादवसेयः, तत्कथा चेयं—

ऋषभदेवजीवो नवमभवे जंबूद्वीपे विदेहक्षेत्रमंडने क्षितिप्रतिष्ठितपुरे सत्कर्मकर्मठः सुविधेर्वैद्यस्य जीवानंद इति नाम्ना सूनुर्बभूव, तन्नगराधीशेशानचंद्रस्य राज्ञः कांतायां कनकवत्यां जातो महीधरनामा पुत्रोऽस्ति १, तत्रैव नगरे सुनासीरस्य मंत्रिणो लक्ष्म्यां पत्न्यां जातः सुबुद्धिनामा मं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रिपुत्रोऽस्ति २, तत्रैव नगरे धन्यश्रेष्टिपत्न्यां शीलवत्यां जातो गुणाकरनामा पुत्रोऽस्ति ३, तत्रैव नगरे सार्थपतेः सागरदत्तस्याभयमत्यां पत्न्यां जातः पूर्णभद्र इति नामा पुत्रोऽस्ति ४, तत्रैव नगरे ईश्वरदत्तस्य श्रेष्टिनः केशवनामा सुतोऽस्ति ५. एतेषां पंचानामपि समानगुणशालिनां जीवानंदेन वैद्येन समं मैत्र्यमभूत्. एकस्मिन् दिने ते पंचापि मित्राणि वैद्यगृहे संगताः क्रीडंतिस्म, तावता कश्चित्साधुर्माधुकरीं भिक्षां कुर्वंस्तेषां नेत्रपथं ययौ, तं कुष्टिनं साधुं वीक्ष्य महीधरो राजपुत्रो जीवानंदं वैद्यपुत्रं तिरस्करोति. यथा भिषजां जन्म धिगस्तु, ये लोभग्रहग्रस्ता धनांधितधियो धनिनामेव प्रतिक्रियां कुर्वंति, न चेदृशां साधूनामुपकारं कुर्वंति, एतद्वचनं श्रुत्वा जीवानंदो जगाद, हे राजेंदुनंदन! त्वं युवापि वृद्धबुद्धिर्वर्तसे, त्वया युक्तमुक्तं, परं कथं क्रियते वैयावृत्त्यं? वस्तुत्रयं प्रत्येकं दीनारलक्षेण लभ्यते, तेषु वस्तुषु लक्षपाकाख्यं तैलं मद्गृहेऽस्त्येव, परं गोशीर्षचंदनं रत्नकंबलं च नास्ति, एतद्वैद्यवचनं श्रुत्वा ते पंचापि मित्राणि हट्टश्रेण्यां गत्वा कंचिन्महेभ्यश्रेष्टिनमूचिरे, भोः श्रेष्टिन्! दीनारलक्षाभ्यां गोशीर्षचंदनं रत्नकंबलं च देहि? श्रेष्टिनोक्तं भो कुमारकाः! आभ्यां भवंतः किं कर्तुमिछवः? तैरुक्तं रोगिणो मुनेश्चिकित्सां कर्तुकामा वर्तामहे. तेषां कुमाराणा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेतद्वचनं श्रुत्वा विस्मयस्मेरमानसः श्रेष्ठी सादरं जगाद. भोः कुमारकाः! यूयं धन्याः, ये कुष्टरोगाभिभूतस्य मुनेर्वैयावृत्त्यं कुरुथ, मुनेर्वैयावृत्त्यं राज्येनापि न लभ्यते. यतः पुण्यनिदानानि दानानि कोटिशः संति, तानि सर्वाणि दानान्यारोग्यदानस्य समानतां न लभंते. भो कुमारकाः! तस्मात्कारणाद्यूयं मूल्यं विनैवौषधं गृह्णीत? इत्युक्त्वा श्रेष्ठी रत्नकंबलचंदने तेभ्यः समर्पयामास. ततस्ते कुमारकाः शुभशकुनैः प्रेर्यमाणा जीवानंदेन वैद्येन समं मुनेरनुपदं ययुः. स साधुर्न्यग्रोधवृक्षाधोभागे बाह्योद्याने गत्वा ध्याने तस्थौ. ततो वैद्यपुत्रो जीवानंदो मुनिमनुज्ञाप्य सर्वेषां पश्यतां तेनौषधेन चिकित्सां करोति. तावदादौ मुनिवपुस्तैलेनाभ्यंग्य रत्नकंबलमवेष्टयत्. तैलतापेन व्याकुलास्तन्मुनिशरीराद्भिःसृताः कृमयः शीतलत्वाद्रत्नकंबले व्यलगन्. ततस्तान् कृमीन् मृतकगोकलेवरे दयापरो जीवानंदः पातयामास. ततो गोशीर्षचंदनस्पंदैः शीतलैः शमिनस्तापं शमयामास. एवं त्रीन् वारान् विधाय मांसास्थिगतान् जीवान्निःकास्य जीवानंदो गोशबे पातयामास. कैश्चिद्दिनैः साधुश्चामीकरसमच्छविर्जातः. तैः क्षमितो नववपुः स साधुः स्वस्थचित्तो विहारायान्यत्र ययौ. श्रेष्ठ्यपि भैषज्यदानप्रभाववैभवात्तस्मिन्नेव भवेंतकृत्केवली भूत्वा मोक्षं ययौ. ते कुमाराः शेषकंबलगोशीर्षचं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दने विक्रीय तैः कांचनैः स्वेन लब्धद्रव्येन च सम्यग् जिनप्रासादं कारयामासुः. कियता कालेन संयमं प्राप्य सम्यग्भावनां भावयंतस्ते षडप्यच्युते कल्पे द्वात्रिंशत्सागरायुषस्त्रिदशश्रियं शिश्रियुः. इत्थं चंदनकंबल—दायकवणिजाशु केवलं लब्धं ॥ साधुजनेभ्यो भविका । दत्तं दानं भवेच्छिवदं ॥ ॥१॥ इत्यौषधदानविषये चंदनकंबलदायकवणिक्कथानकं समाप्तं. अथ साधुभ्यः परमान्नदानफलमाह—

॥ मूलम् ॥—दाऊण खीरदाणं । तवेण सुसिअंगसाहुणो धणिअं ॥ जणजणिअचमक्कारो । संजाओ सालिभद्दोवि ॥ ९ ॥ व्याख्या—'दाऊणत्ति' दत्वा क्षीरदानं परमान्नदानं, कस्मै? तवेण सुसिअंगत्ति तपसा षष्ठाष्टमाद्यनेकभेदेन शोषितांगसाधवे, अत्र चतुर्थ्यर्थे षष्ठी, 'धणिअंति' अतिशयेन तेन क्षीरदानपुण्येन द्वितीयभवे शालिभद्रोऽपि संजातः, अपिशब्दः समुच्चये, कथंभूतः? 'जणजणिअत्ति' जनजनितचमत्कारो जनानां जनित उत्पादितश्चमत्कारो येन स तथेति गाथार्थः. ॥ ९ ॥ विस्तरार्थस्तु कथानकादवसेयः, तत्कथा चेयं—

काचिच्छिन्नवंशका धन्येति नाम्ना योषित्संगमकनाम्ना बालेन समं राजगृहासन्नशालिग्रामे समाययौ, स धन्यासुतः संगमको बालको ग्रामलोकानां वत्सरूपाण्यचारयत, यतो रोरबालानामियं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मृडजीविका. अथान्यदा सोऽर्भकः कस्मिंश्चिदुत्सवे संजाते गृहे गृहे पायसं भुज्यमानमपश्यत्, सोऽपि बालो गृहे गत्वा जननीपार्श्वे पायसं ययाचे, जननी जगाद भो पुत्रक! अहं दरिद्रास्मि, अतो मद्गृहे पायसं कुतो भवति? तेन बालेन पुनः पुनर्याच्यमाना सा निजं भर्तारं पूर्वसंपदं च स्मरंती तारं तारं रुरोद. तां रुदंतीं वीक्ष्य प्रातिवेश्मिकीनार्यो दयार्द्रहृदयाः समागत्य दुःखकारणं पप्रच्छुः, सा संगमजननी ताभ्यो गद्गदाक्षरं दुःखकारणमभ्यधत्त, यथा बालोऽयं पायसं याचते, किं करोम्यहमभाग्या? तत् श्रुत्वानुकंपातस्ता नार्यो दुग्धादिसर्वं तस्यै ददुः. संगमजननी तैरेयीं निष्पाद्य स्थालं भृत्वा संगमकस्यार्पयित्वा केनचित्कार्येण गृहांतर्गता. अथ संगमकः प्रकृष्टं परमान्नं परिवेशितं कदाचिदपरिभुक्तं हस्तप्राप्तं दृष्ट्वात्युत्कृष्टपुण्यप्रेरितश्चिंतयति, मम पुण्यप्रेरितो यदि कश्चित्साधुः समभ्येति, तदाहं तस्य तद्दत्वा शेषान्नं भुंजे तदा वरं, एवं स यावता चिंतयति तावता कश्चित्साधुर्मासमुपोषितः पारणकार्थं संगमकस्य गृहे मूर्तिमान् धर्म इव समागात, स चिंतयति ममाद्य भाग्यं फलितं, यन्मम गृहे एष साधुः समागतः, यतः—साधु साधु महासाधु—मद्भाग्यैरयमायया ॥ कुतोऽन्यथा वराकस्य । ममेदृक्पात्रसंगमः ॥ १ ॥ भाग्योदयेन केनापि । ममाद्य समप-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्यत ॥ चित्तं वित्तं च पात्रं च । त्रिवेणीसंगमो ह्ययं ॥ २ ॥ इति शुद्धभावनां भावयन् संगमकः पायससंभृतं स्थालं समुत्पाट्य समुत्तस्थौ, साधुरप्यनुग्रहबुद्ध्या पात्रं दधौ, सोऽपि निस्तीर्णोऽस्मीति बुद्ध्या साधवे सर्वं ददौ, करुणापरो मुनिस्तदन्नं गृहीत्वा वने ययौ, पारणकं कृत्वा च स्वस्थमनास्तस्थौ, समागता धन्या, मेने भुक्तमनेन, तत्पुनः पायसं ददौ, सोऽप्यतृप्तः पायसमाकंठं यावद् बुभुजे, परं तदन्नं तस्य यामिन्यां न जीर्णं, ततो विशूचिका जाता, स संगमः साधुदानं स्मरन् व्यपद्यत. तेन साधुदानप्रभावेण राजगृहे नगरे गोभद्रश्रेष्ठिनो भार्याया भद्राया उदरे स पुत्रत्वेनाभवत. ततः सा शालिक्षेत्रं सुनिष्पन्नं स्वप्नेऽपश्यत. तं स्वप्नं च सा भर्तुः शशंस. भर्त्रोक्तं तव वरीयान् पुत्रो भावी.

ततः सा भद्रा गोभद्रश्रेष्ठिना संपूर्यमाणदोहदा पूर्णे काले भडकरं द्युतिद्योतितदिङ्मुखं तनयरत्नमसूत. सुनिष्पन्नशालिक्षेत्रस्वप्नानुसारेण तस्य सूनोः शुभे दिने पितरौ शुभां शालिभद्र इत्यभिधां चक्रतुः. स पंचभिर्धात्रीभिः परिपाल्यमानः क्रमाद्ववृधे. क्रमात्किंचिदूनाष्टवर्षीयः पित्रा कला अध्यापितः. क्रमेण मित्रैः सह क्रीडन् संप्राप्तयौवनो युवतीजनमनोनयनानंदकरो मेरुभूमौ क-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ल्पशाखीव स ववृधे. अथैकदा तत्पुरश्रेष्टिनो निजा द्वात्रिंशत्कन्याः शालिजद्राय प्रदातुं गोजद्रश्रेष्टिनं ययाचिरे. तेषां श्रेष्टिनां वचनं श्रुत्वा प्रहृष्टो गोजद्रः शालिजद्रेण सार्धं ताः कन्यका महामहेन पर्यणाययत्. शालिजद्रो विमानसदृशे मंदिरे ताजिः सार्धं विललास. देववधूजिः समं देव इव स शालिजद्रः सर्वानंदमग्नो रात्रिदिवसयोरंतरं न विवेद. यतस्तस्य जोगसामग्रीं स्वयं तत्पिता पूरयतां. एकस्मिन् दिने श्रीमन्महावीरवाणीं श्रुत्वा संजातवैराग्यः श्रेष्टी गोजद्रो वीरपादमूले व्रतं गृहीत्वा सम्यगाराध्य प्रांते विधिनानशनं कृत्वा देवलोकं जगाम. अवधिज्ञानतो गोजद्रश्रेष्टिदेवः शालिजद्रं निजात्मजं ज्ञात्वा तत्पुण्यावर्जितः पुत्रवात्सल्यतत्परोऽजूत्. तेन सोऽनुवासरं कल्पशाखीव दिव्यानि वस्त्रनेपथ्यसुगंधकर्पूरादीनि सजार्यस्य शालिजद्रस्यार्पयामास. इदं पूर्वदत्तफलं, यतः—
श्रीनाजेयजिनेश्वरो धनभवे श्रेयः श्रियामाश्रयः। श्रेयांसः स च मूलदेवनृपतिः सा नंदना चंदना ॥ धन्योऽयं कृतपुण्यकः शुजमनाः श्रीशालिजद्रस्तथा। सर्वेऽप्युत्तमदानदानविधिना जाता जगद्विश्रुताः ॥ १ ॥ अन्नदातुरधस्तीर्थ—करोऽपि कुरुते करं ॥ तच्च दानं जवेत्पात्र—दत्तं बहुफलं यतः ॥ २ ॥ एवंविधं सुपात्रे दत्तं दानं फलितं शालिजद्रस्य. यत्किंचिद् गृहोचितं कार्यं जवति तत्सर्वं

For Private And Personal Use Only

भद्रकारिणी भद्रा करोति, शालिभद्रः केवलं पूर्वदानफलमेव भुंक्ते.

अन्येद्युः केचन वणिजो रत्नकंबलविक्रयार्थं श्रेणिकनृपाय तन्मूल्यं कथयित्वादर्शयन्. श्रेणिकोऽपि तान् महर्घ्यान् ज्ञात्वा नाग्रहीत्. ततस्ते वणिजः शालिभद्रनिकेतनं जग्मुः. तांश्च रत्नकंबलांस्तदुक्तमूल्येन भद्राग्रहीत्. एतद् वृत्तांतं ज्ञात्वा श्रेणिकपट्टराज्ञी चेल्लणा श्रेणिकपार्श्वे रत्नकंबलं ययाचे. स्वामिन् महामूल्योऽपि कंबलो मद्योग्य एको गृह्यतां? ततो राज्ञा यथोक्तमूल्येन वणिजां पार्श्वे एको कंबलो मार्गितः, तैरुक्तं ते सर्वेऽपि कंबला भद्रया गृहीताः, ततो राज्ञा चिंतितं भद्रया वाणिज्यार्थं गृहीता भविष्यंति, अतोऽहं तत्पार्श्वादेकं गृहीतमूल्येन समानयामीति विमृश्य श्रेणिक एकं प्रवीणपुरुषं मूल्यदानात्कंबलादानहेतवे भद्रापार्श्वे प्राहिणोत्, तेन गत्वा भद्रा याचिता, भो भद्रे रत्नकंबलं देहि? राज्ञा मूल्यदानेन मार्गितमस्ति, भद्रोचे भो भद्र! ते तु रत्नकंबलाः षोडशापि द्विधा द्विधा कृत्वा शालिभद्रप्रियापादप्रोंछनीकृत्य त्यक्ताः, तत्त्वं राज्ञोंतिके गत्वा कथय? यदि तेन कार्यं भवति तर्हि राजानं पृष्ट्वामून् गृहाण? तेन गत्वा राज्ञोऽग्रे तथैव विज्ञप्तं. एतद्वचनं श्रुत्वा चेल्लणा राजानं कथयति, राजन्नस्माकं वणिजां चांतरं पश्य रीरीहेम्नोरिव? चिंतितं राज्ञा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तं शालिभद्रं भद्राकृतिं पश्यामि. ततो राज्ञा तन्माता भद्रा समाकारिता, समागता भद्रा, प्रोक्तं राज्ञा भो भद्रे! तव पुत्रं शालिभद्रं दर्शय? तयोक्तं राजेंद्र! ममात्मजः शालिभद्रः कदाचिदपि बहिर्न याति, गृहांतरे क्रीडति, अतो हे देव! गृहागमनेन ममानुग्रहः क्रियतां? श्रेणिकोऽपि कौतुकविलोकनकृते तत्तथा प्रत्यपद्यत, 'कियत्कालावधिं विधाय भद्रा गृहं गता, ततः सा भद्रा स्वगृहाद्राजगृहं यावद्विचित्ररत्नमणिमाणिक्यमंडितां हर्म्यश्रेणिं हट्टशोभां च विधाय राजानमाकारयामास, तयाहूतो राजा मंत्र्यादिभिः परिवृतो मार्गे गृहाट्टशोभां मार्गशोभां चालोकयन् शालिभद्रवेश्म ययौ. तत्कीदृशं?—स्वर्णस्तंभोपरि प्रेंख—दिंद्रनीलाश्मतोरणं ॥ मौक्तिकस्वस्तिकश्रेणि—दंतुरद्वारभूतलं ॥ १ ॥ दिव्यवस्त्रकृतोल्लोचं । सुगंधद्रव्यधूपितं ॥ भुवि दिव्यविमानानां । प्रतिमानमिव स्थितं ॥ २ ॥ वीक्षामीशः श्रेणिको विस्मयस्मेरलोचनस्तद्वेश्म विवेश, क्रमेणैकां भूमिकां समारूढः, एवं द्वितीयां तृतीयां यावच्चतुर्थीं भूमिं गत्वा सिंहासने उपाविशत. ततो भद्रा सप्तम्यां भुवि शालिभद्रांतिके गत्वैवमवोचत, हे पुत्र! श्रेणिक इहायातोऽस्ति, त्वमागत्य तं विलोकय? ततः शालिभद्रः श्रेणिकनामकं क्रेतव्यं वस्तु भावीति मत्वा मातरमुवाच, हे मातस्त्वं यन्मूल्यं जानासि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्कारय? अत्रार्थे त्वमेव प्रमाणं, किं मम प्रश्नेनेति. ततो भद्राप्येवमुवाच, हे वत्सेदं वस्तु क्रेतव्यं नास्ति, किंत्वसौ सर्वलोकनाथो विश्वविख्यात आवयोः स्वामी श्रेणिको राट्, तत् श्रुत्वा सविषादः शालिभद्र एवमचिंतयत, धिक् सांसारिकं सुखं! यन्ममाप्युपरि राजान्यो वर्तते, ततो मया किं तपस्तप्तं? अथाहं श्रीवीरचरणांतिके दीक्षां गृहीष्यामि. अलं पारवश्यविवशैर्भोगादिभिः, दुःखानुविद्धैः सांसारिकैः सुखैरिति.

एवं संवेगयुक्तोऽपि मातुरुपरोधतो भार्यासहितो राजानमभ्येत्य विनयान्वितोऽनमत्, राज्ञा श्रेणिकेन शालिभद्रोंके निवेश्य सस्वजे, श्रेणिकोत्संगसंस्थं बालं शालिभद्रमग्निसंयोगे मदनपिंडमिव विलीयमानं वीक्ष्य राजानंप्रति भद्रा जगाद देवायं मुच्यतां? यतोऽयं मनुष्योऽपि मानुष्यमाल्यगंधेन बाध्यते, यतो देवभूमौ गतोऽस्य जनकः सभार्यस्यास्य दिव्यनेपथ्यवस्त्रांगरागादि प्रतिवासरं दत्ते. ततो राज्ञा विसृष्टः शालिभद्रः सप्तमभूमिकां ययौ, भद्रया प्रोक्तो नृपः स्वामिन्नद्यात्रैव भोक्तव्यमिति. भद्रादाक्षिण्यतस्तत्प्रतिपन्नवान्. ततस्तत्रैव गृहवाप्यां स्नानं कृतवतो नृपस्य हस्तादंगुलीयकं वाप्यंभसि पपात, भूपतिस्तदितस्ततो यावदन्वेषयामास तावद्भद्रा दासीं समादिशत, भो स-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खि! वाप्यं भोऽन्यत्र त्यज्यतां? यथा राज्ञो मुद्रिका प्रकटीभवति, दास्या तथैव कृते दिव्याभरणमध्यगमंगाराभं स्वांगुलीयं वीक्ष्य राजा विसिष्मिये, किमेतदिति राज्ञोक्ते दास्यवोचत, यथा—न भुक्तं देवदेवस्य। न भुक्तं यच्च चक्रिणः॥ सुवर्णमपि निर्माल्यं। नान्यस्य मत्प्रभुं विना॥ १॥ हे राजेंद्र! सद्भार्यस्य शालिभद्रस्येह निर्माल्यं निक्षीयते. तान्याभरणानि समालोक्य राजा चिंतयति, एष शालिभद्रो धन्यः, अहमपि धन्यो यस्य राज्ये व्यवहारिण ईदृशाः संति. ततः श्रेणिकस्तत्र सपरिवारो बुभुजे. भोजनानंतरं भद्रया स वस्त्रालंकरणादिभिः सत्कारितः, पुष्पादिभिः पूजितः स्वगृहं ययौ. वैराग्यवासनया वासितः शालिभद्रो यावता गृहे तिष्ठति तावता धर्ममित्रेणागत्य विज्ञप्तं हे मित्र! चतुर्ज्ञानधरः सुरासुरनमस्कृतो मूर्तिमान् धर्म इव धर्मं द्योतयन् धर्मघोषाभिधो मुनिर्महात्मा विचरन्निहोद्याने समागतः. ततः शालिभद्रो हर्षादुच्छ्वसितरोमकूपो रथं समारुह्य गुर्वंतिके गत्वा प्रदक्षिणां दत्वा वंदित्वा यथावग्रहे समुपाविशत. धर्मघोषगुरुरपि तं शालिभद्रं धर्मार्हं ज्ञात्वा धर्मदेशनां करोति, यथा—अथिरेण थिरो समलेण। निम्मलो परवसेण साहीणो॥ देहेण जइ विढप्पइ। धम्मो ता किं न पज्जत्तं॥ १॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादिदेशनां श्रुत्वा शालिभद्रो धर्मघोषाचार्यमपृछत्. भगवन्! केन कर्मणा प्रभुरन्यो न जायते? भगवानुवाच भो महाभाग! ये जना भगवद्दीक्षां गृह्णंति यथाविधि च पालयंति तेऽन्यजन्मन्यशेषस्यापि जगतः स्वामिभावं भजंति. यद्येवं तर्हि हे नाथाहं गृहे गत्वा निजां मातरमापृच्छ्य त्वदंतिके व्रतं ग्रहीष्यामीत्युक्त्वा यावता गृहे याति तावता मुनिनोक्तं भो भद्र! एतदर्थे नो प्रमादो विधेय इति निशम्य शालिभद्रो गृहे ययौ. मातरं नत्वा च स विज्ञपयति हे मातर्मया धर्मघोषाचार्यसमीपे विश्वदुःखविमोचको मोक्षसुखदायकश्च जिनोक्तो धर्मः श्रुतः. एतद्वचनश्रवणानंतरं भद्रा बभाषे हे भद्र! त्वं साध्वकार्षीः, त्वं तस्य पितुर्नंदनोऽसि. इति स्तुतिं कृत्वा भद्रा यावता स्थिता तावता पुनः शालिभद्रो जगाद, हे अंब! मयि प्रसीद. तवाज्ञयाहं व्रतं ग्रहीष्यामि. साप्यवादीद्वत्स! तवैतद्युक्तं यत्त्वं तातानुपदिको भवसि. परमत्र निरंतरं मदनदंतैर्लोहमयाश्चणकाश्चर्वणीयाः. अतः प्रकृत्यातिसुकुमारो दिव्यैर्भोगैश्च लालितस्त्वं व्रतभारं कथं वोढुं समर्थो भविष्यसि? तदा शालिभद्रो मातरंप्रत्युवाच हे मातर्भोगलालिताः कष्टासहाः कातरा एव, नेतरे, अतो मामनुमन्यस्व? यथाहं दीक्षाग्रहणाय सज्जो भवामि. पुनर्भद्रा बभाषे वत्स! यदि तव व्रतेछा भव-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ति तर्हि शनैः शनैरेकैकां पुष्पशय्यां सस्त्रीकां त्यज? पश्चाद् व्रतं गृह्णीयाः. तद्दिनादारभ्य शालिभद्रः प्रत्यहमेकैकां शय्यां भार्यासहितां त्यजति.

इतश्च तस्मिन्नगरे धन्यनामा महाधनः शालिभद्रकनिष्ठभगिनीपतिर्वर्तते. सा शालिभद्रस्वसा साश्रुर्धन्यं स्नपयंती धन्येन पृष्टा, भोः सुभ्रु! किं रोदिषि? तव किं दुःखस्य कारणं? गद्गदाक्षरं सा जगाद हे स्वामिन्! मे भ्राता व्रतं गृहीतुकामो दिने दिने सतूलिकामेकैकां भार्यां त्यजति. धन्येनोक्तं तव भ्राता फेरुरिव भीरुर्हीनसत्वश्च, यत्समंतात्सर्वं न त्यजतीति. एतद्वचनं श्रुत्वा शालिभद्रस्वसा धन्यं प्रत्याह हे नाथ! व्रतं चेत्सुकरं भवति तर्हि स्वयं किं न करोषि? एवं सहासमन्याभिरपि भार्याभिर्जगदे. धन्योऽप्यूचे अत्रार्थे भवत्य एव विघ्नरूपाः, पुण्ययोगतो भवतीभिश्चानुमतं, अथाहं द्रुतं प्रव्रजिष्यामि. ता अप्यूचुः स्वामिन्निदमस्माभिर्नर्मणोदितं, मास्मत्त्वादृशीः श्रियोऽस्मांश्च. धन्येनोक्तं स्त्रीधनाद्यनित्यं नित्यपदेच्छया त्याज्यमेव. अतोऽहमवश्यं प्रव्रजिष्यामीत्यालपन् धन्य उत्थितः. ताः स्त्रियोऽपि धन्येन सार्धं प्रव्रजितुकामास्त्वया समं प्रव्रजिष्याम इत्युक्तवंत्यो धन्येनानुमताः. तस्मिन् समये वैभारगिरौ श्रीवीरः समवासरत्. वीरं समवसृतं ज्ञात्वा धन्यः सभार्यो भगव-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दंतिके दीक्षामग्रहीत. तत् श्रुत्वा शालिभद्रोऽपि शिबिकारूढो दत्तदानः सभार्यः श्रीमहावीरपादमूले उपेत्य व्रतमग्रहीत्. ततः सपरिवारः सिद्धार्थनंदनः श्रीवीरो विहरन्नन्यतो ययौ. तौ धन्यशालिभद्रौ साधूपांते पठंतौ बहुश्रुतौ जातौ, खड्गधारासहोदरं व्रतं पालयंतौ चतुर्थषष्ठाष्टमपक्षक्षपणमासक्षपणद्विमासक्षपणत्रिमासक्षपणचतुर्मासक्षपणादितपः कुर्वाणौ शरीरनिरपेक्षौ पारणं चक्रतुः. तौ साधू तेन महत्तपसा निर्मांसरुधिरांगकौ चर्मभस्त्रोपमौ समजायतां.

अन्येद्युः श्रीमहावीरस्वामिना सह विहरंतौ तौ महामुनी निजां जन्मभुवं राजगृहं पुरमाजग्मतुः, ततो राजगृहपुरात्समवसरणस्थितं जगत्पतिं नंतुं जना ईयुः. अथ मासक्षपणपारणके धन्यशालिभद्रौ भिक्षार्थं गंतुकामौ भगवंतं प्रणेमतुः, ततः स्वामिना प्रोक्तं मातृपार्श्वे तेऽद्य पारणं भविष्यतीति. इच्छामीति भणन् शालिभद्रो धन्ययुतो ययौ, तावुभावपि भद्रागृहद्वारि गत्वा तस्थतुः, तौ तपः क्षामतया केनापि नोपलक्षितौ, भद्रापि श्रीवीरं शालिभद्रं धन्यं च वंदितुं गंतुमत्युत्सुका व्याकुला तौ नाज्ञासीत. तत्र तौ क्षणमेकमवस्थाय प्रतिजग्मतुः, तदानीं तस्मिन् पुरे प्रतोल्यामुखे दधिसर्पिषी विक्रेतुं यांती शालिभद्रस्य प्राग्जन्ममाता पुरोऽभवत्, सा शालिभद्रं प्रेक्ष्य संजातप्रस-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वस्तनी भक्त्या तच्चरणौ वंदित्वा ताभ्यामपि दधि ददौ, तौ च वीरस्यांतिके गतौ. तदालोच्य शालिभद्रो मुनिरवदत, स्वामिन्! मातृतः पारणं कथं जातं? पारणार्हं दधि त्वाभीर्या दत्तमिति. स्वामिनोक्तं हे शालिभद्रमहामुने! एषा तव प्राग्जन्ममाता धन्या, एतदेव सत्यं जानीहि? नान्यथेति. एतद्वीरवाक्यं श्रुत्वा दध्ना तावपि पारणकं कृत्वा स्वामिनमापृच्छ्य वैभारार्डिं तौ धन्यशालिभद्रौ ययतुः, एकस्यां शिलायां प्रतिलेखितायां तौ धन्यशालिभद्रौ पुनर्व्रतारोपणालोचनपूर्वं पादपोपगमं नामानशनमाश्रयतां, तदा भद्रा तन्माता श्रेणिकश्च नरेंद्रस्तावुभावपि भक्तियुक्तौ श्रीवीरचरणांतिके समाजग्मतुः, स्वामिनं नत्वा भद्रा बभाषे, हे स्वामिंस्तौ धन्यशालिभद्रमुनी मद्गृहे भिक्षार्थं कथं नागतौ? सर्वज्ञो बभाषे, तौ मुनी त्वद्वेश्मनि समागतौ, परं भवत्येहागमनव्यग्रचित्तया तौ न ज्ञातौ, प्राग्जन्ममाता धन्याभीरी पुरंप्रति यांती तयोर्दधि ददौ, तेन च तौ पारणं चक्रतुः. ततस्तौ महासत्वौ भवं त्यक्तुकामौ सत्वरौ वैभारगिरिपर्वते गत्वानशनं चक्रतुः. इमां वीरगिरं श्रुत्वा भद्रा श्रेणिकेन समं वैभारार्डिं ययौ. भद्रा शालिभद्रजननी तौ तथास्थितौ पाषाणघटिताविव निश्चलावपश्यत्, भद्रा तत्पूर्वसुखानि स्मरंती पुत्रस्य तत्कष्टं च पश्यंती तरूनपि रोदयंत्य·

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रोदीत्, हे पुत्र! त्वं गृहमागतोऽपि मया मंदभाग्यया न ज्ञातः, अथैकवारं ममाभिमुखं पश्य? एवं बहु बहु प्रोच्यमानोऽपि शालिभद्रो भद्राभिमुखं नापश्यत्. अथोचे श्रेणिको हे भद्रे! हर्षस्थाने सृतं विषादेन, धन्या त्वं यतोऽसौ तव पुत्रो जगत्स्वामिशिक्षानुरूपं तपस्तपते. मुग्धे! किं त्वया स्त्रीस्वभावतो मुधानुतप्यते? एवं बोधिता भद्रा तावुभौ मुनिवरौ प्रपन्नानशनौ नत्वा विमनस्का निजं धाम जगाम, श्रेणिकोऽपि स्वस्थचित्तः स्वस्थानमागमत्. तावुभौ मुनिवरौ प्रपन्नावसानौ सर्वार्थसिद्धिविमाने देवावभूतां, त्रयस्त्रिंशत्सागरायुष्कौ तौ द्वावपि ततश्च्युत्वा मोक्षं यास्यतः. इत्थं श्रीशालिभद्रेण। क्षीरदानप्रभावतः॥ लब्धं सौख्यं महोत्कृष्ट—मिहामुत्र सुखप्रदं॥ १॥ यत्सुखं न हि देवस्य। देवदेवस्य यन्न हि॥ सुवर्णमपि निर्माल्यं। शालिभद्रं विना न तत॥ २॥ इति दानविषये शालिभद्रकथानकं समाप्तं. पुनर्दानफलमाह—

॥ मूलम्॥—जम्मंतरदाणाओ। उल्लसियापुव्वकुसलझाणाओ॥ कयवन्नो कयपुन्नो। भोगाणं भायणं जाओ॥ १०॥ व्याख्या—एकस्माज्जन्मनोऽन्यजन्म जन्मांतरं, जन्मांतरे दानं जन्मांतरदानं, तस्मात्, कथंभूतात्? 'उल्लसियत्ति' उल्लसितमपूर्वं कुशलध्यानं यत्र तस्मादिति. 'कय-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वन्नोत्ति ' कृतपुण्यनामा व्यवहारिपुत्रः, कथंभूतः? कृतपुण्यः, कृतं दानपुण्यं येन सः, ' भोगाणं-ति ' भोगानां भाजनमास्पदं जात उत्पन्न इति गाथार्थः. ॥ १० ॥ अस्या अपि विस्तरः कथानकादवसेयः, तच्चेदं—

मगधदेशमंडनं राजगृहं नाम नगरमस्ति, तन्नगरनायकः क्षायिकसम्यक्त्वधारकः श्रीवीरशासनोन्नतिकारको महाराजाधिराजः श्रेणिको नाम राजास्ति, स श्रेणिको न्यायमार्गेण पृथ्वीं पालयन् विचरति. तस्य श्रेणिकस्य सुनंदेति नाम्ना पट्टदेव्यस्ति. तयोर्बुद्धिसागरश्चतुर्दशविद्यापारगो द्वासप्ततिकलाकुशलश्चतुर्बुद्धिसागरोऽभयकुमारनामा पुत्रोऽस्ति. स एव मंत्रिश्रेष्टोऽप्यस्ति. तेन मंत्रिणा सुखसागरमग्नः श्रेणिको राट् गतमपि कालं न जानाति. तस्मिन्नगरे भूरिधनो धनदोपमो धनेश्वराभिधानः सार्थवाहोऽस्ति. तस्य सार्थवाहस्य सच्छीलशालिनी दयादानतत्परा सुभद्रेति नाम्ना प्रियास्ति. तयोः पुत्रो गुणरत्नरोहणगिरितुल्यः पुण्यात्मा कृतपुण्यनामास्ति. तन्नगरनिवासिश्रीदत्तश्रेष्टिनः पुत्रीं धन्यानाम्नीं महामहेन पितृभ्यां कृतपुण्यः परिणायितः. परं साधुसंगात्साधुवद्विषयविमुखो धर्मपरायणो धर्मेणैव स कालं निर्गमयामास. ततो मातापितृभ्यां चिंतितमेष कदाचिद्दीक्षां ग्रहीष्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ति तदास्माकं का गतिर्भविष्यतीति विचिंत्य ताभ्यां पुत्रः कृतपुण्यको ललितगोष्टीमध्ये क्षिप्तः. ततो नटविटपुरुषैः सर्वाण्यपि व्यसनानि तस्य शिक्षितानि, यथा—द्यूतं १ च मांसं २ च सुरा ३ च वेश्या ४ । पापर्द्धि ५ चौरी ६ परदारसेवाः ७ ॥ एतानि सप्त व्यसनानि लोके । घोरातिघोरे नरके नयंति ॥ १ ॥ स कृतपुण्योऽपुण्यकसंयोगात्तादृशो जातः, यतः—अंबस्स य निंबस्स य । दुन्हंपि समागयाइं मूलाइं ॥ संसग्गीअविणठो । अंबो निंबत्तणं पत्तो ॥ १ ॥ एवं कृतपुण्यकोऽपि तेषां विटपुरुषाणां संसर्गतो व्यसनी जातः. अथ तैर्मित्रैः स तन्नगरनायिकानंगसेनागणिकापार्श्वे नीतः. तया गणिकया च स तथा मोहितो यथा तस्याः समीपं क्षणमपि मोक्तुं न शक्नोति. गणिकासक्तः सन् स मातापितरावपि न स्मरति. मातापितरौ च धनादिकं यत्किंचिद्विलोक्यते तत्सर्वं प्रेषयतःस्म. तत्र तस्य तिष्टतो द्वादशाब्दानि क्षणवद्गतानि. मातापित्रादिभिराकारितोऽपि स नायाति, अहो कीदृशं कामविलसितं! यतः—

विकलयति कलाकुशलं । हसति शुचिं पंडितं विडंबयति ॥ अधरयति धीरपुरुषं । क्षणेन मकरध्वजो देवः ॥ १ ॥ एवं स कृतपुण्यको विडंबितः. मातापित्रोश्च धनं प्रेषयतोः सर्वं धनं नि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्टितं. अथाकस्मादुत्पन्नतीव्रज्वरौ मातापितरौ मृत्वा स्वर्गे जग्मतुः. अन्येद्युः सा कुट्टिनी धनानयनार्थं स्वां चेटीं कृतपुण्यकगृहे प्रेषयामास. चेटी तत्र गता तादृशं शटितं पतितं कथितं शून्यं तद्गृहं विलोक्य कृतपुण्यकप्रियांतिके गत्वा जगौ, हे कल्याणि! तव कांतेन प्रेषितास्मि धनानयनार्थं, अतो ममार्पय धनं. तस्या वचनविलासं श्रुत्वा कृतपुण्यकपत्नी धन्यातीवप्रसन्ना जगौ, हे सुंदरि! त्वमत्र धनार्थं यदागास्तद्वरं, मया तस्याज्ञा मस्तके कृता, अद्याहं तस्य वार्तया कृतार्था जातास्मि. परं तौ श्वश्रूश्वशुरौ स्वर्गं गतौ, अथाहं मंदभाग्या किं करोमि? कुतो वा धनं प्रेषयामि? द्वादशवर्षैश्च सर्वं धनं निष्टितं, मम पार्श्वे किमपि नास्ति, परमधुना मत्पार्श्वे मत्पित्रार्पितमाभरणमेकं विद्यते तद्गृहीत्वा गच्छ? तत्र तेन भूषणेन च मत्कांतं प्रमोदय? तदाभरणमादाय दासी कृतपुण्यकपार्श्वे आगता, अर्पितं तदाभरणं तस्मै, प्रोक्तं च गृहस्वरूपं, ततः कृतपुण्यकः खिन्नः. तदाभरणं च तेन तस्यै वेश्यायै दत्तं. चेट्या च कुट्टिन्या अपि कृतपुण्यकगृहस्वरूपं प्रोक्तं. तत एकांते कुट्टिन्या नंदिषेणा गणिका प्रोक्ता. हे पुत्रि! एष कृतपुण्यः केनचिदुपायेन गृहान्निष्कासनीयः. ततस्तस्याः कुट्टिन्या आदेशाद्दास्यादिभृत्यजनः कृतपुण्यकाभिमुखं धूलिप्रक्षेपादि कुरुते. तदानीम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नंगसेना मातुरग्रे जल्पति हे मातरेष गुणवानेतावंति वर्षाण्यत्र स्थितोऽभूत्, अस्य बहु धनं चावाभ्यां भक्षितं, कथमधुनैवंविधा विडंबना क्रियते? कुट्टिनी जगावात्मनः कुलाचार एवंविधो वर्तते, यावत्कामुकस्य गृहे धनं भवति, मार्गितं च लभ्यते तावत्स मन्यते नान्यथेति. एवंविधां तद्वार्तां निशम्य कृतपुण्यको दध्यौ—

मनस्यन्यद्वचस्यन्यत । क्रियायामन्यदेव हि ॥ यासां साधारणस्त्रीणां । ताः कथं सुखहेतवः ॥ ॥ १ ॥ कुष्टिनोऽपि स्मरसमान् । पश्यंतीं धनकांक्षया ॥ तन्वतीं कृत्रिमस्नेहं । निःस्नेहां गणिकां त्यजेत् ॥ २ ॥ मांसमिश्रं सुरामिश्र—मनेकविटचुंबितं ॥ को वेश्यावदनं चुंबे—दुच्छिष्टमिव भोजनं ॥ ३ ॥ अभ्रच्छाया तृणाग्निश्च । खले प्रीतिः स्थले जलं ॥ वेश्यारागः कुमित्रं च । षडेते बुद्बुदोपमाः ॥ ४ ॥ इत्यादि चिंतयन् कृतपुण्यको विमनस्कः स्वगृहगमनाय चचाल. यावता स गृहाभ्यर्णं समायाति तावता पतितप्रायं गृहं विलोक्य बहुखिन्नश्चिंतयति धिग्मम जीवितं, येन मया मातापित्रोर्महद्दुःखं दत्तं, पितुर्धनं विनाशितं, अहो! मम गृहस्य कीदृगवस्था समागता? एवं चिंतयन् स गृहमध्ये यावता याति तावत्तत्पत्नी कांतमागच्छंतं वीक्ष्य हृष्टचित्ता जलभृतभाजनं करे कृ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वाचमनमादाय सन्मुखमागात. ततः कृतपुण्यको योजितकरकमलया तया वितीर्णमाचमनं गृहीत्वा गृहमध्येऽभ्येत्य प्रियामुक्तासने उपविष्टः. ततः प्रियया भोजनसामग्री कृता. कृतपुण्यकः कृतस्नानो देवगृहे जिनमर्चयित्वा वर्यपुष्पैः स्तोत्रेण स्तुत्वा च बुभुजे. ततः कृतपुण्यस्य कांतस्य सवाऽपि गृहवृत्तांतः प्रियया प्रोक्तः. ततस्तेन चिंतितमहोऽहमभाग्यशिरोमणिर्यतो मातापित्रोर्मया सुखं न दत्तं. तेन पुत्रेण जातेन च किं? यो मातापित्रोः सुखं न ददाति. मया तु पित्रोः कुलं विनाशितं, यतः—ईक्षुक्षेत्रं वंशजाली । कदलीविषपादपाः ॥ फले जाते विनश्यंति । दुःपुत्रेण कुलं यथा ॥ १ ॥ पितरौ यन्मयागाधे । क्षिप्तौ दुःखमहार्णवे ॥ धनं निधनमानीतं । पितृपर्यायसंचितं ॥ २ ॥ एवं स चिंतयन् प्रियया प्रोक्तः—यद्भावि तद्भवति नित्यमयत्नतोऽपि । यत्नेन वापि महता न भवत्यभावि ॥ एवं विधातृवशवर्तिनि जीवलोके । किं शोच्यमस्ति पुरुषस्य विचक्षणस्य ॥ १ ॥ गते शोको न कर्तव्यो । भविष्यन्नैव चिंतयेत् ॥ वर्तमानेन कालेन । वर्तयंति विचक्षणाः ॥ २ ॥ इत्यादि प्रियावचः निशम्य स्वस्थः सन् शोकं त्यक्त्वा समाधिना कृतपुण्यो गृहेऽस्थात्. पत्न्या दत्तधनेन स किंचिद्व्यापारं करोति. क्रमात्तया समं सुरतसुखमनुभवतः पत्न्याः कुक्षावाधानमभूत्. स

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथावस्थं व्यापारं कुर्वाणो लोकैरुच्यते स एष कृतपुण्यकः पुत्ररूपेण शत्रुसन्निभो येन जातेन मातापितरौ दुःखिनौ भूत्वा मृतौ, तथा धनं च निधनं गतं.

एवंविधानि लोकवचनानि श्रुत्वा गृहे गत्वा स प्रियांप्रत्याह, हे प्रिये! तवाज्ञयाहं वाणिज्यार्थं देशांतरं यामि. प्रियावोचत हे प्राणेश त्वं खेदं मा कुरु? दीनारसहस्रमेकं मेऽस्ति. तेन त्वं व्यवसायं कुरु? तेनोक्तं स्वल्पद्रव्येणात्र व्यवसायं कर्तुं न शक्नोमि. अतोऽहं दूरदेशांतरे यास्यामि. नार्योक्तं तर्हि तव पंथानः कुशलिनः संतु. तस्मिन्नवसरे कश्चित्सार्थवाहो दूरदेशात्समागतः, दूरदेशं गंतुकामश्च तत्र स्थितः. अथ तेन दीनारसहस्रेण कृतपुण्यको बहुमूल्यं स्वल्पं क्रयाणकं लात्वा तस्मिन् सार्थे कचिद्देवकुले खट्वायां शंबलमोदकयुतः पत्न्या शायितः, स सुप्तस्ततो गृहं गता पत्नी. इतश्च तस्मिन्नेव नगरे बहुधनवान् धनदनामा व्यवहारी वसति, तस्य पत्नी रूपवती.तयोर्धर्मं कुर्वतोः कालेन जिनदत्ताभिधः पुत्रोऽभूत. जिनदत्तो वृद्धिं गतो यौवनस्थः पित्रा धनदेन चतस्र इभ्यपुत्रीर्महामहेन परिणायितः. ततो धनदः कियता कालेनायुषः क्षयेण निधनं गतः. जिनदत्तः पितुरूर्ध्वदेहिकं कृत्वा भार्याभिः समं विलसति, सुखेन च कालो याति. एकस्मिन् दिने

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विधौ विपरीते स्वल्पदुःखेनैव रात्रौ जिनदत्तोऽपि मृतः. ततस्तया रूपवत्या स्थविरीभूतया सर्वा व· धूराकार्य प्रोक्तं, हे वध्वो यदि युष्माकं भर्तारमपुत्रकं मृतं राजा श्रोष्यति तदात्मीयाः सर्वाः श्रियो ग्रहीष्यति, तेन भवतीभिर्न रोदितव्यं, असौ भर्ता प्रछन्नं भूमिमध्ये क्षेप्यश्च यथा कोऽपि न जा· नाति, अहमपि न रुदिष्यामि. तावच्चान्यः कश्चित्पुरुषो भवतीभिः सेव्यो यावत्पुत्रा भवतीनां भ· वंति. ततस्ता वध्वः पतिं भूमिगतं कृत्वा स्नानं विधाय श्वश्रूसहिता गृहान्निर्गत्य देवकुलोपांतस्थकृ· तपुण्यकसमीपे गताः. तद्रूपेण मोहिता वध्वः श्वश्रूवचनात्तथावस्थं तं शनैरुत्पाट्य स्वगृहे समानी· य मुमुचुः. कृतशृंगारास्ताश्चतस्रोऽपि वध्वः शय्यासन्नाः स्थिताः, स्थविराऽपि समीपे स्थिता, तावता जागरितः कृतपुण्यकः. स्नुषाचतुष्टयस्यापि पश्यतो निस्त्रपा स्थविरा कृतपुण्यककंठमालंब्य रुदंत्येवमु· वाच, यथा—हा वत्स बहुवात्सल्यां । विहाय निजमातरं ॥ एतावंति दिनानि त्वं । क्व यातोऽसि क्व वा स्थितः ॥ १ ॥ निरालंबशयाद्बुस्त्वं । तवांबास्मि न संशयः ॥ त्वं पुत्र जातमात्रोऽपि । हृतः केनापि पाप्मना ॥ २ ॥ इत्युक्त्वा रुदती जरती प्राह—इदानीं तावकीनस्य । ज्येष्टबंधुर्विपत्तितः ॥ तव संपत्तितश्चास्मि । शोकहर्षसमाकुला ॥ १ ॥ बंधुवध्वश्चतस्रोऽमू—रमूश्च विपुलाः श्रियः ॥ एता

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नद्य इवांभोधि—मगाधं त्वामुपस्थिताः ॥ २ ॥ अतः परं पुत्र त्वयान्यत्र कुत्रापि न गंतव्यं स्वेच्छयात्रस्थ आभिर्वधूभिः समं त्वं भोगान् भुंक्ष्व? कृतपुण्यो दध्यौ किं स्वप्नो लभ्यमानोऽस्ति? अथवा काचिद्देवमायास्ति, अथवा यद्भावि तद्भवतु, सांप्रतं तु स्वर्गसुखमेवमुपस्थितं. एवं ध्यात्वा कृतपुण्योऽवग्मातर्मम सर्वं विस्मृतं, अधुनात्रागां शुभकर्मोदयात्. एवमुक्त्वा मातुरानंदमुत्पाद्य स चित्ते चिंतयति—श्रीयोगः सुदृशां योगः । स्वयंवरमिव ह्यं ॥ उपस्थितमतो व्योम—प्रसूतैः किं विकल्पनैः ॥ १ ॥ मातर्मया त्वदीयाज्ञा । देवशेषेव सुंदरा ॥ पालनीया सदा यत्ना—दिहामुत्र सुखप्रदा ॥ २ ॥ क्रमाच्चतस्रो नार्यो गर्भं दधुः, चतसृणां भार्याणां चत्वारः पुत्रा जाताः, तेषां जन्मोत्सवः कृतः, तस्य तत्र तस्थुषो द्वादशवत्सराः सुखनिमग्नस्य द्वादशघटिका इव गताः.

ततोऽन्यदा वृद्धया प्रोक्तं, भवतीनां चत्वारः पुत्रा बभूवुः, तेन राजात्मनः श्रियं न गृहीष्यति, ततोऽसौ यतः स्थानादानीतस्तत्र स्थाने मुच्यते, ताभिरुक्तं मातः कथमयमात्मनां लक्ष्म्यादिवर्धको मुच्यते? वृद्धयोक्तं युष्माकं वरो रुचितो मोक्तुं न शक्यते. ताभिरुक्तं हे मातस्त्वया कारापितो वरः कथं मुच्यते? जरत्योक्तं भो मूढाः! न ज्ञायते पुरुषस्वरूपं, कदाचिदसावात्मनां श्रियं बलाद्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रहीष्यति तदात्मनां का गतिः? अतोऽयं स्वस्थाने मुच्यते यथावयोर्लक्ष्मीग्राहकोऽयं न नवति. ए-
तद्वचनं स्थविराप्रोक्तं श्रुत्वा वधूभिरनिष्टमपि तद्भयेन सर्वं प्रतिपन्नं. ततस्ताभिर्वधूभिस्तामेव खट्वां
सज्जीकृत्य स शायितः, स्नेहतः शंबलार्थं मध्ये रत्नानि क्षिप्त्वा मोदकाश्चत्वारो वस्त्रांचले बद्धाः.
ततो वृद्धा तं तत्र सुप्तं निद्रापरवशमुत्पाट्य निशि यतो गृहीतस्तत्रैव स्थाने मुमोच. अत्रांतरे स
एव सार्थवाहो द्वादशवर्षाणि देशांतरे भ्रांत्वा तस्मिन्नेव दिने तस्मिन्नेव स्थानकेऽवततार. कृतपुण्य-
कप्रिया सार्थवाहं समागतं ज्ञात्वा प्राणप्रियविलोकनकृते सपुत्रा तत्रागता, यत्र देवकुले पूर्वं कृत-
पुण्यकः शायितः. प्रभातं जातं, परं पतिं सुप्तं दृष्ट्वा सा पार्श्वे स्थिता, तावत्कृतपुण्यको जागरितः,
तावदग्रे स्थितां सपुत्रां स्वां पत्नीं ददर्श. कृतपुण्यकश्चिंतयति किमेतत्? तद्गृहं क्व? ताः स्त्रियश्च
क्व गताः? तद्धनं क्व गतं? किमेतदिंद्रजालं? किं वा मे मतिभ्रमः? किं वा देवेनोत्पाट्यात्र स्था-
नेऽहं मुक्तः? इत्यादि चिंतयन् स नार्यया नाषितः स्वामिन्नेहि गृहं, तवैष पुत्रः, अतस्त्वमेनं सं-
नाषय? निजोत्संगे च स्थापय? तेनापि पुत्रो निजोत्संगे आलिंगनं दत्वा स्थापितः. तत उत्थितः
पुत्रमग्रे कृत्वा पत्नीसहितः कृतपुण्यकः स्वगृहे समागात्. स्त्रिया च भक्त्या गौरवितः स्नानाद्यन्नपा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नदानतः, पत्न्या च भर्तुः पुरतः पुत्रोत्पत्तिस्वरूपं प्रोक्तं, पृष्टं च स्वामिंस्त्वया दूरदेशे गत्वा किमुपार्जितं? किमानीतं? तन्निवेदय? इति प्रियावचनं श्रुत्वा स लज्जितोऽधोमुखो भूत्वा स्थितः. तावता पुत्रः समागत्य पितुरुत्संगे निविष्टः. पुत्रेण पितुः पार्श्वे मोदको मार्गितः, पित्रा दत्तः, पुत्रेण लेखशालायां गत्वा भक्षितः, तन्मध्याद्रत्नं निर्गतं, बालेनायं मम घुंटको भविष्यतीति कृत्वा रक्षितं. तं घुंटकमादाय कांदविकगृहे स पट्टिकामार्जनाय गतः. तत्र पट्टिकां मार्जयतस्तस्य स घुंटकोऽकस्माज्जलभृतभाजने पतितः, तदा तज्जलं द्विधा भूतं. कांदविकेन तत्तथाभूतं दृष्टं, कांदविको दध्यौ नूनमयं प्रस्तरो जलकांतरत्नं बहुमूल्यं, तेन कामपि सुखभक्षिकामस्मै वितीर्येदं गृह्यते मया तदा वरं. एवं ध्यात्वा कांदविकस्तस्मै वर्यमोदकद्वयं दत्वान्यं घुंटकं च दत्वा तं प्रस्तरं ललौ. स बालकस्तां सुखभक्षिकां भक्षयित्वान्यघुंटकेन पट्टिकां घुंटयति. एवं दिनानि यांति. कांदविकेन तद्वृत्तीकृत्य रक्षितं. कृतपुण्यकेनापि ते मोदका भक्षणार्थं कर्षिताः. तेभ्यश्च बहुमूल्यानि रत्नानि निर्गतानि. तानि दृष्ट्वा मोहितः कृतपुण्यकश्चिंतयति, अहो! मे मंदभाग्यस्य भाग्यं फलितं! सुप्रसन्ना मे श्रीजिनपादाः, फलितं मे प्राचीनं कर्म, यतः—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्मणो हि प्रधानत्वं । किं कुर्वंति शुभा ग्रहाः ॥ वशिष्टदत्तलग्नोऽपि । रामः प्रव्रजितो वने ॥ ॥ १ ॥ यदुपात्तमन्यजन्मनि । शुभाशुभं वा स्वकर्मपरिणत्या ॥ तच्छक्यमन्यथा नैव । कर्तुं देवासुरैरेव ॥ २ ॥ एवं चिंतयन् कृतपुण्यकस्तेन मोदकरत्नद्रव्येण पितुरधिको बभूव. एकस्मिन् दिने श्रेणिकनृपतेः सेचनको हस्ती गंगानद्यां मध्ये जलं पिबन् स्नानं कुर्वंश्च तंतुजीवेन निरुद्धः. अनेके उपचाराः कृताः, गजो न बहिर्निर्याति. ततः खिन्ने नृपतावभयकुमारो बुद्धिवानुवाच, तंतुजीवेन हस्ती गृहीतोऽस्ति, यदि जलकांतो मणिर्जलधिमध्ये गजपार्श्वे मुच्यते तदा जलं द्विधा भवति, तंतुजीवश्च गजं मुक्त्वा जलमध्ये याति. ततो नृपेनोक्तं भांडागारादानीयतां जलकांतो मणिः, अभयकुमारस्ततो भांडागारं विलोक्य प्राह स्वामिन् भांडागारे जलकांतमणिर्नास्ति, तेन पुरमध्ये पटहो वाद्यते, यथा यः कश्चिज्जलकांतमणिमानयिष्यति तस्मै राज्यार्धयुता स्वपुत्री दास्यते मया. ततो नृपादेशादनुगैः पटहो वाद्यमानः पुरमध्ये स्थाने स्थाने भ्रमन् कांदविकगृहोपांते गतः, तदा तेन कांदविकेन स पटहः स्पृष्टः. ततः कांदविको राजपार्श्वे आनीतो राजपुरुषैः, राजा मुमुदे. बहुलोकयुतो राजा नदीतटे गतः, स जलकांतमणिरानीय च गजपार्श्वे मुक्तः, तदैव तज्जलं द्विधाभू-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तं, तंतुजीवश्च नष्टः, गजश्च मुक्तोऽभूत. हृष्टेन राज्ञा भेरीमृदंगादीनि बहूनि वादित्राणि वादितानि. सन्मानितः कांदविकः. वाद्यमानेषु बहुषु वादित्रेषु सेचनकगजारूढो राजा तुरंगमारूढाभयकुमारकांदविकसहितो नानाप्रकारं दानं याचकेभ्यो विश्राणयन् स्वगृहमाजगाम. कांदविकश्च सन्मानितः सन् स्वमणिमादाय गृहे गतः.

इतो राजाभयकुमारमाकार्य रहस्यवक् भोः पुत्राभयकुमार! राजपुत्रवरयोग्यात्मनः पुत्री कांदविकस्य कथं दास्यते मनोरमानाम्नी? अभयोऽवग् स्वामिन् खेदो नानेतव्यः, यस्य जलकांतरत्नमिदं भविष्यति तं बुद्ध्वा प्रकटीकरिष्यामि. ततः सर्वं युष्मन्मनोऽभिमतमेव भविष्यति. यत ईदृशं जलकांतरत्नं राजगृहे भवति, अथवा व्यवहारिगृहे भवति, परं कांदविकादिनीचगृहे तु कदापि न भवति. यतः—पीयूषं रजनीकरे वरतरा भासश्च सूर्येबुधौ। रत्नानां निचयो मरुत्तरुगणो मेरौ ग्रहा अंबरे ॥ स्वर्गे स्वर्गिगजस्तथा सुरहयो गीर्वाणगौर्मुजला। चक्रं चक्रिनिकेतने भवति वै नान्यत्र तिष्ठेत क्षितौ ॥ १ ॥ तथा वर्याणि वस्तूनि। रत्नादीनि च भूतले ॥ भवंति मेदिनीपाल—महेभ्यामात्यसद्मसु ॥ २ ॥ तेन कस्यापि व्यवहारिणो रत्नमिदं भविष्यति, यस्य भविष्यति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्मै हि राज्यार्धं सुता च दास्यते, ततो राजा हृष्टः. अथाभयकुमारेण स्वजनपरिवारपरिवृतः कांदविकः समाकारितः. कांदविको हृष्टः स्वजनपरिवारपरिवृतो वर्यवस्त्राभरणानि परिधाय राजाग्रे समागात. अभयकुमारेण सन्मानितः पृष्टं च भो कांदविक! त्वयेदं रत्नं क्व प्राप्तं? तेनोक्तं मम गृहे क्रमागतमस्ति. ततोऽभयकुमारेण पूर्वशिक्षितान् स्वसेवकानाकार्य प्रोक्तमस्य राज्यार्धं कन्यायुतं दीयतां? ततस्ते राजपुरुषा मंत्रिप्रेरिताः कंबादिभिस्तं तथाताडयन् यथा क्षणमेकं स निश्चेष्टः कष्टीभूतः, पुनरपि क्षणेन स स्वस्थीभूतः. पुनरप्यभयोऽवग्भो कांदविक! सत्यं ब्रूहि? त्वयेदं जलकांतरत्नं क्व लब्धं? यदि सत्यं न कथयिष्यसि तदाधुनामूभिः कंबाभिस्ताडनान्मृत्युमवाप्स्यसि. मरणभयात् कांदविकेनामूलचूलतो रत्नप्राप्तिवृत्तांतः सर्वः प्रोक्तः. ततो राज्ञाभयकुमारवचनेन कृतपुण्याय राज्यार्धसहिता मनोरमा दत्ता. ततोऽभयकुमारो ग्रामैकसहितामेकां कांदविककुलोत्पन्नां कन्यां तस्मै कांदविकाय भूपादेशाद्दापयामास. यतो राज्ञोक्तं निष्फलं न भवति. ततोऽसौ वर्येभारूढं कृतपुण्यं मनोरमाप्रियायुतं वादित्रवादनपुरस्सरं गृहे प्रेषयामास.

अभयकुमारं तदा लोकाः स्तुवंतिस्म, धन्य एषोऽभयकुमारो येन सदृशः संयोगो मिलितः.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथा कंदर्पस्य रत्या प्रीत्या वा, यथा शच्येंद्रस्य, यथा श्रिया कृष्णस्य, यथा गौर्या भवस्य, तथा मनोरमया कृतपुण्यस्येति. ततोऽभयकुमारेण सह कृतपुण्यस्य प्रीतिर्जाता. अथैकदा रहस्यभयकुमाराग्रे कृतपुण्येन स्वसंभवपुत्रचतुष्टयोत्पत्तिस्वरूपं निरूपितं, अस्मिन् पुरे मम चतुःपुत्रसंयुताश्चतस्रः पत्न्यो वर्तते, परं तन्मंदिरं न वेद्मि. अभयकुमारेण हास्यपूर्वं प्रोक्तमहो तव चातुर्यं! यत्र द्वादश वर्षाणि स्थितस्तद्गृहं न ज्ञायते! कृतपुण्येनोक्तं सुप्त एव तया वृद्धया सप्तभूमिधवलगृहे नीत्वा सप्तमभूम्यामहं स्थापितः, तत्र द्वादश वर्षाण्यतीतानि, तत उत्तार्य पुनस्तस्मिन्नेव स्थाने मुक्तः. अतोऽहं तद्गृहं कथं जाने? अभयकुमारेणोक्तं ये तव पुत्राः संति ते त्वामुपलक्षयंति न वा? कृतपुण्यकेनोक्तं ते मम श्मश्रु करेणाकर्षयंतोऽभूवन्. ममांके उपविश्य तात तातेति जल्पंतश्चाभूवन्, अभयोऽवदत्त्वं ताः पत्नीरुपलक्षयसि न वा? तेनोक्तं सम्यगुपलक्षयामि, अभयोऽवक्तास्ते पत्नीः पुत्रयुता अहं प्रकटीकरिष्यामि.

अथाभयकुमारेण द्विद्वारो महान् प्रासादः कारितः, एकेन द्वारेण प्रविश्यते, द्वितीयेन द्वारेण च निर्गम्यते, तत्र कृतपुण्यकरूपतुल्या यक्षप्रतिमा स्थापिता. ततोऽभयो नगरे पटहं वादयामा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स, या या स्त्री सा सर्वाप्यपत्ययुता पंचपंचमोदकान्विता यक्षं नत्वा द्वितीयद्वारेण निर्गच्छतु, तस्याश्च कुशलं भविष्यति, नो चेन्मरणं भविष्यति, अग्रेतनचतुर्दश्यां चागंतव्यं. ततश्चतुर्दश्यामभयकुमारः कृतपुण्यकयुतः प्रासादपार्श्वेऽभ्येत्योपविष्टः, तदानीं सर्वा नगरनार्यः स्वापत्ययुता मोदकैः स्थालं भृत्वा एकद्वारेण प्रासादमध्ये प्रविश्य मोदकांश्च ढौकयित्वा यक्षं प्रणम्य द्वितीयद्वारेण निर्याति. इतश्च सा वृद्धा चतुर्वधूचतुःपुत्रयुता यक्षं नंतुमागात्, तदा कृतपुण्यकोऽभयंप्रत्याह, भो अभय! एषा सा वृद्धा, एताश्च मे वध्वः, एते च मे पुत्रा इति. यावता सा स्थविरा वधूयुता मोदकस्थालं पुरो मुक्त्वा प्रणमति तावता ते चत्वारः पुत्रा यक्षपार्श्वे गताः, यतः—तात तातेति जल्पंतः। प्रमोदोत्फुल्ललोचनाः ॥ यक्षांकपालिपर्यंक—मध्यासुस्तनयास्तदा ॥ १ ॥ तदा कश्चिद्यक्षस्य श्मश्रूणि विलग्नः, कश्चिदुदरे, कश्चिन्मस्तके च, तदाभयेन तत्रैत्योक्तममी ते चत्वारः पुत्राः, एता च तस्तस्तव पत्न्यः, एषा च सा वृद्धेति. ततः सा वृद्धा वधूसहिता गृहे गता, अभयेन पृष्टे स्वसेवकान् मुक्त्वा तद्गृहं ज्ञातं. ततोऽभयकुमारेण सर्वं तद्गृहसारं कृतपुण्यकाय दत्तं. किंचिद्धनं दत्वा वृद्धा च पृथक्कारिता. अथ सानंगसेना वेश्यापि तत्राकारिता. एवं कृतपुण्यकस्य सप्त प्रिया बभूवुः. अ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्येद्युर्जगद्वंद्यः श्रीवीरस्वामी भव्यजीवान् प्रतिबोधयन् वैभारगिरौ समवासार्षीत्, तदा श्रेणिकनृपतिरभयकुमारकृतपुण्यकादिपरिवारयुक्तः श्रीवीरं वंदितुं ययौ, श्रीवीरोऽपि धर्मोपदेशं कथयति, यथा—धर्मः कल्पद्रुमः पुंसां । धर्मः सर्वार्थसिद्धिदः ॥ धर्मः कामदुघा धेनु—स्तस्माद्धर्मो विधीयतां ॥१॥ धर्मदेशनांते कृतपुण्यः कृतांजलिकः पप्रच्छ, भगवन्! केन कर्मणांतरांतरा संपदश्च विपदश्च मेऽभूवन्? श्रीवीरेणोक्तं सर्वं पूर्वभवार्जितमेतत्, तथाहि—

पूर्वभवे श्रीपुरे त्वं गोपालदारको वत्सपालकोऽभूः, परं निर्धनः, एकस्मिन् दिने परमान्नं गृहे गृहे निष्पाद्यमानं वीक्ष्य मातरंप्रति जगौ, हे मातर्मह्यं परमान्नं देहि? अंबा रुदती जगौ हे पुत्र! मम गृहे किमपि नास्ति, कथं परमान्नं ददामि? यतः—अन्नं नास्ति जलं नास्ति । नास्ति मुद्रा युगंधरी ॥ धान्यं सलवणं नास्ति । तन्नास्ति यच्च भुज्यते ॥ १ ॥ ततस्तां रुदंतीं बालं च रुदंतं वीक्ष्य प्रातिवेश्मिकीनार्यस्तंदुलदुग्धघृतशर्करादि तस्यै ददुः, तेन च तया परमान्नं निष्पादितं, पुत्राय च परमान्नं परिवेश्य सा कस्मैचित्कार्याय प्रातिवेश्मिकीगृहे ययौ, इतो मासक्षपणपारणके साधुद्वयं तत्र विहर्तुमागतं, साधुद्वयं कृषशरीरं चारित्रपात्रं च वीक्ष्य दध्यौ गोपालबालः, यथा—अहो मे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सफलं जन्म । दिनोऽयं रुचिरोऽद्य मे ॥ यामोऽयं सुंदरो मेऽद्य । वेलेयं मेऽद्य शर्मदा ॥ १ ॥ यतोऽधुना समायातं । वर्यं साधुद्वयं स्फुटं ॥ प्रतिलाभ्य भविष्यामि । कृतार्थोऽहं तमोहरं ॥ २ ॥ एवं स गोपालबालको हृष्टचेताः स्वस्थानादुत्थाय प्रणम्य बभाषे, हे भगवन्! मम भाग्यं फलितं, यद्युष्मत्पादानामत्रागमोऽभूत्, ममानुग्रहं विधायायं शुद्धाहारोंगीक्रियतां, ततः स परमान्नस्यैकभागं ददौ, पुनश्चिंतितमेकेन किं भवति? ततो द्वितीयभागं, ततस्तृतीयभागं, एवं त्रीन् वारान् कृत्वा परमान्नं तस्मै कृतपुण्यको ददौ, साधुद्वयं तदन्नं गृहीत्वान्यत्र ययौ. ततो गते यतिद्वये मात्रा तस्य पुनरपि परमान्नं परिवेशितं, ततः कालक्रमात्स गोपालको मृत्वा त्वं कृतपुण्यकोऽभूः, पुरा भवे त्वया विवारं विभज्य यतिभ्यां यद्दानं दत्तं, तेन त्रिधा भवांतरांतरा सुखमभूत्, आकर्ण्यैवं स्वं पूर्वभवं कृतपुण्यकः समुत्पन्नवैराग्यो ज्येष्टपुत्रे गृहभारमारोप्य सप्तक्षेत्र्यां च स्वधनमुप्त्वा श्रीवीरपार्श्वे दीक्षामादाय पंचमस्वर्गसुखभागभूत्. ततश्च्युतः स्वर्गं गमिष्यति. इत्थं महामुनेर्दानं । देयं भो भविका मुदा ॥ कृतपुण्यकवद् दृष्ट्वा । भवांतरसुखप्रदं ॥ १ ॥ इति कृतपुण्यककथानकं समाप्तं ॥ अथ तपोलब्धिमाहात्म्यतो दानविशेषमाह—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ मूलम् ॥—घयपूसवत्थपूसा । महरिसिणो दोसलेसपरिहीणा ॥ लद्धीइ सयलगच्छो—व- ग्गहणा सुग्गइं पत्ता ॥ ११ ॥ व्याख्या—घृतेन कृत्वा सकलं गच्छं पुष्णाति पोषयतीति घृतपुष्पः, एवं वस्त्रेण कृत्वा सकलं गच्छं पुष्णाति पोषयतीति वस्त्रपुष्पः, ते घृतपुष्पवस्त्रपुष्पलब्धिधारका इत्य- र्थः, ' महरिसिणो ' महर्षयः, किं लक्षणाः? दोषलेशेन परिहीना रहिता इत्यर्थः. पुनः कीदृशाः? लब्ध्या सकलगच्छोपग्रहकाः सकलगच्छोपकारकारका इति यावत. तेन सुकृतेन ' सुगइं पत्ता ' इ- ति सद्गतिं प्राप्तास्ते च श्रीआर्यरक्षितसूरिगच्छे प्रसिद्धा इति गाथार्थः. तत्र पूर्वं तावदार्यरक्षितप्रबंधः कथ्यते, तदनंतरं तच्छिष्यघृतपुष्पवस्त्रपुष्पयोः संबंधः कथयिष्यते, तत्रार्यरक्षितप्रबंधो यथा—दशपु- रनगरे सोमदेवो नाम द्विजोऽभूत, तस्य पत्नी रुद्रसोमा, सा च जिनधर्मरक्ता, तयोरुभौ सुता- वार्यरक्षितफल्गुरक्षितनामानावभूतां. तौ सुतौ पितुः पार्श्वे यावती विद्याभूत्तावतीं पठतःस्म. ततोऽ- धिकविद्यार्थी आर्यरक्षितः पाटलीपुरे ययौ. तत्र सर्वविद्याविशारदो भूत्वा स्वपुरसमीपे समागात. तं सर्वविद्यापारगं मत्वा तन्नगराधीशः संमुखमेत्य तं गजारूढं कृत्वा महोत्सवपुरस्सरं पुरमध्ये आनि- नाय. तं राज्ञा सन्मानितं ज्ञात्वा पंडितं च मत्वा सर्वे लोकाः पंडिताश्च मानयंति. सोऽपि गृहद्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रदेशे उपस्थानशालायां स्थितो वरासने बंदिभिः स्तूयमानः सुखेनास्थात. तस्य स्वजनास्तमागतं ज्ञात्वा तोरणस्वस्तिकादीनि मंगलानि चक्रुः. अन्येद्युरार्यरक्षितो दध्यावहो चतुर्दशविद्यापारगं मां मत्वा राजप्रभृतयः सर्वे लोकाः संतुष्टाः, परं मम माता न तुष्टिमापन्ना. अथ तत्करोमि येन मम जननी तुष्टिमाप्नोतीति मत्वा मध्ये गत्वा मातृपादौ नत्वा मातरं जगाद. हे मातरहं शास्त्राण्यधीत्य समागतः, परं तव तुष्टिर्न जाता तत्किं? भो वत्स! त्वं दीर्घायुर्भवेत्याद्याशिषं दत्वा माता जगाद. हे वत्स! अनया महत्यापि विद्यया किं क्रियते? येन संसारो वर्धते. यतोऽथ त्वं सकलशास्त्रपारगो यागान्नरकहेतून् जीवहिंसादिकारकान् प्रवर्तयिष्यसि, अतोऽहं किं तोषं यामि? ज्ञानस्य त्वेतदेव प्रामाण्यं यत्परपीडा न कर्तव्या, यतः—किं ताए पढियाए । पयकोमीए पलालभूयाए ।। जं इत्तिअं न नायं । परस्स पीडा न कायवा ।। १ ।। तत् श्रुत्वा पुत्रो मातरं प्राह, हे मातस्तव केन शास्त्रेण पठितेन हर्षः स्यात? माताह हे वत्स! यदि मातुर्भक्तोऽसि तदा दृष्टिवादं मुक्तिसुखदमधीष्व? पुत्रेण दृष्टीनां वादो दृष्टिवाद इति शब्दार्थमात्रं विचार्य चिंतितं यद् दृष्टिवादः स्वल्प एव भविष्यति, अतोऽहं स्तोकैरेव दिनैस्तमधीत्य मातरं तोषयामि. पुनर्मातरं प्रत्याह हे मातस्तच्छास्त्रं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुत्र लभ्यते? कस्य वा पार्श्वे पठ्यते? माता प्रोक्तं मम भ्राता तव मातुलस्तोसलिपुत्रनामाचार्यो- ऽस्मिन्नगरोपांत ईक्षुवाटकेऽस्ति, स त्वां पाठयिष्यति, त्वं तत्र याहि? तत्र गत्वा च पठनं कुरु? तत् श्रुत्वा स प्रातर्मातापितरावापृच्छ्य चचाल. स पुरान्निर्गछन्नार्यरक्षितः केनचिद्विप्रेण पृष्टः कोऽसि त्वं? सोऽवगद्दमार्यरक्षितः, ततस्तेन पुरुषेणालिंग्येदमुक्तं, शाखापुराश्रयोऽहं त्वत्पितृमित्रं महाद्विजो गृ- हचिंतान्तरमत्र एतावंति दिनानि नागां, अथ प्रातरिमा ईक्षुयष्टीः सार्धा नव गृहीत्वा तव मिलना- यागतोऽस्मि, तत्त्वमिमा गृहाण? ततस्ता ईक्षुयष्टीर्गृहीत्वा जगौ, अहमग्रतः कार्यार्थी यातास्मि, अ- त इमा गृहीत्वा त्वयेक्षुयष्ट्यर्पणवृत्तांतो मम मातुरग्रे प्रोक्तव्यः. एममुक्त्वार्यरक्षितोऽग्रतश्चचाल. वि- प्रेणागत्येक्षुयष्टीः पुरो मुक्त्वार्यरक्षितस्वरूपं प्रोक्तं. रुद्रसोमा माता दध्यौ मत्सुतः सार्धानि नव पू- र्वाणि लप्स्यते, सार्धनवेक्षुयष्टिप्राप्तेरिदमेव फलं.

अथार्यरक्षित ईक्षुवने गुर्वासन्ने गतः. गुरुभिः पाठ्यमानानां साधूनामालापकं श्रुत्वा तत्र गु- रूणां मंडतारं मधुरस्वरं श्रुत्वार्यरक्षितो मुमुदे. विधिनोपाश्रये प्रविश्य यावता स विलोकयति ताव- ता महाधार्मिको ढड्डरो नाम श्रावकस्तत्रागात. स चागत्य नैषेधिकीत्रयक्षणपूर्वं मध्ये प्रविश्य ' इ-

For Private And Personal Use Only

च्छामि खमासमणो ’ इत्युक्त्वा गुरून् वंदित्वा परान् साधूंश्च वंदित्वा भूमिं प्रमार्ज्य पुरो निषण्णः. ढड्ढरश्रावककृतं वंदनकं वीक्ष्यार्यरक्षितस्तथैव गुरून् वंदित्वा सर्वान् साधून्नत्वा गुर्वंतिके वस्त्रांचलेन भूमिं प्रमार्ज्य पुरो निविष्टः. पृष्टं च गुरुणा तव को गुरुः? सोऽवक् ममायमेव श्राद्धो गुरुर्येनास्य पार्श्वान्मयैवं सर्वं शिक्षितं. ततः पृष्टं गुरुणा त्वं कः कस्य पुत्रः? किमर्थं चागतोऽसि? तेनोक्तमहमार्यरक्षितनामा सोमदेवरुद्रसोमापुत्रो भवदंतिके दृष्टिवादमध्येतुं चागतोऽस्मि. तोसलिपुत्राचार्यः प्राह दृष्टिवादः परिव्रज्यां विनाध्येतुं न शक्यते, सोमदेवसूनुः प्राह तर्हि मह्यं संयमं देहि? संयमं दत्वा च दृष्टिवादं पाठय? गुरुस्तं योग्यं ज्ञात्वा पात्रं च मत्वा दीक्षां दत्वाग्रतो विजहार. आर्यरक्षितमुनिर्गुरुपार्श्वे पठन् स्तोकैरेव दिनैरेकादशांगीमंगीचकार, तथा यावान् दृष्टिवादो गुरुपार्श्वे वर्तते तावानेष गुरुभिः पाठितः, ततः प्रोक्तं वत्स! यद्यधिकदृष्टिवादभणनेच्छास्ति तदा वज्रस्वामिपार्श्वे गत्वा दृष्टिवादमधीष्व? तत आर्यरक्षितो महापुरीं प्रत्यचलत्, मार्गे चोज्जयिन्यां भद्रगुप्ताचार्यसन्निधौ गतः, तत्र गुरवो वंदिताः, गुरुभिरुपलक्ष्योक्तं वत्स! वर्यं कृतं यद्ब्राह्मण्यमुन्मुच्य श्रामण्यं गृहीतं, अहं वृद्धोऽभूवं, तेनाद्यैवानशनं ग्रहीष्यामि, त्वं मम निर्यामको भव? इत्युक्त्वा श्रीभद्रगुप्तगुरु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णानशनं गृहीतं. गृहीतानशनः श्रीभद्रगुप्तसूरिरिवादीत्, भो आर्यरक्षित! वज्रपार्श्वे गत्वा दृष्टिवादं पठता त्वया पृथगुपाश्रये स्थेयं, पृथगुपाश्रये भोक्तव्यं च, येन तत्र कारणमस्ति, येन मुनिना वज्रस्वामिमंडल्यां भुक्तं तेन वज्रस्वामिना सार्धमनशनं गृहीतव्यमेव, अतो मंडल्यां न भोक्तव्यमिति. गुरुवचः प्रतिपद्य निर्यामणां च गुरोः कृत्वार्यरक्षितो वज्रस्वामिपार्श्वे दृष्टिवादं पठितुमचालीत. तदानीं वज्रस्वामिना स्वप्नो दृष्टो यथा—

वज्रः स्वप्नमितोऽद्राक्षीत । कोऽप्यागत्य मदंतिकात ॥ पपौ भूरितरं क्षीर—मवशिष्टं किमप्यभूत् ॥ १ ॥ स्वप्नस्यार्थं प्रगे वज्रः शिष्याणामग्रे प्राह, भोः साधवः! कोऽप्यपूर्वस्तादृक्षः शिष्यः समेष्यति यः किंचिन्न्यूनां दशपूर्वीमस्मत्पार्श्वे गृहीष्यति. अस्मिन्नवसरेऽकस्मादार्यरक्षितो नैषेधिकीकरणपूर्वं वसतिमध्ये प्रविश्य श्रीवज्रस्वामिनं ववंदे, स पृष्टः श्रीवज्रस्वामिना किमागमनकारणं? आर्यरक्षितः सर्वं जगौ श्रीभद्रगुप्ताचार्योक्तं, पृथगुपाश्रये स्थित्यादि च निवेदितं. श्रीवज्रस्वामिनोक्तं वरं. ततः पृथगुपाश्रये स्थित आर्यरक्षितो वज्रस्वाम्यंतिके पठति, वज्रस्वाम्यपि तं पाठयति. एवमार्यरक्षितो नवपूर्वीं पठित्वा दशमपूर्वस्य विषमं यमकवजं पठति. तस्मिन् समये तस्य मातापित्रोर्लेखः स-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मागतः, तस्मिन् लेखे एवं लिखितमासीत् हे वत्स! त्वां विना वयं दुःखिता जातास्तेनात्रागमने-नास्माकं सुखं कुरु? तत्पितृलेखं ज्ञात्वार्यरक्षितस्त्वरितमध्येतुं प्रवृत्तः. एवं लेखप्रेषणेऽप्यनागतं पुत्रं ज्ञात्वा तमाह्वातुं पित्रा लघुपुत्रः फल्गुरक्षितः प्रेषितः. इतः फल्गुरक्षितोऽनुजोऽभ्येत्यार्यरक्षितं सहोदरंप्रति जगौ, यदि तव मातापितृविषये वात्सल्यमस्ति तदा तत्रागत्य मातापित्रादिबंधून् प्रमोदय? केचित्स्वजना बांधवाश्च प्रव्रज्यार्थिनो वर्तंते, तेषां स्वजनानां तत्रागत्य दीक्षां देहि? तत् श्रुत्वार्यरक्षितोऽवगदहं स्तोकदिनांते तत्रागमिष्यामि, तथापि कथ्यते हे बांधव! यदि तव दीक्षा रोचते तर्हि दीक्षां गृहाण? संसारे हि किमपि सुंदरं नास्ति, यतः—जीअं जलबिंदुसमं । संपत्तीओ तरंगलोलाओ ॥ सुविणयसमं च पिम्मं । जं जाणिसु तं करिज्जासु ॥ १ ॥ वायामिसेण कालो । सयलजिआणं छलं गवेसंतो ॥ पासं कहवि न मुंचइ । ता धम्मे उज्जमं कुणह ॥ २ ॥ इत्यादिधर्मोपदेशं निशम्य फल्गुरक्षितोऽपि दीक्षां जग्राह. गृहीतदीक्षः फल्गुरक्षितः पुनर्भ्रातरंप्रत्याह, भो बांधव! मातापितृमिलनाय त्वरितं गम्यते, सज्जो भव? विलंबं मा विधेहि? फल्गुरक्षितेन वारंवारमित्युक्त आर्यरक्षितो वज्रस्वामिनंप्रत्याह हे स्वामिन्! दशमपूर्वं मया कियदधीतं कियदवशिष्यते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चेति कथ्यतां. गुरुभिरुक्तं भो वत्स! त्वया दशमपूर्वांबुधेरेको बिंदुरधीतोऽस्ति, ततः स विशेषं पठन् दशमपूर्वार्धं यावत्पपाठ, महद्यत्नेऽपि ततोऽधिकं नायाति. ततश्चिंतितमार्यरक्षितेन पुरान्निर्गच्छतो मम जनकमित्रेण सार्धा नवेक्षुयष्ट्यो दत्ताः, तेनाधिकं नायास्यतीति, अत्र किं मुधा प्रयासः क्रियते? ततः पठने मंदादरं मातापितृमिलनोत्सुकं च तं ज्ञात्वा श्रीवज्रस्वामिना स सूरिपदे स्थापितः. प्राप्तसूरिपद आर्यरक्षितो भ्रातृयुतो गुरुं प्रणम्य चलितः. क्रमाद्दशपुरं च समागात्, महामहेन च स पुरीं प्रविवेश. आर्यरक्षितो नृपादिसर्वलोकपुरतो धर्मोपदेशं दत्तवान्. यथा—

संबुज्झह किं न बुज्झह । संबोही खलु पेच्च दुल्लहा ॥ नो हू वणमंति राइओ । नो सुलहं पुणरावि जीवियं ॥ १ ॥ डहरा बुड्ढा य सहा । गब्भत्थावि चयंति माणवा ॥ सेणे जह वट्टयं हरे । एवं आउक्खं उ खयंमि तुट्टइ ॥ २ ॥ इत्यादिदेशनां गुरुमुखात् श्रुत्वा सर्वलोका राजादयस्तं वारंवारं प्रशंसंतिस्म, अहोऽस्माभिरीदृशो धर्मोपदेशो न कुत्रापि श्रुत इति. राजा श्राद्धो जातः, तथा बहवो लोका अपि श्राद्धा जाताः. ततः स्वकुटुंबं प्रतिबोध्य तेन श्राद्धीकृतं. रुद्रसोमा माता भगिनी च बहुपरिवारयुता संयमं ग्राहिता. सोमदेवो जनको दीक्षां पालयितुमशक्तः श्रीआर्यरक्षितादि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुटुंबस्यानुरागेण तेन समं ग्रामे ग्रामे पुरे पुरे वने वने च गच्छति, न पुनः सोमदेवो लज्जया रजोहरणादि गृह्णाति. यदा श्रीआर्यरक्षितो दीक्षार्थं पितुः कथयति तदा सोमदेवो वक्ति, अत्र मम स्वजनाः संति तेनाहं स्वजनमध्ये लज्जे. ततो ममांबरयुगं कुंडिकां छत्रकोपानहौ यज्ञोपवीतं च यद्यनुजानीथ यूयं तदाहं दीक्षामंगीकरोमि. गुरुभिरुक्तमेवं भवतु. ततो विप्रवेषयुतः प्रव्रज्यां ग्राहितः सोमदेवः, ततो गुरुभिरनुज्ञातो धौतिकांबरादिसहितोऽसौ दीक्षां पालयामास. अन्यदा गुरवो देवान्नंतुं चैत्यालये गताः, तत्र पूर्वशिक्षिताः शिशवः सोमदेवं विना सर्वान् साधून् ववंदिरे. तदैकेन शिशुना प्रोक्तमेष साधुः कथं न वंद्यते? तदापरैरुक्तं नैष साधुर्गृहस्थवेषधारकत्वात्. ततः सोमदेवऋजुस्वभावः सर्वान् श्राद्धान् प्रति प्राह यूयमेतान् साधून् वंदध्वे, मां च कथं न नमथ? किं नाहं साधुः? तैरुक्तं त्वं कथं साधुः? तव तु वस्त्रयुगं गृहस्थतुल्यं वर्तते. ततस्तेन शिरस्त्राणं पृथुप्रावरणपटी चेति द्वयं तेन त्यक्तं. ततस्तैः श्राद्धैः स वंदितः, एवं कुंडिकोपानच्छत्रकं यज्ञोपवीतं चेति सर्वं त्याजितं. परं स सोमदेवविप्रो धौतिकमेकं न मुंचति, बहुशो बालकपार्श्वाज्ज्ल्पितोऽपि न त्यजति सोमदेवः. ततो गुरुभिरनुज्ञातोऽसौ धौतिकं परिधानवस्त्रं दधाति.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतस्तत्रैकः साधुस्तीव्रतपस्कारी भक्तप्रत्याख्यानं चकार. तदानेके जनाः श्राद्धाश्च तस्य साधोरनशनमहोत्सवं चक्रुः, साधुभिश्च तस्य सम्यङ्निर्यामणा कृता. स साधुर्जिनेंद्रध्यानपरो मृत्वा स्वर्गं जगाम. तदा सोमदेवस्य धौतिकमोचनार्थमाचार्यैर्भणितं य एनं मृतं साधुं वहते तस्यासंख्यपुण्यं मुक्तिगमनयोग्यं भवति. तदानीं पृथक्पृथक् सर्वेऽपि साधवो जल्पंत्यहमेनं साधुं वहामि. तदा सोमदेवोऽपि जगादाहमपि साधुमेनं वहामि. तदा गुरुभिरुक्तं मृतं साधुं वहतां साधूनां देवा विघ्नं कुर्वंति, यदा ते साधवो न क्षुभ्यंति तदा तेषां देवाः प्रसन्ना भवंति. तदा पुनः सोमदेवो जगावहमेनं साधुं वहामि यथा ममासंख्यं पुण्यं भवति. पुनर्गुरवो जगुरत्र बालकादिकृता विघ्ना बहवः समुत्पद्यंते तेऽपि सोढव्याः. सोमदेवेनोक्तमहं सर्वानुपसर्गान् सहिष्ये. गुरुभिरुक्तं तर्हि सज्जो भव? सोमदेवः साहसं विधाय तमुत्पाटयितुं सज्जो जातः. तदानीं गुरुभिः शिक्षिता बालकास्तवाभ्येत्याकस्मात्तस्य सोमदेवस्य साधोः परिधानांशुकं धौतिकं कर्षयामासुः. तदा गुरुभिः प्रोक्तं भो साधवः? एकं चोलपट्टवस्त्रमानयत? तदा सोमदेवो जगौ यस्मिन् दृष्टे त्रपाभूत तत्तुष्टमेवेति. एवं जल्पतः सोमदेवस्य चोलपट्टं परिधापयामासुः साधवः. ततः सोमदेवः सत्यः साधुरभूत. तस्य सा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धोरग्निसंस्कारे कृते यदा गुरवो देवगृहे देवान्नंतुं समागतास्तदा सर्वान् साधून् सोमदेवं च श्राद्धा वंदंतेस्म. अथ सोमदेवो लज्जया भिक्षार्थं श्राद्धगृहे न गच्छति. एकदा श्रीगुरुभिरासन्ने ग्रामे गच्छद्भिः साधूनामुक्तं भोः साधवः! युष्माभिरेव शुद्धान्नमानीय भक्षितव्यं, परं सोमदेवस्य न दातव्यं. अथ श्रीगुरुषु ग्रामं गतेषु साधुभिर्गुरूक्त कृतं.

एवं द्वितीये दिने गते तृतीये दिने गुरवः समागताः. गुरुभिरुक्तं सोमदेवेन किं कृतं? शिष्यैर्यथा तथोक्तं. गुरवः प्राह भो शिष्याः! अस्मत्पितुरर्थे भक्तं कथं नानीतं? ते पूर्वशिक्षिताः साधवो जगुरयं स्वयमेव विहर्तुं कथं न याति? गुरुभिरुक्तं भोः सोमदेव! त्वमत्रासन्नगृहे गत्वाहारादिकं कथं नानयसि? किं परलाभेन? परलाभात् स्वलाभो महान्, अतः स्वयमेवाहारार्थं गम्यते. एवं गरुभिरुत्साहितो भाजनानि गृहीत्वा कस्यापि महेभ्यस्य गृहछिंडिकायां प्रविश्य गृहांगणे गतः. श्रेष्ठिन्योक्तं हे यते! त्वं छिंडिकायां कथं प्रविष्टः? साधुः प्राह लक्ष्मीश्छिंडिकायामपि प्रविष्टा वरा. हृष्टः श्रेष्ठी सोमदेवस्य मुनेर्द्वात्रिंशन्मोदकान् ददौ. हृष्टः सोमदेवोऽहं लब्धिमानिति तान् गुरूणामदर्शयत्. गुरुभिरुक्तं साधुभ्य एतान् मोदकान् ददस्व? सोऽवक्साधुभ्यो न ददामि, यैरहं वि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोपितः. गुरुभिरुक्तं भोः स्थविर! मैवं वादीः, एते साधवो महांतः पूज्याः, अमीषां पादरजोऽपि हि वंद्यं. एवं गुरूक्तं श्रुत्वा साधुभ्यस्तान् मोदकान् ददौ. दत्वा पुनर्लाभोदयकर्मयोगात्स परमान्नं विहृत्यागात, पारणं च चक्रे. एवं लज्जां मुक्त्वा स सदा विहृत्यायाति. ततः स सोमदेवसाधुः षष्टाष्टमादिपारणके स्वयमानीताभिर्भिक्षाभिः पारणकं करोति. श्रीआर्यरक्षितसूरयो भव्यजीवान् प्रतिबोधयंत एकस्मिन् समये पाटलीपुरपत्तने समाययुः. तत्र चंद्रनरेश्वरो जैनधर्मपरायणो धर्मं श्रोतुं समागात. पंचविधाभिगमेन गुरून् वंदित्वा स समीपे समुपाविशत्. गुरुभिरपि धर्मोपदेशो दत्तः, यथा—धर्मो जगतः सारः । सर्वसुखानां प्रधानहेतुत्वात् ॥ तस्योत्पत्तिर्मनुजाः । सारं तेनैव मानुष्यं ॥ १ ॥ इत्यादिधर्मोपदेशं निशम्य स विशेषतस्तदंतिके धर्मं प्रपेदे. ततस्ते आर्यरक्षितसूरयो बहुपरिवारा मह्यां विहरंतः शत्रुंजयोज्जयंतादियात्रां कृत्वा पुनः पाटलीपुरमाजग्मुः. आयुरंते चाराधनां कृत्वा स्वर्गलोकं ययुः. इत्यार्यरक्षितः सूरिः । सर्वसूरिगुणालयः ॥ यो गुरुः साधुधौरेयः । सह्स्रघृतपुष्पयोः ॥ १ ॥ इति श्रीआर्यरक्षितसूरिसंबंधः समाप्तः. श्रीआर्यरक्षितसूरिगच्छे घृतपुष्पवस्त्रपुष्पौ जातौ, अतः श्रीआर्यरक्षितसूरिसंबंधः प्रोक्तः, अथ प्रस्तुत एव घृतपुष्पवस्त्रपुष्पयोः संबंधः क-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

थ्यते, यथा—

घृतेन कृत्वा गच्छपोषकः साधुर्घृतपुष्पमित्रो घृतमुत्पादयति. कोऽर्थः? भिक्षया स घृतमानयति, तस्य चेदृशी लब्धिः—द्रव्यतो घृतमुत्पादयति भिक्षया १, क्षेत्रतोऽवंत्यां गतस्तत्र घृतं दुःप्रापं २, कालतो ज्येष्ठाषाढमासयोः, यतस्तस्मिन् काले विशेषतो घृतं दुःप्रापं भवति ३, भावत एका द्विजातिगृहिणी गर्भवती, तस्या भर्त्रा भिक्षया स्तोकं स्तोकं मेलयित्वा षड्भिर्मासैर्घृतस्य गडुको भृतः, यदासौ पुत्रं प्रसविष्यति तदैतद्घृतस्योपयोगो भविष्यतीति स्थापितः. एवं दुःप्रापमत्यंतं सोपयोगमपि तस्य विप्रस्य गृहे भिक्षार्थं घृतपुष्पे गते सत्यन्यघृताभावे तद् घृतं हृष्टा सती सा दद्यात्, यदि सापि तद्दुःप्रापं घृतं दद्यात्तर्ह्यन्येषां धनवतां घृतदाने किं कथ्यते? ते तु ददत्येव परिमाणतो यावन्मात्रं सकलगच्छस्योपयोगे समेति तावन्मात्रं समानयति. यथा स च साधुर्भिक्षार्थं निर्गच्छन् पृच्छति भो साधवः! भवतां कियन्मात्रेण घृतेन कार्यं? ते यावन्मात्रं मार्गयंति तावन्मात्रं गृहस्थगृहादानीय स यच्छति. घृतपुष्पस्यैवैव लब्धिः. इत्येको घृतपुष्पसाधुः. अथ वस्त्रपुष्पलक्षणमाह—तथा वस्त्रेण कृत्वा गच्छपोषकः साधुर्वस्त्रपुष्पमित्रो वस्त्रमुत्पादयति. द्रव्यतो वस्त्रमुत्पादयति १,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षेत्रतश्चेदिदेशे तथा मथुरायां वा २, कालतो वर्षाकाले शीतकाले वा ३, भावतो यथा कयापि वृ- छया, रंडिकया, क्षुधया म्रियमाणयातिदुःखेन स्तोकं स्तोकं सूत्रं प्रत्यहं कर्त्तयित्वैका शाटिका नि- ष्पादिता, तया चिंतितं कल्ये एषा शाटिका परिधास्यते, यतोऽहं नग्नास्मि.

एतस्मिन्नवसरे सा शाटिका वस्त्रपुष्पेण मुनिना याचिता, सा स्थविरा हृष्टा तुष्टा सती तां शा- टिकां तस्मै ददाति, ईदृशी निर्नाथा यदि वस्त्रपुष्पमुनये वस्त्रं ददाति, तर्हि धनवतां किमुच्यते? ते तु विशेषतो मार्गितं वस्त्रं ददत्येव, वस्त्रपुष्पः साधुर्भिक्षार्थं निर्गच्छन् साधूनां पृच्छति, भो साध- वः! भवतां कियन्मात्रेण वस्त्रेण कार्यं? यावन्मात्रं ते मार्गयंति तावन्मात्रं गृहस्थगृहादानीय स य- च्छति, वस्त्रपुष्पस्यैषैव लब्धिः. एवं घृतपुष्पवस्त्रपुष्पौ सकलगच्छस्योपग्रहकारकौ भक्तिकारकौ च. घृ- तपुष्पवस्त्रपुष्पौ । महामुनी प्रवरलब्धिसंपन्नौ ॥ श्रीरक्षितगुरुशिष्यौ । देयास्तां परमसौख्यानि ॥१॥ इति घृतपुष्पवस्त्रपुष्पयोः संबंधः समाप्तः ॥ अथ जिनभक्तिपूजाकृते दानमाह—

॥ मूलम् ॥—जीवंतसामिपडिमाइ । सासणं विअरिऊण भत्तीए ॥ पव्वइऊणं सिद्धो । उ- दाइणो चरमरायरिसी ॥ १२ ॥ व्याख्या—जीवत्स्वामिप्रतिमायै, जीवति स्वामिनि श्रीवीरे विद्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

माने सति तत्प्रतिमा जीवत्स्वामिप्रतिमा, तस्यै इत्यर्थः, ' सासणंति ' ग्रामं, ' विश्ररिकणत्ति ' वितीर्य दत्वेत्यर्थः, ' नत्तीएत्ति ' नक्तितः, ' पव्वइकणंति ' प्रव्रज्य दीक्षां कक्षीकृत्य सम्यक्परिपाल्य सिद्धो मोक्षं गतः, ' उदाइणोत्ति ' उदायननामा चरमराजर्षिः, यत उदायननाम्नो राज्ञः पश्चात्केनापि राज्ञा दीक्षा नांगीकृता, अतश्चरमराजर्षिरिति गाथार्थः ॥ १२ ॥ विशेषार्थस्तु कथानकादवसेयः, तच्चेदं—

सिंधुसोवीरदेशे वीतनयं नाम पुरमस्ति, तन्नगराधीश उदायननामा राजास्ति, वीतनयादित्रिषष्ट्यधिकत्रिशतिनगरनायकः सिंधुसोवीरप्रभृतिषोडशदेशाधिपो महासेनादिदशकिरीटिनृपनायको महाराजाधिराजो महीं पालयन्नस्ति, तस्य राज्ञः सकलांतःपुरमुख्या प्रनावतीनाम्नी पट्टदेव्यस्ति, तस्य राज्ञः प्रनावतीजन्मा यौवराज्यधुरंधरोऽजीचिनामा पुत्रोऽस्ति, तथा तस्य राज्ये राज्यधुराधरणधौरेयः केशीति नामा नागिनेयोऽप्यस्ति. इतश्चंपायां नगर्यामाजन्मस्त्रीलंपटो धनवान् कुमारनंदिनामा स्वर्णकारोऽस्ति, स स्वर्णकारो यां यां चारुरूपां कन्यां शृणोति पश्यति वा तां तां स्वर्णपंचशतीं दत्वा परिणयति. एवं तस्य क्रमात्पंचशतानि पत्नीनां बनूवुः, स ईर्ष्यालुरेकस्तंनसौधे तानिः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सहारंस्त, तस्य सुवर्णकारस्यातिवल्लभो नागिलो नाम मित्रमस्ति, स नागिलः पंचाणुव्रतधरः शुद्ध-श्रमणोपासको वर्तते. एकदा पंचशैलद्वीपवासिन्यौ व्यंतरस्त्रियौ शक्राज्ञया नंदीश्वरद्वीपयात्रार्थं प्रास्थिषातां, तत्पतिः पंचशैलद्वीपनायको विद्युन्मालीनामा तदानीं मार्गे च्युतः, ततस्तस्य पत्न्यौ ते हासाप्रहासानाम्न्यौ दध्यतुरथास्माभ्यां कोऽपि पुमांस्तादृग्व्युद्ग्राह्यो यादृगस्माकं पतिर्भवेत्. ततस्ताभ्यां स्वेच्छया प्रयांतीभ्यां चंपापुर्यां पंचशतैः पत्नीनां सह क्रीडन् स कुमारनंदी स्वर्णकारोऽदृश्यत. ततस्ते पतीच्छया व्युद्ग्राहार्थं तत्समीपेऽवातरतां, कुमारनंद्यपि ते दृष्ट्वा प्रोचे, के युवां? किमर्थं चागते? ते प्रोचतुर्देव्यावावां हासाप्रहासानाम्न्यौ भवदर्थं समागते, ते पश्यन् कुमारनंदी मोहमाप, काममोहितश्च स भोगार्थं प्रार्थयांचक्रे, ते ऊचतुस्त्वं पंचशैले द्वीपे समागच्छेः, तत्रावयोः संयोगो भावीत्युक्त्वा ते तूत्पतिते. स्वर्णकारो भूभुजे स्वर्णं दत्वेति पटहोद्घोषणामकारयत्, यो मां पंचशैले द्वीपे नेता स द्रव्यकोटिं लप्स्यते, एकेन निर्यामकस्थविरेण स पटहो धृतः, कोटिधनं चाददे, तद्धनं पुत्रेभ्यो दत्वा यानपात्रं सज्जीकृत्य भोजनादिसामग्रीं गृहीत्वा कुमारनंदिना सार्धं स स्थविरो यानारूढोऽब्धिवर्त्मनि दूरदेशे गत्वा कुमारनंदिनमित्यूचे, भो कुमारनंदिन्! पश्यसि त्वं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किंचित्सन्मुखं? तेनोक्तं कंचिद्वृक्षं पश्यामि, नाविकेनोक्तमब्धिकूले शैलपादजातोऽयं वटो दृश्यते, यदास्याधो यानपात्रं याति, तदास्य शाखायां त्वं विलगेः, तत्र भारंडपक्षिणो निशायां पंचशैलद्वीपाद्यासार्थं समेष्यंति, तेषां स्थानं तत्रास्ति, तेषु सुप्तेषु त्वं तस्य पादे पटेन स्वं बध्ध्वा दृढमुष्टिना विलगेः, पश्चात्ते त्वां पंचशैलद्वीपे नेष्यंति, तव पश्यतश्चैतद्यानपात्रं महावर्ते पतित्वा विनंक्ष्यति, जरयाभिभूतोऽहमविलग्नो वटे निनंक्ष्यामि, अहो जरा पुरुषं विडंबयति, यतः—

गात्रं संकुचितं गतिर्विगलिता दंताश्च नाशं गता । दृष्टिर्भ्रस्यति रूपमेव ह्रसते वक्रं च लालायते ॥ वाक्यं नैव करोति बांधवजनः पत्नी न शुश्रूषते । धिक्कष्टं जरयाभिभूतपुरुषं पुत्रोऽप्यवज्ञायते ॥ १ ॥ स्वर्णकृत्तथा चक्रे, पक्षिपादे च विलग्नः, पक्षिणा तत्र निन्ये, पंचशैले गतः कुमारनंदी हासाप्रहासाभ्यां दृष्टः, तेनापि ते दृष्टे, भोगार्थं प्रार्थिते च, ताभ्यां प्रोचेऽनेनांगेनावयोः संगमो न भवति, किंत्वग्निप्रवेशादिना कृतनिदानेन पंचशैलाधिपत्वं लभ्यते, तेन चिंतितमथ किं करिष्ये? हृयमपि गतं. एवं स्वर्णकारं चिंतामग्नं दृष्ट्वा ताभ्यां पाणिपुटे कृत्वा स चंपोद्याने विमुक्तः, स स्वर्णकारो लोकेनोपलक्षितः, पृष्टं च त्वं कुत्र गतोऽभूः? तत्र गत्वा च त्वया किं कृतं? त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दा तेन स्वर्णकारेणामूलचूलतः स वृत्तांतः कथितः, परं देवमायया मोहितः स्वर्णकारः कुत्रापि रतिं न प्राप्नोति. यतः—संमोहयंति मदयंति विडंबयंति । निर्भर्त्सयंति रमयंति विषादयंति ॥ एताः प्रविश्य सदयं हृदयं नराणां । किं नाम वामनयना न समाचरंति ॥ १ ॥ हासाप्रहासास्नेहमोहितो विस्मृतस्वगृहस्नेहोऽसावग्निसाधनं प्रारेभे. नागिलमित्रेण स एवं प्रबोधितो भो महाभाग! दुःप्रापं मानुष्यं जन्म तुच्छभोगफलार्जनकृते मा मुधा हारय? कापुरुषोचितं तव न युक्तं, को रत्नं दत्वा वराटिकां क्रीणाति? यदि तव भोगेच्छा वर्तते तर्हि जैनधर्मे रतो भव? भगवद्दीक्षां चांगीकुरु? येन हासाप्रहासादिभ्योऽप्यधिका देवस्त्रिय ऋद्धयश्च ते भविष्यंति, यो धर्मश्च भवांतरे मोक्षसौख्यप्रदोऽपि भविष्यति.

एवं वारंवारं नागिलमित्रेण वार्यमाणोऽपि कुमारनंदी स्वर्णकारो न विरराम, किंत्विंगिनीमरणं कृत्वा पंचशैलाधिपोऽभवत्. नागिलोऽपि स्वमित्रस्यापंडितमरणमालोक्य निर्वेदमापन्नः सर्वसंगपरित्यागं कृत्वा परिव्रज्यामुपाददे. सम्यक्परिव्रज्यां पालयित्वाऽच्युते कल्पे द्वाविंशतिसागरोपमायुः स सुरोऽभूत. स देवस्तं सुवर्णकारसुहृदं पंचशैलाधिपमवधिज्ञानेन ददर्श. तस्मिन् समये श्रीनंदी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्वरयात्रायै प्रस्थितैर्देवैः सह ते हासाप्रहासे चलिते, देवानामाज्ञया च ते पुरो गातुं प्रवृत्ते. तदा पटहग्रहणे ताभ्यां विद्युन्माली देवः प्रवर्तितः. अहं किमेतेषां देवानां सेवकोऽस्मि? ममापि किं कश्चिन्नायकोऽस्ति? यस्याग्रेऽहं पटहं वादयामि, इत्यहंकारहुंकारपूरितस्यापि पूर्वकृतकर्मेव पटहस्तस्य गले व्यलगत्. हस्तपादादिवदंगे सहजमिव तेन गलादुत्तार्यमाणोऽपि नोत्तारयितुं शेके. तदानीं हासाप्रहासाभ्यामूचे हे प्राणेश! त्वं त्रपां मा कुरु? कंठे पटहं स्थापय? इह जन्मिनामिदमेव फलमिदमेव च कर्म, कुलोचितं कुर्वतां काचिल्लज्जा नास्ति, त्वमपि मा लज्जस्व? ततो हासाप्रहासाभ्यां मार्गे गायंतीभ्यां समन्वितो विद्युन्मालीदेवो गले पटहं धृत्वा पटहं वादयन् त्रिदिवौकसां पुरश्चचाल. स देवो यात्रायां संगतो हासाप्रहासापतिं विद्युन्मालिनं निजं पूर्वभवमित्रमवधिना ददर्श. नागिलदेवेन विद्युन्माली देवो भाषितः, भो भद्र! जानासि त्वं मां? तं द्युतिद्योतितदिङ्मुखमभिनवभानुमंतमिव तेजसा दीप्यमानं समालोक्य स जगौ भो तेजस्विन्नाहं जाने त्वं कोऽसि? तेनोक्तं भो पाटहिक! त्वं किं मां नोपलक्षयसि? इत्युक्त्वा स नागिलश्रावकरूपं कृत्वा हासाप्रहासारमणंप्रत्यबोधयत्, हे सखे! मयोक्तमर्हद्धर्ममनाश्रयन्नभिमृत्युं च कृत्वा त्वमनयोः पतिर्जा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तः, अहं तु जिनधर्मज्ञस्तदैव जैनीं प्रव्रज्यां लात्वा सम्यगाराधनापरो मृत्वाच्युतदेवलोके महामहर्द्धिको देवो जातः, सोऽहं देवोऽस्मि. तत् श्रुत्वा पंचशैलेश्वरः सुरो नागिलसुरेश्वरमेवमवदत्, भो मित्र! किमथाहं करोमि? नागिलदेवेनोक्तं गार्हस्थ्ये चित्रशालायां कायोत्सर्गस्थितस्य श्रीमहावीरस्य मूर्तिं त्वं कारय? अर्हत्प्रतिमायां कारितायां च तवान्यस्मिन् जन्मनि महाफलं बोधिबीजमुत्पत्स्यते. यतः—

रागद्वेषमोहजितां । प्रतिमां श्रीमदर्हतां ॥ यः कारयेत्तस्य हि स्या—द्धर्मः स्वर्गापवर्गदः ॥१॥ जिनार्चाकारकाणां न । कुजन्म कुगतिर्न च ॥ न दारिद्र्यं न दौर्भाग्यं । न चान्यदपि कुत्सितं ॥ ॥ २ ॥ विद्युन्माली देवस्तस्याज्ञामुररीकृत्य क्षत्रियकुंडग्रामे श्रीवीरजिनं प्रतिमास्थमपश्यत. ततः स देवो महाहिमवति पर्वते गत्वा गोशीर्षचंदनं छित्वा यथादृष्टां तन्मूर्तिं सालंकारां चकार. जात्यचंदनदारुभिः स्वयं घटितामेकां पेटीं कृत्वा विद्युन्माली देवस्तां प्रतिमां कपिलकेवलिपार्श्वे प्रतिष्ठाप्य निधानमिव तस्यां चिक्षेप. तदानीं पयोराशौ कस्यचित्सांयात्रिकस्य पोतस्योत्पातयोगतो भ्रमतः षण्मासी गता, विद्युन्माली देवश्च तं ददर्श. ततस्तमुत्पातं संहृत्य सांयात्रिकाय तं प्रतिमागर्भं समुद्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कमर्पयित्वैवमुवाच, अथ तव निरुपद्रवं सुखं जातं, त्वं सिंधुसोवीरदेशे वीतभयपत्तने चतुष्पथे स्थित्वा घोषणामिमां कुर्वीथाः, इमां देवाधिदेवप्रतिमां गृह्यतां गृह्यतामिति. ततः स सांयात्रिकः प्रतिमाप्रनावतो नदीमिव नदीनाथं समुत्तीर्य तटमासदत्. स सांयात्रिकः सिंधुसोवीरदेशे वीतनये पुरे गत्वा चतुःपथे स्थित्वा तथैवोद्घोषणां चक्रे. तामुद्घोषणां श्रुत्वानेके ब्राह्मणास्तापसाश्च समागताः, तथोदायिनृपोऽपि तत्रागात्. ते विष्णुनक्ताद्या लोकाः स्वेष्टदेवान् स्मृत्वा स्मृत्वा उद्घाटयंति, परं दिव्यानुनावतः सा पेटा नोद्घटति. ततो राज्ञा कुठारेणापि स्फोट्यमाना लोहनिर्मितेव नास्फुटत. एवं दिनमुखादारन्य मध्याह्नं यावदुद्घाटिता, तथापि सा पेटा नोदघटत. राज्ञो नोजनातिक्रमं ज्ञात्वा प्रभावती राज्ञी पतिनक्ता दासीं संप्रेष्य नोजनाय राजानमाह्वयत्. राज्ञापि यथास्थिते प्रोक्ते प्रनावती तत्रागात. देवाधिदेवो नगवान् परमेश्वरो जिनोऽर्हन्, न त्वन्ये ब्रह्मादय इति ज्ञात्वा स्नानं कृत्वा निर्मलधौतिकान् परिधाय चंदनादिनिस्तत्संपुटमनिषिच्य पुष्पांजलिक्षेपपूर्वं प्रभावती प्रणम्योचे, यथा—गतरागद्वेषमोहः । प्रातिहार्याष्टकावृतः ॥ देवाधिदेवः सर्वज्ञो—ऽर्हन् देयाद्दर्शनं मम ॥ १ ॥ इति प्रनावत्योक्ते स प्रतिमास्थानसंपुटः स्वयमेवोद्घटितः प्रगे कमलकोशवत्, तन्मध्ये-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऽम्लानमाल्यां सर्वांगसंपूर्णां देवनिर्मितां गोशीर्षचंदनमयीं सर्वालंकारसंपूर्णां कायोत्सर्गस्थां जिनप्रतिमां प्रभावती मुदैक्षत. ततः प्रभावती राज्ञी सम्यक्त्वपूतात्मा तां प्रतिमां पूजयित्वास्तवीदिति, यथा—सोमदर्शन सर्वज्ञा—ऽपुनर्भव जगद्गुरो ॥ अर्हन् भव्यजनानंद । विश्वचिंतामणे जय ॥१॥ इत्यादिश्लोकैः स्तुत्वा सा तं सांयात्रिकं सत्कृत्य बंधुवच्च सन्मान्य विसर्जयामास. अथ सा प्रभावती तां प्रतिमामंतःपुरे नीत्वा चैत्यगृहं कारयित्वा तत्र च तां प्रतिमां न्यस्य स्नानपूर्वं त्रिसंध्यं पूजयामास. तां प्रतिमां पूजयित्वा प्रभावती तदग्रे गीतनृत्यादि प्रचक्रे, प्रभावतीप्रेमानुविद्धो राजा च वीणामवादयत.

एवं काले यात्येकस्मिन् समये जिनपूजाकरणानंतरं कृतशृंगारा प्रभावती देवी प्रीता जिनपुरतो लास्यतांडवपूर्वकं ननर्त, राजा च तत्प्रेमानुविद्धो वीणामवादयत. तदा महीपतिः प्रभावत्या नृत्यंत्याः क्षणाच्छिरो न ददर्श, किंतु नृत्यंतं तत्कबंधं ददर्शाजिकबंधवत्. अरिष्टदर्शनात् क्षुभितो महीपतिः, तेन तत्कराद्वीणागलत्, तदानीं तालच्युता राज्ञी कुपितावदत्, हे प्राणेश! तव कराद्वीणा कथं गलिता? सत्यमाख्याहि? स्त्रीकदाग्रहो बलवान्, वारंवारं पृष्टो महीपालः सत्यमाख्यत्, हे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रिये! तव नृत्यंत्या मया तव कबंधं दृष्टं, तेन व्यग्रत्वान्मम कराद्वीणा गलिता. राज्यूचे हे प्राणेश! अनेन दुर्निमित्तेन ममायुरल्पमेव ज्ञायते. पुनरन्यदा कृतस्नानविलेपनांगरागा प्रभावती देवार्चार्हाणि श्वेतानि वासांसि दास्या हस्तेनानाययत्. दास्या समानीतानि श्वेतवासांसि, परं भाव्यनिष्टवशात्तानि राज्ञी रक्तान्युदैक्षत. ततः कोपावेशवशाद्राज्ञी तामादर्शेन जघान, सा तु मर्मणि हतत्वान्मृता, मृत्योर्विषमा गतिः. ततस्तानि वस्त्राणि प्रभावती श्वेतान्येव ददर्श. ततः सैवमचिंतयत्, धिग्मम जीवितेन, मया व्रतं खंडितं, अन्यस्यापि पंचेंद्रियस्य वधो नरककारणं, किं पुनः स्त्रीविघातः? अनेन दुर्निमित्तेन ममायुरल्पमेवास्ति, अतो मे व्रतमेव श्रेय इति विचिंत्य सा राज्ञे जगौ, हे नाथ! ममानुजानीहि? तवाज्ञयाहं दीक्षामंगीकरोमि, यतस्त्वं माममौलिमद्राक्षीः, अहमपि वस्त्रवर्णपरावर्तमद्राक्षं, ततो ममायुरल्पमेव संभाव्यते, अतः प्रसन्नो भूत्वा प्रव्रज्याग्रहणे ममांतरायं मा कृथाः.

एवमुक्तो वसुधाधवस्तदाग्रहं मत्वेत्युवाच, हे देवि! देवत्वमाप्तया त्वयाहं सम्यग्धर्मो बोधनीयः, मत्कृतोऽपराधस्त्वया सोढव्यः. ततः सा सर्वविरतिरूपं सम्यक् चारित्रं प्रपद्यानशनं कृत्वा सम्यगाराध-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नां विधाय विपद्य प्रथमे कल्पे महर्द्धिको देवोऽभूत्. अथ तामंतःपुरचैत्यगां देवाधिदेवप्रतिमां देवदत्ताख्या कुब्जिका दास्यपूजयत. प्रभावतीदेवेन बोध्यमानोऽप्युदायनो राट् नाबुध्यत, ततस्तेनावधिज्ञानेन ज्ञात्वायमुपायो व्यधीयत, यथा—तापसीभूय सोऽन्येद्यु—रुदायननृपंप्रति ॥ दिव्यामृतफलापूर्ण—पात्रपाणिरुपाययौ ॥ १ ॥ तानि फलानि भुक्त्वा सोऽवर्णयत्, अहो! ईदृशानि स्वादुफलानि काप्यदृष्टपूर्वाण्यश्रुतपूर्वाणि अस्वादितपूर्वाणीति. एवं तैः फलैर्मोहितो महीपालस्तं मुनिमपृच्छत्, भो मुने! केदृशानि फलानि संति? मह्यं तत्स्थानं दर्शय? तपस्व्यूचे हे राजन्नस्य पुरस्य नातिदूरे ईदृग्फलजन्मभूर्दृष्टिविश्रामो ममाश्रमो वर्तते, राज्ञोक्तं मुने! तमाश्रमं मम दर्शय? मुनिनोक्तं मया सहैहि? दर्शयामि तमाश्रमं, देवो राजानमेकाकिनं कृत्वा किंचिद्गत्वा तादृग्फलमनोरममनेकतापसाकीर्णं नंदनोपममुद्यानं विचक्रे, तमाश्रमं दृष्ट्वा मोहितो राजा एते मम गुरवोऽहमेतेषां भक्तोऽतोऽहं फलभक्षणेच्छां पूरयिष्ये, इति चिंतयित्वा फलादानहेतवे राजा कपिवद्धावे, तावता क्रोधारुणलोचनास्तापसाः करे दंडं धृत्वा राजानं कुट्टयामासुः, तैः कुट्यमानो राजा तस्करवत्पलायिष्ट, पलायमानो राजाग्रे साधूनवस्थितानपश्यत्, राजा तेषां शरणं प्रपेदे, तैः साधु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भिः स्वांतिके निवेश्याश्वासितो नृपतिः स्वस्थीभूतश्चिंतयति, अहो! आजन्मक्रूरकर्मभिस्तापसैर्वंचितोऽस्मि. ततस्ते तापसा राजानं साधुसमीपे समुपविष्टं दृष्ट्वा प्रणष्टाः, स्वस्थचित्तो राजा गुर्वंतिके धर्मं शृणोति, यथा—

देवोऽष्टादशभिर्दोषै—र्मुक्तो धर्मो दयान्वितः ॥ गुरुश्च ब्रह्मचार्येव । निरारंभपरिग्रहः ॥ १ ॥ इत्याद्युपदेशेन पार्थिवः प्रत्यबुध्यत, तस्य राज्ञो हृदि जिनधर्म उत्कीर्ण इव स्थिरोऽभूत. एवं पार्थिवं जिनधर्मे संस्थाप्य प्रभावतीदेवः प्रत्यक्षीबभूव, राजानं देवतत्वगुरुतत्वधर्मतत्वाधिवासितं कृत्वापदि स्मर्तव्योऽहमिति कथयित्वा देवः स्वस्थानं गतः, तत्प्रभृति सम्यक्त्वाधिवासितो राट् सम्यग्जिनधर्ममाराधयामास. इतश्च गांधारदेशजन्मी गांधारो नाम श्रावको विद्याबलेन शाश्वतीरर्हत्प्रतिमा विवंदिषुर्वैताढ्येऽगात, तत्र वैताढ्यमूले गत्वा तस्थौ, त्रिभिरुपवासैस्तुष्टा शासनसुरी तदीप्सितमपूरयत. तं कृतकृत्यं शासनसुरी समुत्पाट्य वैताढ्यतलेऽमुंचत, तस्मै गांधारश्रावकाय शासनसुरी कामदमष्टोत्तरं गुटिकाशतं ददौ, एकां गुटिकां वदने क्षिप्त्वा स दध्यावहं देवाधिदेवप्रतिमां वंदितुं वीतभये पत्तने यामि, मां तत्र पत्तने प्रापय? इति चिंतितमात्रेण स श्राद्धो देवतया देवप्रतिमांतिके नीतः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गांधारश्रावको विधिवत्तां प्रतिमां संपूज्य तत्र सुखेनास्थात्, तत्र सुखेन तस्थुषस्तस्य गांधारश्रावकस्यान्यदा शरीरं सामथं बभूव, देवदत्ता कुब्जिकैष मे धर्मबंधुरिति विचिंत्य तं प्रतिजजागार, गांधारोऽपि सज्जीभूतः सुधीर्महाश्रावकः स्वमासन्नमवसानं विंदन् कुब्जायै ताः पूर्वोक्ताः कामितप्रदा गुलिकाः प्रादात्, स्वयं च प्रव्रज्यामाददे, सा कुब्जिनी रूपार्थिन्येकां गुलिकां मुखे क्षिप्त्वा क्षणेन सुवर्णवर्णा दिव्याकारधारिणी बभूव, अतो राज्ञा लोकेनापि च तस्याः सुवर्णगुलिकेति नाम दत्तं, तया चिंतितं रूपेन किं? यदि मम सदृग्भर्ता नास्ति, अयं तु नृपतिर्मम पितेव, अतोऽन्यो मम पतिः प्राणप्रियश्चंडप्रद्योतोऽस्तीति कथयित्वा द्वितीयां गुटिकां मुखे क्षिप्त्वा तद्रूपं चिंतयंत्यास्ते, तावता गुलिकाधिष्ठायिका देवी चंडप्रद्योताग्रे तद्रूपं वर्णयामास, चंडप्रद्योतोऽपि कुब्जिकारूपमोहितः कुब्जिकायाः प्रार्थनाकृते दूतमादिशत्, दूतोऽपि तत्र गत्वा तां कामार्थमर्थयांचक्रे, सा दूतंप्रत्याह भो दूत! प्रथमं मम प्रद्योतं दर्शय? दर्शनानंतरमुभयोः सर्वं समीहितं भविष्यति, सोऽपि गत्वा सर्वं तथैवाख्यत्, तदैवैरावताभ्दो वासवैवानिलवेगगजसमारूढो निशि प्रद्योतो वीतभयपत्तनं समाययौ, वने च द्वयोः संयोगो मिलितः, प्रद्योतस्य सा रुचिता, तस्याः प्रद्योतोऽपि च रुचितः.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवमन्योन्यमुभावपि मिलितौ, चंडप्रद्योतेनोक्तं हे प्रिये! त्वं मत्पुरीमेहि? यथावयोः संगो भवति, तदानीं सा कुब्जिकावोचत, हे नाथ! यां देवाधिदेवप्रतिमां विनाहं न जीवामि तां मुक्त्वाहं क्वचिन्न यामि, अतोऽमुष्याः प्रतिमायाः प्रतिकृतिस्त्वया कृत्वा समानेतव्या, यथा तामिह मुक्त्वैषा सहैव नीयते, अवंतीपार्थिवस्तत्प्रतिमारूपं निरूप्य तां रजनीं तया सह रंत्वा रजन्यंते पुनः स्वस्थानं ययौ, प्रद्योतः क्षेमेणावंत्यां समागत्य यथादृष्टां देवाधिदेवप्रतिमां जात्यश्रीखंडदारुमयीं तामकारयत, प्रद्योतो मंत्रिणः प्रत्यूचे, हे मंत्रिमुख्या इयं मया चंदनमयी देवाधिदेवप्रतिमा कारिता, परमिमां कः प्रतिष्ठास्यति? मंत्रिणः प्रोचुः स्वामिन्निहास्मिन्नगरे कपिलनामा केवली स्वयंबुद्धः श्वेतांबरो मुनिपंचशतयुतः सांप्रतं समागतोऽस्ति, तव पुण्योदयेन च स एनां प्रतिमां प्रतिष्ठास्यति. ततोऽवंतिनाथेन प्रार्थितः कपिलो मुनिः प्रतिमाशिरसि मंत्रपूतचूर्णान्यक्षिपत्, तां प्रतिमां च प्रत्यष्ठात, ततश्चर्चयित्वा तां प्रतिमां दोर्भ्यां चोध्धृत्य पार्थिवोऽवंतीशोऽनिलवेगस्य करिणः स्कंधे सुखासनस्थः स्वकीयोत्संगेऽधारयत. ततः सोऽवंतिनाथः करिराजसमारूढो वीतभये शीघ्रमागत्य तां प्रतिमां दास्यै समर्पयत. सा सुवर्णगुलिका तां नवीनां प्रतिमां गृहचैत्ये न्यस्य पुरातनीं प्रतिमां समादाय समा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गता. ततो राजा दासीं सुवर्णगुलिकामनिलगिरिगजस्कंधे समारोप्य स्वयं च गजस्कंधमारुह्य द्रुतमवंतीं प्राप.

इतश्च वीतभयपत्तने नित्यकर्मरत उदायनः प्रातर्देवतालयं ययौ, देवगृहे गत्वा यावता प्रतिमां नत्वा स्तुत्वा च सन्मुखं विलोकयति तावता तां प्रतिमां स म्लानमाल्यां पश्यति. तथा दृष्ट्वोदायनश्चिंतयति नूनमियं प्रतिमा काप्यन्या, सा न भवति म्लानमाल्यत्वात्, तस्यां तु पुष्पाण्यारोपितान्यपरेऽह्नि तत्कालोत्तीर्णानीव दृश्यंते. एतानि च सांप्रतं म्लानानि दृश्यंते, पुनः स्तंभलग्ना पांचालिकेव सा सुवर्णगुलिका देवदत्तापरनाम्नी या दास्यासीत सापि न दृश्यते, निदावे मरुवारीव करिणां मदश्च निष्टो दृश्यते, तन्नूनमनिलवेगेनेह चंडप्रद्योतः समागादिति ज्ञायते, सदेवदत्तां तां प्रतिमां च गृहीत्वा चौरवद्गतः, यतोऽसौ कामांधः, काममोहितः पुमांश्च किमकार्यं न करोति? यतः—विकलयति कलाकुशलं । हसति शुचिं पंडितं विडंबयति ॥ अधरयति धीरपुरुषं । क्षणेन मकरध्वजो देवः ॥ १ ॥ लोकेशकेशवशिवत्रिदिवप्रभृणां । चूडामणिः प्रणयिनी प्रथते यदाज्ञा ॥ निःशेषविश्वविजयी विषमेषुरेषु । कं नावधीरयति धीरमपि प्रवीरं ॥ २ ॥ ततः प्रद्योतोपरि कुपित

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उदायनो जयभंजामिव प्रयाणभंजामवादयत, बद्धमुकुटा दश राजानो तमन्वगुः, रुद्रा इव एकादशापि ते राजानो महौजसावंतींप्रति चेलुः, मार्गे संचरत्सैन्यं यावन्मरुस्थल्यां समागतं, तावद्ग्रीष्मकालः समायातः, तस्मिन् समये जलाभावे तृषाक्रांता लोका भूमौ लुठंति, परस्परमास्फलंति, तांस्तृषाक्रांतान् लोकानालोक्योदायनो राजा प्रभावतीदेवं सस्मार, स्मृतमात्रोपस्थितेन तेन देवेन वारिपूर्णास्त्रयस्तटाकाः कृताः, तत्पयः पायं पायं तत्कटकं सुस्थितमभूत्, यतोऽन्नेन विना जीव्येत, परं जीवनीयं विना तु क्षणमेकं न जीव्यते, ततः प्रभावतीदेवो राज्ञः साहाय्यं कृत्वा स्वमालयं जगाम, क्रमेण राजोदायन उज्जयिनीं पुरीं प्राप, ततस्तयोर्द्वयोः सैन्ययोर्मिथः संगरोऽभूत, तस्मिन् संगरे द्वयोः सैन्ययोः सैनिका निधनं गताः, ततश्चंडतेजसा चंडप्रद्योतेनोक्तं भो उदायन! आवयोर्वैरं वर्तते, तद्यावयोः संग्रामो भवतु, किमन्यैर्लोकैर्निधनं नीतैः? उदायनेनोक्तमेवं भवतु, प्रद्योतेनोक्तं रथे स्थित्वा प्रहर्तव्यं. ततः प्रभाते प्रद्योतोऽनिलवेगेभं सज्जीकृत्य तदारूढः संगरे समागात, उदायनश्च रथारूढ एव समागात्, गजस्थं प्रद्योतं दृष्ट्वा चेत्युवाच, हे पापिन्नसत्यसंधत्वात्त्वं नष्टोऽसि, त्वं न भवसीत्युक्त्वा मंडलिकया वेगेन स्वं रथं भ्रामयन् दोष्मानुदायनः शूचिमुखैः शि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लीमुखैर्धनुर्धरधुरंधरोऽनिलवेगस्य विष्वक्पादतलानि विव्याध, अनिलवेगगजेंद्रस्य चत्वारोऽपि पादा बाणैः संभृताः, ततश्चलितुमशक्तो द्विपः पृथिव्यां पपात, उदायनेन प्रद्योतः कुंजरात्पातयित्वा हस्तेन धृत्वा बद्धः, निजयशोराशिरिव प्रद्योतस्य ललाटपट्टे मम दासीपतिरित्यक्षरावलीं लिलेख, उदायनस्तप्तलोहशलाकया तमंकितं निजदासमिव कृत्वा गुप्तिगृहेऽक्षिपत्. ततो दिव्यं प्रतिमारत्नं समानेतुं स प्रद्योतस्य गृहजिनालये गतः, तां प्रतिमां नत्वा पूजयित्वा स्तोत्रेण च स्तुत्वोपादातुमुपाक्रंस्त, परं सा प्रतिमा ततः स्थानाद्गिरिवन्न चचाल, पुनर्देवाधिदेवप्रतिमामर्चयित्वा स इत्युवाच, हे नाथ! मम किं भाग्यं नास्ति? किं कोऽपि मयापराधः कृतो विद्यते यत्परमेश्वर! त्वं मया सह नैषि, तदानीं प्रतिमाया अधिष्ठायको देवोऽप्युवाच, हे महाभाग! त्वं माशोचीः, यद्वीतभयपत्तनं पांशुवृष्ट्या स्थलं भावि, तत्कारणान्नाहं तत्र समेष्यामि, हे महाभाग! त्वं निवर्तय? तं देवतादेशमासाद्योदायनोऽवंतीदेशान्न्यवर्तत, मार्गस्यांतराले प्रयाणवारिणी प्रावृड्बभूव, राजा तत्रैव शिबिरं न्यधात, राजानो यत्र तिष्ठंति तत्रैव नगरं, दश राजानो धूलिवप्रं कृत्वोदायननृपं परितः परिवेष्ट्य तस्थुः, तेन कारणेन तत्र दशपुरं नाम नगरं जातं, उदायनः प्रद्योतं भोजनादिनात्मानमिव बहु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेने, ईदृशः क्षत्रधर्मो वर्तते.

अन्यदा पर्युषणापर्वणि उदायने पौषधिके सूदः प्रद्योतमपृछत्, किमद्य नृप भोद्दयसे? तत् श्रुत्वावंतीनाथो क्षोभादिदमचिंतयत्, अहो मम कदापि न पृष्टं, अद्य च स भोजनेछां पृछति, तत् किंचित्कारणमिति मत्वा प्रद्योतः सूपकारमपृछत्, भो सूपकृत्! त्वया मम कदापि न पृष्टं, अद्य पृष्टं तत्किं कारणं? सूदोऽप्युवाच हे राजन्! अद्य पर्युषणोत्सवः, अद्य सांतःपुरपरिवारो मम स्वाम्युपोषितोऽस्ति, सदा तु राजार्थं रसवती क्रियते, तया रसवत्या च त्वं भोजितोऽसि, अधुना तु त्वदर्थं तां रसवतीं करिष्यामीति पृछामि. प्रद्योतः सूदं स्माह, भो सूद! त्वया वरं कृतं यत्पर्यूषणादिनं ज्ञापितं, ममाप्युपवासोऽद्यास्तु, यतो मम पितरौ श्रावकौ बभूवतुः. सूदोऽपि तत्प्रद्योतस्य भाषितमुदायनायाख्यत्, उदायनोऽप्येवमचिंतयत्, अयं यादृशस्तादृशो वा भवतु, परमस्मिन् कारागारनिवासिनि मम पर्युषणा साध्वी न स्यात्. एवमवधार्य प्रद्योतं कारागारान्मुक्त्वा क्षमयामास, क्षमयित्वा च तस्य भालांकगोपनं स्वर्णरत्नमणिपट्टबंधेन विदधे. तदादि वैभवसूचकः पट्टबंधो राज्ञां जातः, पूर्वं किरीटमेवाभूत् तेषां मौलिमंडनं. उदायनो राट् प्रद्योतायावंतिदेशं ददौ. वर्षारात्रे व्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिक्रांते उदायनो वीतभयं ययौ. दशाभिर्बद्धमुकुटै राजभिर्वासितं पुरं दशपुरं नाम नगरं पृथिव्यां प्रथितं जातं. वीतभयप्रतिमायै विशुद्धधीः प्रद्योतो नृपतिर्दशपुरं दत्वा स्वयमवंतिपुरीमगात. उदायनो राट् विद्युन्मालिकृतायै प्रतिमायै द्वादशग्रामसहस्रान् पूजार्थं प्रददौ.

अत्रांतरे वीतभयस्थितमुदायनं प्रभावतीदेवः स्नेहेन प्रत्यबोधयत्, हे राजन्निह जीवतः स्वामिनो या प्रतिमा नूतना कपिलकेवलिना श्वेतांबरेण प्रतिष्ठितास्ति सापि त्वया पुरातनीव प्रभावनी ज्ञेया तथैव पूजनीया च. समये च त्वया महाफला सर्वविरतिरपि ग्राह्या, उदायनोऽपि राट् देवतावचनं प्रतिपेदे. ततः स देवः स्वस्थानं गतः. उदायनस्तद्दिनादारभ्य विशेषाद्धर्मपरायणो जातः. अन्यदा स्वपौषधागारे स पाक्षिकमहोरात्रिकं पौषधं जग्राह. तत्र राज्ञो धर्मजागरिकायां शुभध्यानेन तस्थुष ईदृगध्यवसायोऽभूत्, ते नगरग्रामादयो धन्या ये श्रीवीरेण स्वचरणरेणुभिः पवित्रिताः, ते राजप्रजादयो धन्या यैस्तन्मुखाद्धर्मोऽश्रावि, तथा तत्पादपद्मसान्निध्याद् गृहिधर्मं द्वादशधा शिश्रियुः. पृथिव्यां ते श्लाघ्यास्ते वंदनीयाश्च ये स्वाम्यंतिके भावतः सर्वविरतिं प्रपेदिरे. यदि स्वामी श्रीवीरो विहारेण विचरन्निह वीतभयपत्तनं पुनाति तर्हि तत्पादमूले प्रव्रज्यामादाय संसारपारं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राप्नोमि. श्रीवीरो भगवांस्तन्मनोगतं भावं ज्ञात्वा चंपापुर्याः प्रचलितः, क्रमेण महीं पावयन् वीतभयपत्तने समागात्. भगवंतं समागतं ज्ञात्वोद्यानपालकेन विज्ञप्तो राजा, तस्य वर्धापनिकां दत्वा स वंदनाय निर्गत,, स्वामिनं वंदित्वा च पुरो निषण्णः. स्वामी श्रीवीरो गंभीरमधुरगिरा वैराग्योत्पादिनीं देशनां विदधे. राजा तां देशनां श्रुत्वा स्वामिनं नत्वा गृहे गतवान्, मनसि चैवं चिंतयामास, अहो यद्यहमभीचये सूनवे राज्यं दद्यां तन्मयैष संसारनाटके नटः कृतो भवेत्, यतो नीतिविदो वदंति नरकांतं राज्यमिति. तत्सूनवे राज्यमहं न ददामीति मत्वा स केशिनि भागिनेये राज्यश्रियं संक्रमयामास निशि सूर्यस्तेजः पावक इव. जीवंतस्वामिदेवाय पूजानिमित्तं ग्रामाकरपुरादिकं भूरि धनं च स शासनेन ददौ. ततः केशिनरेंद्रेण कृतनिष्क्रमणोत्सव उदायनः परिव्रज्यामुपात्तवान्. स व्रतदिनादारभ्य षष्ठाष्टमादिमहातपोभिः स्वात्मानमशोषयत्.

एकदोदायनमुनेः पृथिव्यां विहरतो महाव्याधिरुत्पन्नोऽकालापथ्यभोजनैः स मुनिर्वैद्येन दृष्टः, कथितश्च भो मुने त्वं देहे निस्पृहोऽपि मोक्षसाधनं देहं दधिभक्षणेन रक्ष? तत् श्रुत्वा स मुनिर्दध्यर्थं गोष्टे विचरति, यतस्तत्र दोषविवर्जिता दधिभिक्षा सुलभा भवति. अन्यदा स उदायनराज-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्षिर्वीतभयं पत्तनं गतः. तं महामुनिं समागतं ज्ञात्वा केश्यमात्यैर्भणितं भो राजेंद्र! एष तव मातुलस्तपसा निर्विण्णो राज्यं त्यक्त्वा पश्चात्तापेनेह समागतः, स तव राज्यं ग्रहीष्यति, त्वमस्य विश्वासं मा कार्षीः. केशिनोक्तं राज्यमस्यैवास्ति, अनेन दत्तं, एष एव राज्यं गृह्णातु, अत्र मम किमपि नास्ति. तत् श्रुत्वा मंत्रिणः प्रोचुः, हे राजन् राज्यं तु पुण्येन लभ्यते, तर्हि लब्धं कथं दीयते? तैर्वचनैर्मुदितो राजा केशी उदायने भक्तिं त्यक्त्वा मंत्रिणं प्राहाथ किं कार्यं? मंत्रिणः प्रोचुः स्वामिन्नस्य मुनेर्विषं देयं. ततो मंत्रिणा प्रेरितः केशी राट् मातुलमुनये एकया पशुपालिकया सविषं दधि दापयामास, अहो परप्रेर्यस्य का मतिः? दध्यंतर्गतं विषं देवता जहार. उवाच च भो मुने! सविषं दधि मा भुंक्ष्व? दधिस्पृहां च मा कृथाः? मुनिना दधिभक्षणं परिहृतं, रोगो वर्धितः, रोगनिग्रहणार्थं मुनिः पुनर्दधि जग्राह. सा देवतैवं त्रीन् वारान् विषापहारं चकार. अन्यदा देवताप्रमादेनोदायनो मुनिः सविषं दधि खादतिस्म. ततो विषवीचिभिरात्मनः शरीरं व्याप्तं ज्ञात्वा महर्षिरनशनं प्रपेदे. समाधिना त्रिंशद्दिनान्यनशनं पालयित्वोत्पन्नकेवलज्ञानो विपद्य स शिवं गतः. शिवं गते उदायने देवता समागत्य कोपावेशात्तन्नगरं पांशुवृष्ट्या पूरयतिस्म. तदा सा कपिलर्षि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिष्ठिता जीवत्स्वामिप्रतिमा निधानमिव भूगता बभूव. तत्रैकं कुंभकारं शय्यातरं निरागसं समुत्पाट्य सिनपल्यां नीत्वा तन्नाम्ना कुंभकारकृतमिति तत्र स्थानं चकार.

इतश्चोदायने गृहीतव्रते प्रभावतीकुक्षिजोऽभीचिनामा नंदनश्चिंतयति, अहो मत्पितुः कोऽयं विवेकः? यो मयि पुत्रे सत्यपि भगिनीनंदनाय स्वं राज्यमदात. यद्वा मत्तातो राज्याधिकारी यद्भाति तदेव करोति, राजानं को निवारयति? अथाहं केशिनः सेवां कथं करिष्ये? यतोऽहमुदायनपुत्रः, इति पित्रापमानितः स कुणिकराट्सेवायै जगाम, यतोऽभिमानवतां पराभवे विदेशः श्रेयान्. अथ मातृस्वस्रेयेन कोणिकेन सगौरवं वीक्ष्यमाणः स तत्र सुखेनास्थात्. महाश्रावकः सोऽभीचिः श्रावकधर्मं यथावदपालयत्, परमुदायने पराभवं स्मरन् वैरं न तत्याज. प्राणांते पाक्षिकानशनेन मृत्वा तदनालोच्यासुरोत्तमोऽसौ भुवनपतिदेवो बभूव. तत्रैकपल्योपमायुः परिपाल्य महाविदेहेषूत्पद्याभीचिजीवः शिवं गमिष्यति. या जीवत्स्वामिप्रतिमा चंद्रप्रद्योतकारिता कपिलर्षिप्रतिष्ठिता वीतभये पांशुपूरेण तिरोहितास्ति तस्या एवमुद्धारो भविष्यति. श्रीवीरनिर्वाणात् षोडशशतनवषष्टिवर्षाणि १६६९ यदा यास्यंति तदा पत्तने कुमारपालभूपालो भविष्यति, सोऽन्यदा वज्रशाखायां मु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निचंद्रकुलोद्भवमाचार्यं हेमचंद्रं द्रक्ष्यति, तस्य समीपे जैनं धर्मं समासाद्य स महाश्राद्धो भविष्यति, स तां प्रतिमां महाप्रयत्नेन दिव्यानुभावाच्च पांशुपूरात्कर्षयिष्यति. कुमारपालनृपालो महामहेन तां प्रतिमां समानीय स्वगृहासन्नं स्फटिकमयं प्रासादं कारयित्वा तत्र तां संस्थाप्य प्रत्यहं स्वयं पूजयिष्यति. उदायनेन यद्ग्रामनगरादिशासनं जिनप्रतिमापूजाकृते दत्तं तत्सर्वं कुमारपालः प्रमाणीकरिष्यति. स कुमारपालो नृपालो महाश्राद्धो देवभक्त्या गुरुभक्त्या श्रेणिकसदृशो भारते भविष्यति. इत्थं तृणमिव त्यक्त्वा । राज्यलक्ष्मीमुदायनः ॥ श्रीवीरशासनस्थांत्यो । राजर्षिः परमोऽभवत ॥ ॥ १ ॥ इत्युदायननृपकथानकं समाप्तं. अथानुकंपाभक्तिदानफलमाह—

॥ मूलम् ॥—जिणहरमंडियवसुहो । दाउं अणुकंपभत्तिदाणाइं ॥ तित्थपभावगरेहं । संपत्तो संपइराया ॥ १३ ॥ व्याख्या—जिनगृहेण जिनप्रासादेन मंडिता शोभिता वसुधा पृथिवी येन स तथा, 'दाउंति' दत्वानुकंपाभक्तिदानादि, अनुकंपया दीनदुःस्थितेभ्यो यानि दानानि तान्यनुकंपादानानि, तथा भक्तिदानानि संघेभ्यो यानि दानानि तानि भक्तिदानानि, 'तित्थेत्ति' तीर्थप्रभावकपुरुषाणां मध्ये रेखामद्वितीयभावं 'संपत्तोत्ति' संप्राप्तः संप्रतिराजेति गाथार्थः. ॥ १३ ॥ वि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तरार्थस्तु कथानकादवसेयः, तत्कथा चेयं—

स्वामिना स्थूलभद्रेण । शिष्यौ द्वावपि दीक्षितौ ॥ आर्यमहागिरिरार्य—सुहस्ती चाभिधानतः ॥ १ ॥ श्रीस्थूलभद्रदीक्षितावार्यमहागिर्यार्यसुहस्तिनामानौ तौ द्वावपि यक्षार्यया बाल्यादपि मात्रेव पालितौ खड्गधारोपमतीव्रव्रतधारिणौ निरतीचारचारित्रचारिणौ परीषहेभ्यो निर्भीकौ महाव्रतधुराधौरेयौ श्रीस्थूलभद्रस्वामिपादपद्ममधुकरौ श्रीस्थूलभद्रेण सांगानि दशपूर्वाणि पाठितौ महाप्राज्ञौ स्वामिना स्वपदे स्थापितौ. ततः स्थूलभद्रो महामुनिरनशनेन कालं कृत्वा देवत्वं प्रपेदे. अथ तावार्यमहागिरिसुहस्तिनौ भविकान् प्रतिबोधयंतो धर्मदेशनां कुर्वाणौ पृथिव्यां विचरंतौ स्तः, महागिरिरन्यदा निजं गच्छं सुहस्तिनेऽदात, स्वयं जिनकल्पेन विहर्तुमेकोऽभूत, परं जिनकल्पव्युच्छेदात स गच्छनिश्रया स्थितः. एवं स आर्यमहागिरिर्जिनकल्पार्हया वृत्त्या विजहार, आर्यसुहस्तिसूरयो धर्मदेशनावारि वर्षंतो वारिदा इव विचरंतः पाटलीपुत्रपत्तनं जग्मुः, तत्रार्यसुहस्तिभिर्वसुभूतिनामा श्रेष्ठी प्रतिबोधितः, स जीवाजीवादिविन्महाश्रावकोऽभूत. अथ स वसुभूतिः स्वान् स्वजनान् प्रत्यहं धर्मकथानकैः प्रतिबोधयति, परं बहुलकर्मत्वात्ते स्वजनाः प्रतिबोधं न प्राप्नुवंति. ततो वसुभूतिश्रेष्ठी

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुरोराख्यत्, हे भगवन्! मत्स्वजना मया धर्मोपदेशेन भृशं प्रतिबोधिताः, परं प्रतिबोधयितुं न शक्यंते, अतस्तान् प्रतिबोधयितुं मद्गृहे पादाववधार्यतां, वसुभूतिश्रेष्ठ्याग्रहेण श्रीसुहस्ती तद्गृहं ययौ, तत्र सुस्थानस्थितः सर्वेषां वसुभूतिस्वजनानामन्येषां च सुधातरंगिणीं धर्मदेशनां प्रारेभे, भो भविका एवंविधं मानुष्यमवाप्य धर्मे यत्नो विधेयः, इत्यादि यावत्कथयति तावत्तत्र देशनासन्नन्यार्यमहागिरिर्भिक्षार्थं प्राविशत, तं गुरुं समागतं ज्ञात्वा सुहस्ती स्वकीयासनात्समुत्थाय परमप्रेम्णा वंदतेस्म, श्रेष्ठ्युवाच युष्माकमपि गुरवः संति? यतो युष्माभिरेते वंद्यंते. सुहस्ती स्माह भो श्रेष्ठिन्! ममैते गुरवः, एते सदा त्यागार्हभक्तपानादिभिक्षामाददते, एतेषां पादरजोऽपि हि वंद्यं, एवमार्यमहागिरिं स्तुत्वा तानखिलान् वसुभूतिश्रेष्ठिकौटुंबिकान् प्रतिबोध्य सुहस्ती भगवान् पुनरपि निजं स्थानं ययौ, स श्रेष्ठी स्वजनानेवमूचे, एनं महागिरिमुनिं यदा भिक्षार्थमागतं यूयं पश्यथ तदा त्यज्यमानं भक्तपानादि दर्शयित्वैतस्मै देयं, एतद्दानाद्भवतां महाफलं स्यात्. वसुभूतिस्वजनैस्तथैव कर्तुमारेभे, द्वितीयेऽह्नि महागिरिस्तेष्वेव गृहेषु भिक्षार्थमागात्, महागिरिं समागतं ज्ञात्वा ते श्रेष्ठिबांधवास्तथैवारेभिरे यथा वसुभूतिश्रेष्ठिना पूर्वमुक्तं. आर्यमहागिरिणोपयोगेन तदन्नाद्यशुद्धं ज्ञात्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नादायैव वसतिं गत्वा सुहस्तिनमूचे, हे आर्य! त्वया विनयं कृत्वा महत्यनेषणा कृता, ते हि त्वदुपदेशेन भिक्षां सज्जयित्वा मह्यं ददति, नैवं भूयः करिष्येऽहमित्युक्त्वा पादाग्रे लुठन् सुहस्ती व्यवच्छिन्नजिनकल्पतुलनाकारिणं महागिरिं क्षमयामास, यथा—वुच्छिन्ने जिणकप्पे । काही जिणकप्पतुलणमिह धीरो ॥ तं वंदे मुणिवसहं । महागिरिं परमचरणधरं ॥ १ ॥ जिणकप्पपरिकम्मं । जो कासी जस्स संघचमकासी ॥ सिट्ठिघरम्मि सुहत्थी । तं अज्जमहागिरिं वंदे ॥ २ ॥ वंदे अज्जसुहत्थिं । मुणिपवरं जेण संपईराया ॥ रिद्धिं सव्वपसिद्धिं । चारित्तं पावित्त परमं ॥ ३ ॥ कोसंबीए जेणं । दमगो पव्वावित्त अ जो जाउ ॥ उज्जेणीए संपइ—राया सो नंदउ सुहत्थी ॥४॥

इतश्च जीवंतस्वामिप्रतिमारथयात्रां निरीक्षितुमवंतीपुर्यामार्यमहागिरिसुहस्तिनावायातौ, तौ च सपरिच्छदौ पृथक्पृथक् वसत्यां तस्थतुः. अथ जीवंतस्वामिरथस्ताभ्यामाचार्याभ्यामन्वीयमानः समस्तसंघेन सार्धमवंतीपुर्यां त्रिकचतुष्कचत्वरादिषु भ्रमन् तूर्यनिर्घोषैः संचरन् लोकैर्महर्ध्या पूज्यमानो गतो राजकुलद्वारं. संप्रतिराट् गवाक्षस्थो रथयात्रान्वितं श्रीसुहस्तिनं दूरादृदर्श. दृष्ट्वा चैवं दध्यौ, किमेष यतीशः शांतात्मा पुण्यमूर्तिर्मया पूर्वं कुत्रापि दृष्टो वर्तते? येनास्मिन् दृष्टे ममातीवमोहो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जायमानोऽस्ति, यतः—यस्मिन् दृष्टे भवेन्मोहो । द्वेषश्च प्रलयं व्रजेत् ॥ स विज्ञेयो मनुष्येण । बांधवः पूर्वजन्मनः ॥ १ ॥ इत्येवं विमृश्य प्राप्तमूर्छोऽसाववनितले पपात. श्राः किं जातमिति वदन् परिछदो दधावे, व्यजनैर्वीज्यमानश्चंदनैश्च सिच्यमानोऽवनिशासनो जातिस्मरणमासाद्योदस्थात. स राजा जातिस्मृत्या तं प्राग्जन्मगुरुं ज्ञात्वा सुहस्तिनं तदैव वंदितुमागात. त्रिःप्रदक्षिणीकृत्य पंचांगप्रणतिपूर्वकमार्यसुहस्तिनं गुरुं नत्वा स जिनधर्मस्य फलं पप्रछ. सुहस्ती भगवानाख्यत्, अहो संप्रतिनरेश! जिनधर्मस्य फलं मोक्षः स्वर्गश्च, पुनः पृथ्वीशः पप्रछ, सामायिकस्य किं फलं? गुरुराह सामायिकस्य यत्पुण्यं भवति तस्य संख्यां कर्तुं न शक्यते, हे भगवन्नव्यक्तसामायिकस्य किं फलं? राजन्! राज्यादिकं फलं. एतद्वचनं श्रुत्वा राज्ञः प्रत्ययो जातः, जातिस्मृत्याऽव्यक्तसामायिकफलं ज्ञात्वा सुहस्तिनं नत्वा पार्थिवः प्रोवाच, हे भगवन्! यूयं मामुपलक्षयध्वे किं वा नोपलक्षयध्वे? ज्ञानोपयोगेन ज्ञात्वार्यसुहस्त्याह, हे नरेश्वर! त्वामहं सम्यगुपलक्षये, त्वमात्मीयपूर्वभवचरित्रं सावधानो भूत्वा शृणु?—

हे राजन्! वयमार्यमहागिरिणा सार्धं गछेन सममेकदा कौशांब्यामागताः, साधुबाहुल्याद्वसतेः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संकीर्णत्वाच्च पृथक्पृथक् स्थितावावां, तदानीं दुर्भिक्षे प्रवर्तमाने महर्द्धिकाः श्राद्धा अस्मभ्यमशनपानखादिमस्वादिमादि बहुधा वितरंतिस्म. अन्यदा कस्यापि श्रेष्टिनो गृहेऽस्मदीयाः साधवो भिक्षायै ययुः, तदैको रंकस्तेषां पृष्टस्थोऽन्नं बहुप्रकारं वितीर्यमाणं वीक्ष्य मार्गे मुनीन् जगौ, भो मुनयः! अहं बुभुक्षितोऽस्मि, दीनो दुःस्थो दुर्भगश्चास्मि, म्रियेऽहं, तेन मे किंचिद्भोजनं दीयतां? साधवो जगुर्गुरवो जानंति, वयं तु तदधीनाः स्वयं दातुं किमपि नेश्वराः. ततो मुनिभिः सार्धं रंको गुर्वंतिके गतः, गुरुपार्श्वे गत्वा च भोजनमयाचत. तदा गुरुभिरतिशयज्ञानवद्भिस्तस्याग्रेतनं भवं दृष्ट्वा प्रोक्तं, भो भिक्षुक! त्वं चेद् व्रतं भजसे, तदास्मत्पार्श्वाद्भक्तं लभसे, तदा स रंकोऽचिंतयद्यथा—

अचिंतयदयं रंक—श्चिरं कष्टं सहाम्यहं ॥ तद्वरं व्रतजं कष्टं । यथेष्टं यत्र भुज्यते ॥ १ ॥

रंकः प्राह मम संयमं ददतु, ततो गुरुभिस्तस्मै संयमश्रीर्विश्राणिता, अल्पायुर्मत्वा तस्यान्नपानदानेन भोजयित्वा भाववृद्ध्यै साध्वीप्रतिश्रये साधुयुतः स रंकसाधुः प्रेषितः, साध्वीभिर्महेभ्यप्रियापुत्रीयुताभिश्च वंदितः स रंकमुनिः, तदा ध्यातं तेनाहो धर्मस्य साम्राज्यं! मया यत्कदाचिद् दृष्टं नान्नं तद्भुक्तं, एवंविधाः साध्व्यादयो मामद्यदीक्षितं वंदंते.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं वर्धमानभावः स रंकः पश्चादुपाश्रयमागतः सुखेन सर्वं दिनं निनाय, रात्रौ त्वकस्माद्बलिष्ठाहाराजीर्णत्वादूर्ध्वाधोवमनादिभिर्विशूचिका जाता, ग्लानीभूतो रंकसाधू रात्रौ गुरुभिर्निर्यामितो निधनं गतः, पुनर्यत्र स उत्पन्नस्तदाह—अवंत्यां श्रेणिकराजपट्टे कूणिकः १, तत्पट्टे उदायनः २, तत्पट्टे नवनंदाः ३, तत्पट्टे चंद्रगुप्तः ४, तत्पट्टे बिंदुसारः ५, तत्पट्टेऽशोकश्रीः ६, तस्य सुतः कुणालः ७, स कुणालो बालत्वेनांधः, तत्पत्नी धारिणी, तस्याः कुक्षौ समुत्पन्नोऽसौ रंकसाधुजीवः, जातमात्र एव पितामहेन दत्तराज्यस्त्वं संप्रतिनाम राजाभूः, वयं ते रंकदीक्षादातारो मुनयः, पुनर्भूपोऽवग्भगवन्नेता राजसंपदो भवत्प्रसादतो मया लब्धाः, भगवन्! यदि तदा युष्माकं दर्शनं नाभविष्यत्तदा मम क्वेदृग् राज्यसंपदोऽभविष्यन्? युष्माभिः पूर्वजन्मनि संयमो दत्तः, तेन यूयं मम गुरवः, अस्मिन्नपि भवे भवंत एव मम गुरवो भवंतु, श्रीसुहस्तिकसूरिराह. राजन्नाजन्मस्वर्गापवर्गसुखदं जिनधर्मं भज? येन धर्मेण संसारान्निस्तारो भवति. ततो राजा बहुपरिवारयुतो गुर्वंतिके धर्मं शृणोति, श्रीसुहस्तिकसूरयो धर्मं कथयंति, यथा—स्वर्गः स्यादपवर्गो वा—मुत्रार्हद्धर्मशालिनां ॥ इह हस्त्यश्वकोषादि—संपदश्चोत्तरोत्तरा ॥ १ ॥ प्रत्यग्रहीदथ नृप—स्तदग्रे तदनुज्ञया ॥ अर्हन्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवो गुरुः साधुः । प्रमाणं मेऽर्हतो वचः ॥ २ ॥ अणुव्रतगुणव्रत—शिक्षाव्रतपवित्रितः ॥ प्रधान-श्रावको जज्ञे । संप्रतिस्तत्प्रभृत्यपि ॥ ३ ॥ स तद्दिनादारभ्य संप्रतिराट् जीवदयां पालयति, दीनेभ्यो दानं ददाति, प्रत्यहं नवीनजिनप्रासादवर्धापनिकया दंतधावनं करोति, संध्यात्रये जिनार्चा करोति, प्रतिदिनं साधर्मिकवात्सल्यं करोति, सप्तक्षेत्र्यामत्यर्थं धनं वपति, मनागपि निष्फलां वेलां न निर्गमयति, यतः—

अवाप्य धर्मावसरं विवेकी । कुर्याद्विलंबं न हि विस्तराय ॥ तातो जिनस्तक्षशिलाधिपेन । रात्रिं व्यतिक्रम्य पुनर्न नेमे ॥ १ ॥ अतो धर्मकार्ये राजा विलंबं न करोति, स संप्रतिनृपो दिग्यात्रां कुर्वाणोऽखंडां त्रिखंडां भरतभुवं साधयित्वा जिनायतनमंडितां करोतिस्म, क्रमात्संप्रतिनृपतेस्त्रिखंडाधिपतेरष्टौ सहस्राणि राजानः सेवां कुर्वंति, तथा संप्रतिराजस्य पंचाशत्सहस्रमिता मतंगजा अभवन्, एककोटिमितास्तुरंगमा जाताः, रथानां नवकोटयोऽभवन्, कोटिसप्तमिताः पादात्यसेवकाः, तस्यानेके देवाः सान्निध्यं कुर्वंति, सुवर्णरूप्यमणिमाणिक्यकोशस्य तु प्रमाणं तस्य नृपतेर्न ज्ञायते, श्रीसुहस्तिगुरूक्तं धर्मं सदा कुर्वन् संप्रतिराट् बहुपुण्यमर्जयामास. श्रीसंघेन सह वर्षे वर्षे चैत-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यात्रोत्सवः संप्रतिनृपेन तन्यते, ततः संप्रतिनृपोऽप्यष्टकर्माणि छेत्तुमेवाष्टप्रकाराभिः पूजाभिर्जैनीं प्रतिमामपूजयत, स संप्रतिराड् वैताढ्यं यावत्स्वसेवकान् सामंतांश्च समाहूयेत्यवोचत, भो सामंता यूयं यदि मयि भक्तास्तदा श्रमणोपासका भवत? इति संप्रतिराजादेशात्ते नृपाः श्रावकीभूय स्वस्वदेशेषु जैनं धर्मं प्रवर्तयामासुः. तथा राजादेशाद्बहवः श्राद्धा ग्रामे ग्रामे नगरे नगरे गत्वा धर्मकथाः कथयंति. एवमार्यदेशस्थान् नृपान् जिनधर्मकारकान् कृत्वा शुद्धधीः संप्रतिनृप इति दध्यौ, अनार्यदेशेषु मया कथं जैनधर्मः कारयितव्यः? साधून् विना लोकानां धर्मोपदेशं को ददाति? तेन प्रथमं श्रमणोपासकाः प्रेष्यंते, यथा तत्र ते धर्मोपदेशं दत्वा श्रावकान् कुर्वते. ततः संप्रतिनृपेन बहवः श्रावका यतिवेषधारकास्तत्र प्रेषिताः, तेषां प्रोक्तं च तत्र भवद्भिर्द्विचत्वारिंशद्दोषवर्जित आहारो गृहीतव्यः, साधुभिरिव भवद्भिः स्वाध्यायादि सर्वं साधुकृत्यं कर्तव्यं, यद्येवं च न करिष्यथ तर्हि भवतां सर्वोऽपि ग्रासो मया ग्रहीष्यते, यद्येवं च करिष्यथ तदा द्विगुणो ग्रासो दास्यते. अनार्यलोकांश्च राजेत्युवाच, भो भो जनाः! एते यथा यथान्नपानादि याचंते तथा तथा भवद्भिर्देयमिति, मम करश्च न देयः. तैरपि तत्प्रतिपन्नं.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततः संप्रतिनृपतिनिर्देशात्ते श्रमणोपासका गृहीतसाधुवेषा निर्वाहमात्रगृहीतधना अनार्यदेशेषु ययुः. तत्रत्यलोकास्तान् साधून्नत्वा तदंतिके धर्मोपदेशं शृण्वंति, यथा—अहिंसा सत्यमस्तेयं । त्यागो मैथुनवर्जनं ॥ एतेषु पंचसूक्तेषु । सर्वे धर्माः प्रतिष्ठिताः ॥ १ ॥ प्राज्यानि राज्यानि सद्भोजनानि । सौभाग्यनैरोग्यसुयोग्यवर्ग्याः ॥ रामा रमारम्ययशोविलासाः । स्वर्गापवर्गाः प्रभवंति धर्मात् ॥ २ ॥ इत्यादिधर्मदेशनां श्रुत्वा ते लोकाः प्रतिबोधं प्राप्तास्तेषां साधूनां नित्यं शुद्धान्नपानदानेन प्रतिलाभयंति. क्रमात्तर्यतिभिस्तादृशैस्ते बहवो जना जिनधर्मं ग्राहिताः, जिनभवनादिषु च ते श्रियं वपंतिस्म. तैः साधुभिस्तेऽनार्यदेशवासिनो जनाः श्रावकाः कृताः संतो जल्पंतिस्म, भवतां को गुरुरस्ति? तैरुक्तमस्माकं गुरुः श्रीसुहस्तिकसूरिः. क्रमात्संप्रतिराज्ञा तस्मिन् देशे गुर्वाज्ञया विहारितास्ते साधवस्तत्र तेभ्यो जैनं धर्मं कथयंतिस्म. एवं ते लोका जैनधर्मपरायणा जैनधर्ममेवाराधयंति. एकस्मिन् दिने वंदनार्थमागतः संप्रतिराट्, गुरुणा च धर्मोपदेशो दत्तः, भो संप्रतिनरेंद्र! श्रूयतां? चतुर्धा धर्मः श्रीजिनैरुक्तः, तत्र दानधर्मो मुख्यतयोक्तः, यतो दानं विनापरे धर्माः कर्तुं न शक्यंते, यतः—निखिलेष्वपि धर्मेषु । दानधर्मो विशिष्यते ॥ दानधर्मं विना यस्मा—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्मुक्तिर्नैवाप्यते क्वचित् ॥ १ ॥ तथा सप्तक्षेत्र्यां धनं वपेत्, यथा—जिणभवण १ बिंब २ पुत्थय ३ । संघरूवेसु सत्तखित्तेसु ॥ ववित्र्यधणंपि जायइ । सिवफलयमहो अणंतगुणं ॥ १ ॥ ततो राजा धर्मं श्रुत्वा विशेषतो धर्मासक्तो बभूव. पुरे पुरे जिनप्रासादान् कारयन्, अनेकशो जिनबिंबानि कारयन्, पुस्तकानि लेखयन्, चतुर्विधसंघेभ्यो दानं ददन् दापयंश्च स जिनधर्ममाराधयन् विचरति. ततो ग्रामे ग्रामे पुरे पुरे नृपः सत्रागारानकारयत्. पुनर्गुर्वाज्ञया संप्रतिराजेन त्रिखंडां महीं सुंदरजिनमंदिरमंडितां कुर्वता, षट्त्रिंशत्सहस्रनवीनजिनप्रासादकारापणसपादकोटिजिनबिंबत्रयस्त्रिंशत्सहस्रजीर्णोद्धारप्रासादकारापणपंचनवतिसहस्रपित्तलमयबिंबकारापणसप्तशतदानशालाकारापणादिभिः स्थाने स्थाने धर्मोन्नतिः कृता.

राज्ञा प्राग्जन्मरंकत्वं स्मरता चतुर्षु पुरद्वारेषु महासत्रागारा अकार्यंत, तत्र सर्वेषां भोजनार्थिनां भोजनं दीयते. दानानंतरमवशिष्टमन्नादिकं यत्किंचिद्भवति तत्त महानसनियोगिनो विभज्योपाददिरे. एकस्मिन् दिने राज्ञोक्तं भो महानसिकाः सर्वेषां लोकानां दानानंतरं यदन्नमवशिष्यते तत्साधुभ्यो देयं, भवतां च द्रव्यं दास्यामि, एवं ते सुखिनो जाता महानसिकाः, तद्दिनादारभ्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महानसिका अवशिष्टान्नपानादि राजाज्ञया साधुभ्यो ददिरे. साधवोऽपि तद्देषान्नं तैर्दीयमानं शुद्धा-न्नमिति ज्ञात्वा समाददिरे. राजा कांदविकानथादिशत् जोः कांदविकाः! जवद्गृहे साधवो यत्किं-चिन्मार्गयंति तद्देयं. दाने विलंबो न विधेयः, तन्मूल्यं युष्माकमहं प्रदास्यामि, अत्रार्थे काचिच्छंका न विधेया. एवं राज्ञोक्ते ते तथारेजिरे. विशेषतो जातहर्षास्ते साधून् दानार्थं भृशमाह्वयंति, यतो लाजे सति को न तुष्यति? तथार्यसुहस्ती शिष्यानुरागेण दोषयुक्तं जानन्नपि न निषेधयति, अ-हो शिष्यानुरागो बलीयान्! महांतोऽपि मोहमाप्नुवंति. एकस्मिन् दिने आर्यमहागिरिः सुहस्तिन-मजाषत जो महात्मन्ननेषणीयं राजान्नं जानन्नपि किमादत्से? सुहस्त्युवाच जगवन्नेते पौराः समर्प-यंति, पौराणामन्नपानग्रहणे को दोषः? जगादार्यमहागिरिरहो मायया किं जल्पसि? अथ चाव-योर्विसंभोगो जवतु, महागिरेरेतद्वचनं श्रुत्वा कंपमानशरीरो बाल इव सुहस्ती आर्यमहागिरिपादा-न् वंदित्वा कृतांजलिरेवमुवाच, हे जगवन्नहं सापराधोऽस्मि, अयं ममापराधः क्षम्यतां, मम मिथ्या-दुष्कृतमस्तु, न पुनरीदृशं करिष्येऽहं. आर्यमहागिरिरूचे जो महात्मन्! को नाम ते दोषः? पुरा स्वामिना श्रीवीरेणैतद्विजाषितं, यदीयशिष्यसंताने श्रीस्थूलजद्रमुनींद्रात्परं साधूनां सामाचारी पृथग्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भविष्यति, स्थूलभद्रमुनेश्च पश्चादावां तीर्थप्रवर्तकौ जातौ, अतस्त्वया स्वामिवचः सत्यापितं. एवं सुहस्तिसूरिं संबोध्य श्रीमहागिरिसूरिर्जीवंतस्वामिप्रतिमां नत्वावंत्या विनिर्ययौ. पूर्वं हि दशार्णगिरिसमवसृते श्रीमति चरमजिने श्रीवीरे यथाशक्त्या वंदनाय विनिर्गते श्रीदशार्णभद्रे साभिमाने, तन्निरासार्थं दिवस्पतावैरावतारूढे तत्रायाते गजेंद्रस्याग्रपादे ग्रावणि मग्ने. ततश्च जाते कुंडे तत्र जिनप्रतिमा कारिता. ततस्तत्र गजेंद्रपदनामकं महातीर्थं जातं. तस्मिन् गजेंद्रपदनाम्नि तीर्थे गत्वार्यमहागिरिसूरिणानशनेन देहस्त्यक्तः. एवं त्यक्तदेहो महागिरिः स्वर्गं ययौ, ततश्च्युत्वा च मोक्षं यास्यति. संप्रतिपार्थिवः संपूर्णं श्रावकव्रतं पालयित्वा संपूर्णायुः शतवर्षांतेऽनशनेन विपद्य देवोऽभूत्, ततश्च्युत्वा मोक्षं यास्यति.

अथ श्रीसुहस्तिकसूरिर्विहारं कृत्वा तीर्थयात्रां च कृत्वा पुनरुज्जयिनीं पुरीं जीवंतस्वामिप्रतिमावंदनार्थं समाययौ, तत्रोज्जयिन्यां भद्राश्रेष्ठिन्याः पुत्रमवंतिसुकुमालं प्रतिबोध्य नलिनीगुल्मविमानसुखसंगिनं चक्रे. मह्यां विहरन् भगवानार्यसुहस्त्यपि गच्छभारं समये शिष्याय समर्प्य विहितानशनो देहं त्यक्त्वा सुरलोकातिथित्वं प्रपेदे, ततश्च क्रमान्मुक्तिं यास्यति. सश्रीकार्यमहागिरि—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुहस्तिनौ स्थूलभद्रवरशिष्यौ ॥ निर्मलदशपूर्वधरौ । संप्रतिनृपवंदितौ वंदे ॥ १ ॥ अव्यक्तसंयमफलः । सुहस्तिकरदीक्षितो द्रमकजीवः ॥ संप्रतिनाम नरेंद्रो । जातो दानेन कल्पतरुः ॥ २ ॥ इत्यार्यमहागिरिसूरिश्रीसुहस्तिकसूरिसंप्रतिनरेंद्रकथानकं समाप्तं. ॥ पुनर्दानफलं दर्शयन्नाह—

॥ मूलम् ॥—दाउं सद्धासुद्धे । सिद्धे कुम्मासए महामुणिणो ॥ सिरिमूलदेवकुमारो । रज्जसिरिं पाविउं गरुअं ॥ १४ ॥ व्याख्या—' दाउं ' दत्वा, कान्? ' कुम्मासएत्ति ' कुल्माषकान्, कथंभूतान्? ' सिद्धेत्ति ' सिद्धान् पक्वानित्यर्थः, पुनः कथंभूतान्? ' सद्धासुद्धेत्ति ' श्रद्धया शुद्धानित्यर्थः, कस्य? महामुनेः, ' सिरिमूलदेवकुमारोत्ति ' श्रीमूलदेवनाम्ना कुमारो राज्यश्रियं ' पाविउंत्ति ' प्राप्तः, क्वचित्स्वार्थे पिणिग्विधानात, कथंभूतां राज्यश्रियं ' गुरुअंति ' महतीमिति गाथार्थः. ॥ १४ ॥ विस्तरार्थस्तु कथानकादवसेयस्तत्कथा चेयं—

गौडदेशे विख्यातं पाडलीपुरं नाम्ना पत्तनं विभासते, तत्र राजपुत्रो धियां निधानं कलाकलापकुशलो मूलदेवो नाम बभूव, स कीदृशः?—चौरे चौरः, साधौ साधुः, वक्रे वक्रः, ऋजौ ऋजुः, ग्राम्ये ग्राम्यः, छेके छेकः, विटे विटः, नटे नटश्च. तथा—द्यूतकारे द्यूतकारो । वार्तिके वार्ति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कश्च सः ॥ तत्कालं स्फटिकस्येव । जग्राह पररूपतां ॥ १ ॥ चित्रैः कौतूहलैस्तत्र । लोकं विस्मापयन्नसौ ॥ विद्याधर इव स्वैरं । चचार चतुराग्रणीः ॥ २ ॥ सोऽन्यदा द्यूतव्यसनासक्तो मूलदेवः पित्रा निजराज्यान्निष्कासितः, स्वपुरान्निर्गत एकाकी स इतस्ततो भ्राम्यन्नुज्जयिन्यां जगाम, तत्र गुटिकाप्रयोगेण वामनो भूत्वा पौरान् विस्मापयामास. इतश्च तत्रैव पुरे लावण्यकलाविज्ञानगुणैः कुशला देवदत्तानाम गणिकाभवत, सा च कलावती गणिकागुणोपेता रूपगुणगर्विता चाभूत, मूलदेवेन श्रुतमेषा गणिका सामान्यपुरुषेण केनापि न रज्यते, तर्ह्यहमेनां रंजयामीति कृत्वा तस्या गणिकायाः क्षोभार्थं तद्गृहांतिके प्रभाते तुंबरुरिव मधुरगीतेन गातुमारेभे, तं मधुरध्वनिमाकर्ण्य देवदत्तापि दध्यौ, कस्यैष मधुरध्वनिरिति विस्मयात्तं ज्ञातुं दासीं प्रेषयामास, गृहाद्बहिः स्थित्वा सा दासी तं दृष्ट्वा पश्चादेत्य स्वामिनींप्रति जगौ, हे स्वामिनि! एष कोऽपि गांधर्वः सर्वकलाकुशलो मूर्त्यैव वामनो न पुनर्गुणेन वामनः, तत् श्रुत्वा विस्मिता देवदत्ता द्वितीयां दासीं माधवीनाम्नीं मूलदेवमाह्वातुं प्रेषयामास, सा दासी तत्र गत्वा जगाद, अहो महात्मन्! हे महाभाग! मम स्वामिनी देवदत्तागणिका त्वामाह्वयति सगौरवं, तत श्रुत्वा मूलदेवेनोक्तं न प्रयोजनं मे गणिकाज-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नसंसर्गेण, बुधैर्निवारितो विशिष्टानां वेश्याजनसंसर्गः, यतः शास्त्रेऽप्युक्तं—या विचित्रविटकोटिनिघृष्टा । मद्यमांसनिरतातिनिकृष्टा ॥ कोमला वचसि चेतसि दुष्टा । तां भजंति गणिका न विशिष्टाः ॥ १ ॥ यापि तापनपराग्निशिखेव । चित्तमोहनकरी मदिरेव ॥ देहदारणकरी क्षुरिकेव । गर्हिता हि गणिका सलिकेव ॥ २ ॥ अतो मे नास्ति गणिकाभिलाषः, तयानेकाभिर्भंगीभिराराध्य मूलदेवचित्तं विस्मयं प्राप्यात्याग्रहेण करे गृहीत्वा स देवदत्तागृहे नीतः, मार्गेण गच्छता मूलदेवेन सा कुब्जिकादासी कलाकौशलेन विद्याप्रयोगेण पार्ष्णिनास्फाल्य सरलीकृता देवदत्तागणिकाविस्मयार्थं, स प्रविष्टो देवदत्तागृहे, देवदत्तया वामनरूपधार्यप्युत्कृष्टलावण्यवानपि स विरूपो दृष्टः, तस्य प्रवरासनं दत्तं, स तत्रासने निषण्णः, देवदत्तया तांबूलं दत्तं, तदानीं तया सा माधवीदासी सरला सुंदररूपा च दृष्टा, देवदत्तया पृष्टं किमेतत्? तया सकलः स्वकीयो वृत्तांतः कथितः, तदा मूलदेवोपरि विशेषतो मोहिता देवदत्ता, मधुरवचनैश्च भाषितस्तया देवदत्तः, मूलदेवेनापि सा भाषिता, उभयोरपि स्नेहो जातः, यतः—

मृगा मृगैः संगमनुव्रजंति । गावश्च गोभिस्तुरगास्तुरंगैः ॥ मूर्खाश्च मूर्खैः सुधियः सुधीभिः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समानशीलव्यसनेषु योगः ॥ १ ॥ तस्मिन् समये देवदत्तांतिके कश्चिद्वीणावादकोऽचलाभिधः समागात, तेन वादिता वीणा, कि..स्वरेण गानं कृतं, मोहिता देवदत्ता, प्रशंसितो वीणावादकः, तदानीं मूलदेवः किंचित् स्मित्वावगद्हो महानिपुण उज्जयिनीजनो गुणागुणयोर्विवेचनं जानाति हंस इव दुग्धपयसोः! इति वक्रोक्तिं श्रुत्वा वेश्यावग्गो मूलदेव! किमत्रास्ति क्षूणं, यत्त्वं ममोपहासं करोषि? यदि किमपि क्षूणं भवति तद्वक्तव्यं, मूलदेवेनोक्तं श्रूयतां? अशुद्धो वंशः, सगर्भा तंत्री, वेश्ययोक्तं त्वया कथं ज्ञातं? ततो मूलदेवो वल्लकीं करे कृत्वा वंशे पाषाणखंडं, तंत्र्यां केशं चादर्शयत्, ततो मूलदेवो वीणां सज्जीकृत्य स्वयमवादयत्, तेन वीणानादेन देवदत्ता पराधीनमानसा कर्णपरवशा कृता, यतः—सुखिनि सुखनिधानं दुःखितानां विनोदो । हृदयश्रवणहारी मन्मथस्याग्र्यदूतः ॥ अतिचतुरसुगम्यो वल्लभः कामिनीनां । जयति जगति नादः पंचमश्चोपवेदः ॥ १ ॥ अतिविस्मिता देवदत्ता, वीणावादकोऽपि विस्मितः, ततश्चिंतितमुभाभ्यामहो एतस्य कलाकौशलं सकललोकचमत्कारकारकं! ताभ्यां पूजितो मूलदेवः, आगता भोजनवेला, विसर्जितो वीणावादकः, देवदत्तया भणितं भो माधवीसखि! कंचिदंगमर्दकं समानय? येन मूलदेवेन समं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मज्जनं करोमि, तदानीं मूलदेवेन भणितं ममानुज्ञां देहि? यथाहं तवांगमर्दको भवामि, देवदत्त- योक्तं, किं जानासि त्वमभ्यंगकर्म सम्यक्? सम्यगहं जाने, किंतु ज्ञातृपार्श्वे स्थितोऽस्मि, समानी- तं चंपकतैलं, बद्धपरिकरो मूलदेवो देवदत्तायास्तैलमर्दनं चक्रे, तेन मर्दनेन देवदत्ता विस्मयं ग- ता चिंतयत्यहो एतस्य विज्ञानातिशयः! अहो कोमलः करतलस्पर्शः! ततोऽत्र किंचित्कारणं वर्त- ते, न ह्येष वामनः, किंत्वेष सिद्धपुरुषो वामनरूपेण जनानेवं विस्मापयति, अथाहं विनयेनास्य रूपं प्रकटीकारयामीति विचिंत्य मूलदेवपादौ निपत्यैवं सा विज्ञपयति, भो महात्मन्नसदृशगुणेन त्वं मया ज्ञातो यत्त्वं महानसि, जनवत्सलोऽसि, अतो मय्यनुग्रहं विधाय स्वरूपं दर्शय? तद्दर्शनाया- त्यर्थं मम मानसमुत्कंठते, एवं पुनः पुनर्देवदत्तया प्रोक्ते ईषद्धास्यं विधाय तेन स्वास्याद्देषपराव- र्तिनी गुलिकाकर्षिता, तत्क्षणादेव मूलदेवो देव इव दिव्यरूपो बभूव, अनंगतुल्यरूपं लावण्यैक- सागरं च तं वीक्ष्य विस्मिता देवदत्ता प्राह हे प्राणेश! स्नानीयं वस्त्रं परिधेहि? यथा ते स्नानं का- रयामि, मूलदेवेन स्नानवस्त्रं परिहितं, प्रीता देवदत्ता सानुरागा स्वपाणिना तदंगाभ्यंगं रचयामास, यथा—खलीप्रक्षालनापूर्वं । पीठांतकसुगंधिभिः ॥ कवोष्णवारिधाराभि—स्ततो द्वावपि सस्नतुः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ १ ॥ देवदुष्यं देवदत्तो—पनीतं पर्यधत्त सः ॥ सुगंधाज्यानि भोज्यानि । बुभुजाते समं च तौ ॥ २ ॥ रहः कलारहस्यानि । वयस्यीभूतयोस्तयोः ॥ मिथः कथयतोरेकः । क्षणः सुखमयो ययौ ॥ ३ ॥ ततः सा व्याजहार त्वया लोकोत्तरैर्गुणैर्मम हृदयं हृतं, अद्यप्रभृत्यहं क्षणमपि त्वां विना स्थातुं न शक्नोमि, मूलदेवोऽवगस्मादृशेषु निर्धनेषु विदेशिषु युष्मादृशानामनुबंधो न युज्यते, देवदत्ता जगौ को विदेशो भवादृशां? गुणिनां कोऽपि परदेशो नास्ति, सर्वोऽपि स्वदेश एव, अतो भो महात्मन्! सर्वथा त्वया मद्वचः प्रतिपत्तव्यं, ततो मूलदेवेनोक्तमेवमस्तु, भवद्वचो मे प्रमाणं, ततस्तयोः क्रीडतोः स्नेहाद्विविधैर्विनोदैर्दिवसाः सुखेन यांति.

एकस्मिन् दिने राजद्वाःस्थः समागत्य देवदत्तामेवमब्रवीत, आगच्छ भो देवदत्ते! सांप्रतं प्रेक्षाक्षणो वर्तते, अतस्त्वामधुना राजा समाह्वयति, सापि मूलदेवं सह नीत्वा राजवेश्मनि गत्वा रंगेव राजाग्रे नृत्यमारेभे, तदा मूलदेवोऽपि निपुणः पटहमवादयत्, तदा राजा तस्या नृत्यकरणेन रंजितो जगौ, मार्गय वांछितं ददामि, तयोक्तमयं प्रसादः कोशे तिष्ठतु. ततो राजा तुष्टः स्वांगलग्नं विभूषणं तस्यै ददौ, राज्ञः पुरतो नृत्यं कृत्वा सा देवदत्ता मूलदेवेन सहिता गृहे गता सुखेन ति-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्टति, परं मूलदेवोऽतीवद्यूतप्रसंगी, तेन परिधानांशुकमपि तस्य शरीरे न तिष्टति, तदपि द्यूते हा- रयति, तदानीं देवदत्तया प्रोक्तं, हे स्वामिन्! महतां कलंककारणं द्यूतव्यसनं त्यज? यतः—द्यूतं सर्वापदां धाम । द्यूतं दिव्यंति दुर्धियः ॥ द्यूतेन कुलमालिन्यं । द्यूतं च श्लाघतेऽधमः ॥ १ ॥ एवं वारंवारं विनयेन वेश्योक्तोऽपि स व्यसनं न तत्याज. इतश्च देवदत्ताया गाढानुरक्तः पूर्वप्रसंग्यचल- नामा सार्थवाहपुत्रो दानप्रसंगी धनवान् देवदत्ताजननी वस्त्राभरणादि यन्मार्गयति तत्सर्वं समर्प- यति, स च मूलदेवोपरि द्वेषं वहति, तथा छिद्राणि विलोकयति. सोऽपि मूलदेवस्तस्य भीत्या स- ति तस्मिन् गृहे न प्रविशति, यत एकस्मिन् करवाले द्वौ प्रतीकारौ न स्तः. एकस्मिन् दिने मात्रा प्रोक्तं हे पुत्रि देवदत्ते! एनं निर्धनं द्यूतव्यसनिनं मूलदेवं परिहर? अचलं श्रेष्ठिपुत्रं दानकल्पतरुं चांगीकुरु? तया भणितं हे मातर्नाहमेकांतेन धनानुरागिणी, किं त्वहं गुणानुरागिणी, मम गुणे- ष्वेव प्रतिबंधः. जनन्या प्रोक्तं कीदृशास्तस्य द्यूतकारस्य गुणाः? तया भणितं हे मातः केवलं गु- णवानेवैषः, यतः—धीरो उदारचित्तो । दक्खिणमहोअही कलानिउणो ॥ पियभासी अकयण्णू । गुणाणुराई विसेसण्णु ॥ १ ॥ अतो न त्यजाम्येनं. ततः सा कुट्टिनी दृष्टांतैर्देवदत्तां बोधयति, य-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

था—अलक्तके मार्गिते सा नीरसमलक्तकं ददाति, इक्षुदंडे प्रार्थिते इक्षुत्वचां ददाति, कुसुमे याचिते कुसुमबिंटं ददाति, कुंभे याचिते च ढंकनिकां ददाति. इति कृत्वा च वदति हे पुत्रि! अत एनं पुरुषाधमं निर्धनं व्यसनिनं त्यज? धनदोपममचलं च भज? यथा ते सर्वसमीहितं कल्पवृक्षवत्पूरयति. देवदत्तया चिंतितमेषा किमपि न जानाति, अतोऽहं जनन्या दर्शयामि द्वयोर्विवेकं. एकदा तया मात्रे प्रोक्तं हे मातस्त्वमचलपार्श्वे इक्षुं मार्गय? तया तस्य कथितं, तेनापीक्षुयष्टीनां शकटं भृत्वा प्रेषितं, मात्रोक्तं हे पुत्रि! यथेच्छया भुंक्ष्वेक्षुयष्टीः. तयोक्तं हे मातः किमहं करिणी? यदेता इक्षुयष्टीर्भक्षयामि. तया भणितं पुत्रि! एष उदारचित्तः, तेनेदमेतावत्प्रेषितं. तयोक्तं हे मातरथ मूलदेवचातुर्यं तव दर्शयामि, एवमुक्त्वा माधवीनामदासी समाकारिता, उक्तं च—भो माधवि! मूलदेवाग्रे गत्वा वद? यथा देवदत्तेक्षुं याचते, माधविकया याचितो मूलदेवः, मूलदेवेन गृहीते द्वे इक्षुयष्टिके, निस्त्वचीकृते च.

ततस्तयोर्ग्रंथिरहितांगुलद्वयमिता खंडाः कृताः, ते चोर्ध्वं द्विर्भिन्नाः, पश्चात्तान् किंचित्किंचिच्चतुर्जातिर्भित्वा कर्पूरवासितान् कृत्वा नवशरावद्वये चिक्षेप. ततस्तज्जलार्द्रवाससा विधाय वातायना-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भिमुखं संस्थाप्य देवदत्तायै प्रेषयामास. माधवी तानीक्षुखंडान् देवदत्तायै चार्पयामास. तया जननी भणिता, हे मातः प्रेक्षस्व पुरुषयोरंतरं. अतोऽहं मूलदेवगुणानुरक्ता, न त्वहं धनाभिलाषिणी, अ· क्कया चिंतितं, मम पुत्री देवदत्ता मूलदेवेऽत्यंतं रक्ता तं न त्यजति, ततोऽहं केनाप्युपायेन त्याज· यामि, यथापमानेन स देशांतरं याति, ततश्च सुस्थं भवति. एवं विचिंत्यैकस्मिन् दिनेऽक्कयाचलो भणितः, भो अचल! त्वमलीकं ग्रामांतरगमनं देवदत्ताग्रे कथय? तेन देवदत्ताग्रे कथितमहं ग्रामां· तरं यामि. तं ग्रामांतरगतं ज्ञात्वा गृहाभ्यंतरे तया मूलदेवः प्रवेशितः, तस्या जनन्याचलस्य ज्ञा· पितं, समागतोऽचलो महासामग्र्या, अचलो गृहाभ्यंतरे प्रविशति यावत्तावद्देवदत्तया मूलदेवस्यो· क्तमन्यत्र कुत्रापि गोप्यस्थानं नास्ति ततस्त्वं पल्यंकस्याधः क्षणमेकं तिष्ठ? यावदेषोऽचलोऽन्यत्र याति. इत्युक्त्वा तया मूलदेवः पल्यंकाधः स्थापितः, अक्कया संज्ञितोऽचलः समागत्य पल्यंकोपरि निषण्णः, अचलेनोक्तं स्नानसामग्रीं कुरु? देवदत्तया भणितं पल्यंकादुत्तिष्ठ? स्नानोचितं वस्त्रं च प· रिधेहि? येनाहमभ्यंगं करोमि. अचलेनोक्तं मया दृष्टोऽद्य स्वप्नो यथा परिहितवस्त्रः पल्यंके स्थित एवाहं स्नातः. तत्सर्वं मम स्वप्नदृष्टं त्वं सफलं कुरु? देवदत्तया कथितं स्वामिन् किमर्थं महार्घ्यां तू·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लिका विनाश्यते? अचलेनोक्तमितोऽपि विशिष्टतरां तूलिकां ते दास्यामि, किमनया तूलिकया? जनन्योक्तमेवं भवतु, देवदत्ता तूष्णीका स्थिता. अचलस्तस्यामेव शय्यायां स्थित्वा तैलाभ्यंजनोद्वर्तनखलिक्षालनादिकं तथा चक्रे यथा पल्यंकाधःस्थो मूलदेवः खल्याद्यशुचिखरंटितोऽभूत. जनन्या संज्ञया मूलदेवः पल्यंकाधोभागे दर्शितः, अचलेन स्वपुरुषैर्ग्राहितः, चौरवद्बद्धो भणितश्च भो मूलदेव! निरूपय यदि कोऽप्यस्ति शरण्यः, मूलदेवेन चतुर्दिक्षु विलोकितं, दृष्टाश्चतुर्दिक्षु सायुधा अचलपुरुषाः, तैर्वेष्टितं स्वं दृष्ट्वा तेन चिंतितमेते सायुधाः, अहं च निरायुधः, अतः पौरुषस्यावसरो नास्ति, इति विचिंत्यापदि स्थितेन मूलदेवेनोक्तं भो अचल! यत्ते रोचते तत्कुरु? अचलेन चिंतितमाकृत्या ज्ञायते एष कश्चिदुत्तमपुरुषः, सुलभान्येव महापुरुषस्यापि व्यसनानि, यतः—को एत्थ सया सुहिओ। कस्सवि लच्छी थिराइं पेमाइं ॥ कस्सवि न होइ खलियं। भण कोवि न खंडिओ विहिणा ॥ १ ॥

इति विचिंत्याचलेनोक्तं भो मूलदेव! सांप्रतं त्वं मया मुक्तः, कदाचिदवसरेऽहमपि त्वया मोच्यः. ततो विमनस्को नगरान्निर्गतो मूलदेवश्चिंतयति—नटविटभटसक्तां सत्यशौचादिमुक्तां। क-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पटशतनिधानं शिष्टनिंदानिदानं ॥ धननिधनविधानं सद्गुणानां पिधानं । परजनविपदानां कः प्रणयीं भजेत ॥ १ ॥ विणठा मुहरसिया । नेहविहूणा विलग्गए कंठे ॥ पच्छा करइ विआरं । बलहम्सारिछिआ वेसा ॥ १ ॥ अहो अचलेनाहं छलितः, किं करोमि? प्रथमं सरोवरे गत्वा स्नानं करोमीति चिंतयता तेन सरोवरे गत्वा स्नानं कृतं, कस्मिंश्चिद्देशे गत्वैतस्य काचिद्विपत्तिं करोमि, यथानेन मम विरूपमाचरितं तथाहमपि तस्य विरूपमाचरामि. एवं वैरनिर्यातनं च कृत्वा स्वस्थो जवामि, ततश्चलितोऽसौ बेन्नातटाभिमुखं, मार्गे ग्रामनगरादि मुंचन् प्राप्तोऽसौ द्वादशयोजनमानामेकामटवीं. तत्र प्रविशन् मूलदेवश्चिंतयति यदि कश्चिद् द्वितीयः सखा लभ्यते तदा सुखेनाटवीपारो लभ्यते. तावत्तैवागतः कश्चित्सुंदराकृतिः शंबलसक्थुकग्रंथिधारकष्टक्कब्राह्मणः, अनेन पृष्टं भो विप्र! त्वं कुत्र यासि? तेनोक्तमस्या अटव्या अंते, कांचिद्भुवं गत्वाग्रे वीरनिधाननाम ग्रामो वर्तते, तत्राहं गमिष्यामि. ततो विप्रेण पृष्टं त्वं कुत्र यासि? मूलदेवेनोक्तमहं बेन्नातटे गमिष्यामि. ततो द्वावप्येकीभूयाटव्यां प्रविष्टौ, मार्गे वार्तां कुर्वाणौ तौ गच्छतश्च, एवं गच्छतोस्तयोर्मध्याह्नसमयो जातः, मार्गे गच्छद्भ्यां ताभ्यां जलपूर्णमेकं सरो दृष्टं, ब्राह्मणेनोक्तमावामस्मिन् सरोवरे क्षणमेकं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विश्रामार्थं तिष्ठावः. ततस्तत्र गत्वा तौ द्वावपि निर्मलनीरे स्नातौ. पालिस्थितवृक्षछायायां च स्थितौ, टक्कविप्रेण शंबलग्रंथिकातः कर्षितं भाजनं, तस्मिन् भाजने सक्थुकं जलमिश्रं कृत्वा स खादितुं लग्नः, मूलदेवश्चिंतयति विप्रजातय ईदृशा एव क्षुधार्ता भवंति, भक्षणानंतरमेव मम किंचिद्दास्यति, विप्रोऽपि तदन्नं भुक्त्वा शंबलग्रंथिकां बबंध, ततोऽग्रे द्वावपि चलितौ, मूलदेवेन चिंतितमपराह्णे दास्यति, अग्रे गत्वा तथैव भुक्तं, परं किंचिदपि न दत्तं, मूलदेवेन पुनश्चिंतितं कल्ये दास्यति, इत्याशया च मार्गे स तेन सह गच्छति.

एवं गच्छतोस्तयो रजनी समागता, ततो मार्गं मुक्त्वा द्वावप्येकस्य वटस्याधः सुप्तौ, प्रत्यूषे तथैवोच्छाय मार्गे चलितौ, मध्याह्ने तथैव भुक्तं विप्रेण, परं मूलदेवस्य तथैव किमपि न दत्तं, एवं तृतीये दिने चिंतितं मूलदेवेन सांप्रतं निस्तीर्णप्रायाटवी, तेनावश्यमेवाद्य किंचिद्दास्यत्येष विप्रः, तथापि किमपि न दत्तं, एवमटवीमुल्लंघ्याग्रे गच्छता विप्रेणोक्तं भो भद्रैष तव मार्गोऽनेन मार्गेण त्वं याहि? अहमनेन मार्गेण यामि, एवमुक्त्वा यावता स विप्रो याति तावता मूलदेवेनोक्तं भो भद्राहं तव प्रसादेनैतावतीं भूमिमागतः, मूलदेवनामाहं क्षत्रियो बेन्नातटे यामि, यदि तव प्रयोजनं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किमपि भवति तदा समागच्छेर्बेन्नातटे, पुनः कुमारेणोक्तं तव किं नाम? तेनोक्तं सिद्धजटो जन-कृतनिर्घृणशर्मेत्यपरनामाहं, एवमुक्त्वा विप्रः स्वग्रामे गतः, मूलदेवो बेन्नातटनगराभिमुखं चलितः, मार्गे कश्चिद् ग्रामः समागतः, तत्र प्रविष्टः क्षुधार्तोऽसौ भिक्षायै भ्रमति, तेन मूलदेवेन भिक्षायै भ्रमता कुल्माषा लब्धाः, नान्यत्किमपि लब्धं, तान् गृहीत्वा स गतो जलाशयाभिमुखं.

तस्मिन् समये कश्चिन्महामुनिस्तपःशोषितशरीरो महानुभावो महातपस्वी मासोपवासपारणके भिक्षार्थं तस्मिन् ग्रामे प्रविशन् मूलदेवेन दृष्टः, तं मुनिवरं दृष्ट्वा हर्षवशोत्पन्नरोमांचकंचुकितशरीरो मूलदेवश्चिंतयति, धन्योऽहं कृतपुण्योऽहं येन मयास्मिन् कालेऽस्मिन्नवसरे एष महातपस्वी साधुः कल्पवृक्षोपमो मया प्राप्तः, ततो ममावश्यं महानुदयो कल्याणं च भविष्यतः, यथा—मरुत्थलीए जह कप्परुक्खो । दरिद्दगेहे जह हेमवुठी ॥ मायंगगेहे जह हत्थिराया । मुणीमहप्पा तह अम्ह ए-सो ॥ १ ॥ किंच—दंसणनाणविसुद्धं । पंचमहव्वयसमाहियं धीरं ॥ खंतीमद्दवअज्जव—जुत्तं मु-त्तिपहाणं च ॥ १ ॥ सज्झायज्झाणतवो—वहाणनिरयं विसुद्धलेसागं ॥ पंचसमियं तिगुत्तं । अकिं-चणं चत्तगिहिसंगं ॥ २ ॥ सत्तसुखित्ते ववियं । विसुद्धसद्धाजलेण संसित्तं ॥ निहियं तु दव्वसस्सं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

। इह परलोए अणंतफलं ॥ ३ ॥ तेनास्मिन् काले एतान् कुल्माषानस्य महामुनेर्दत्वा पारणकं कारयामि, यतोऽयं मे दायको ग्रामः, एष महामुनिरेकवारं दर्शनं दत्वा निवर्तयति, अहं तु द्वित्रिवारं भ्रांत्वा भ्रांत्वा पुनः कुल्माषानानयिष्ये, ग्रामोऽप्यासन्नोऽस्ति, एवं चिंतयित्वा तस्मै मुनयेऽत्याग्रहेण ते कुल्माषा मूलदेवेन समर्पिताः, भगवता मुनिवरेण परिणामप्रकर्षेण द्रव्यादिशुद्धमन्नं ज्ञात्वा भो धर्मशील! स्तोकं देहीत्युक्त्वा पात्रं धृतं, मूलदेवेनापि भावेन दानं दत्तं, वर्धमानपरिणामेनेदं पठितं च, यथा—धन्नाणं खु नराणं । कुम्मासा हुंति साहुपारणए ॥ तस्मिन् समये मूलदेवभक्तिं वीक्ष्याकाशगामिस्थदेवतया भणितं, भो पुत्र मूलदेव! त्वया सुंदरं कृतं यन्मुनिभ्यो दानं दत्तं, तेनाहं तुष्टा पूर्वोक्तगाथार्धेन यत्तुभ्यं रोचते तद्याचस्व? मूलदेवेनोत्तरार्धेन भणितं, यथा—गणियं च देवदत्तं । दंतिसहस्सं च रज्जं च ॥ १ ॥ पुनर्देवतया भणितं हे पुत्र! निश्चिंतो विचर? अवश्यं ते मुनिचरणानुभावतोऽहं स्तोकेनैव कालेन तव मार्गितं सर्वं संपादयिष्ये, मूलदेवेन भणितमेवमेवास्तु, त्वयोक्तं सर्वमहं लप्स्ये, मुनिवरस्तां भिक्षां लात्वा पुनरेवोद्यानं गतः, मूलदेवोऽपि साधुं नत्वा निवर्तितः, पुनरेव गतस्तं ग्रामं, तत्र तेन लब्धापरा भिक्षा, भोजनं कृत्वा चा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रे चलितो बेन्नातटाभिमुखं, एवं क्रमेण प्राप्तो बेन्नातटनगरं, तत्र रात्रौ सुप्तः पथिकशालायां मूलदेवः, तेन यामिन्याः पश्चिमे प्रहरे स्वप्नो दृष्टः, प्रतिपूर्णमंडलो निर्मलप्रभाभासुरो मृगांको ममोदरे प्रविष्ट इति.

ईदृशः स्वप्नः केनचित्कार्पटिनापि दृष्टः, कथितस्तेन कार्पटिकानां, तत्रैकेन कार्पटिकेनोक्तं लप्स्यसे त्वं घृतखरंटितं गुडेन संयुक्तं महदेकं मंडकं. तत् श्रुत्वा हर्षितः कार्पटिको गतो भिक्षार्थं ग्रामे. केनापि गृहस्थेन गृहप्रवेशादिमहे क्रियमाणे तादृशो मंडकस्तस्मै दत्तः. स तं गृहीत्वा समागतो दर्शितश्च स कार्पटिकानां, उक्तं च भो भो कार्पटिकाः! मया यथोक्तो मंडको लब्धः, एवं स तेन तुष्टः. अथ मूलदेवोऽपि गतो वाटिकायां, आवर्जितो मालाकारः, दत्तानि तेन पुष्पफलादीनि, तानि पुष्पफलादीनि गृहीत्वा शुचिर्भूत्वा च स गतः स्वप्नपाठकगृहे, कृतस्तस्य प्रणामः, सोऽपि तुष्ट उवाच भो भद्र! त्वं मद्गृहे किमर्थमागतोऽसि? योजितकरकमलयुगलो विनयावनम्रदेहो मूलदेवः पुष्पफलभृतकरयुग्मं विधाय पूर्वोक्तस्वप्नफलं पप्रच्छ. तं स्वप्नं श्रुत्वा हर्षित उपाध्याय उवाच, भो महात्मन्! तवाहं शुभमुहूर्ते स्वप्नफलं कथयिष्ये, त्वं स्वस्थो भव? इत्युक्त्वा तेन विप्रेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलदेवो गृहाभ्यंतरे नीतो मज्जितः प्राघूर्णकरीत्या भोजितश्च. भोजनानंतरमुपाध्यायेनोक्तं भो पुत्रक ममैषा पुत्री गुणसुंदरीनाम्नी प्राप्तयौवनास्ति, त्वमेनां परिणय? मया तुभ्यं दत्ता, त्वमेव तस्याः पतिर्भव? मूलदेवेनोक्तं तात! कथमज्ञातकुलशीलं मां जामातृकं करोषि? उपाध्यायेनोक्तं तवाचारेण ज्ञायते त्वमुत्तमकुलो वर्तसे, यतः—आचारः कुलमाख्याति । देशमाख्याति भाषितं ॥ संभ्रमः स्नेहमाख्याति । वपुराख्याति भोजनं ॥ १ ॥ को कुवलयाण गंधं । करेइ महुरत्तणं च उच्छूणं ॥ वरहत्थीण य लीलं । विणयं च कुलप्पसूयाणं ॥ २ ॥ उक्तं च—जइ हुंति गुणा ता किं । कुलेण गुणिणो कुलेण न हु कज्जं ॥ कुलमतुलं गुणवज्जि—आण गुरुअंपि सकलंकं ॥ ॥ ३ ॥ इत्यादिवचनैस्तोषितो मूलदेवस्तद्वचनमंगीकरोतिस्म. ततः स्वप्नपाठकविप्रेण सुमुहूर्ते स पाणिग्रहणं कारितः, ततः स्वप्नफलं प्रोक्तं, भो मूलदेव शृणु? त्वं सप्तदिनाभ्यंतरेऽस्यैव नगरस्य राजा भविष्यसि. तत श्रुत्वा प्रहृष्टमना मूलदेवस्तत्र सुखेन तिष्ठति. एवं पंचमे दिवसे गते मूलदेवो नगरपरिसरे क्रीडितुं गतः, रंत्वा च परिश्रांतः सुप्तः स चंपकच्छायायां. तस्मिन् समये तस्मिन्नगरेऽपुत्रो राट् निधनं गतः, प्रकटितानि पंच दिव्यानि, हस्ती १ अश्व २ छत्रं ३ चामरौ ४ कलश ५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्चेति. प्रतिष्टितानि मंत्रेण तानि दिव्यानि वादित्रसहितानि सपरिकराणि सर्वत्र नगरे भ्रांत्वा भ्रांत्वा बहिर्निर्गत्य यत्र मूलदेवश्चंपकपादपनिश्चलछायायां सुप्तोऽस्ति तत्रागतानि. तं मूलदेवं दृष्ट्वा हस्तिना गुलगुलायितं, हेषितं तुरगेण, गजकरस्थभृंगारेणाभिषिक्तो मूर्ध्नि, वीजितं चामराभ्यां, स्वयमेव विकसितं तस्य मूर्ध्नि छत्रेण. एवं मूलदेवस्य राज्यं जातं, गगनस्थदेवतया प्रोक्तं भो भो लोकाः! एष मूलदेवो महानुभागः समस्तकलापारगो देवताध्यासितशरीरो विक्रमराजापरनामा भवतां नृपो ज्ञेयः, एतस्याज्ञया यो न वर्तयिष्यति तस्य शिक्षां दास्यामीत्युक्त्वा देवता स्वस्थानं गता. तदानीं तद्राज्याधिष्ठायिमंत्रिमहामंत्रिपुरोहितादिभिः परिवृतो हस्तिस्कंधाध्यासितशरीरो महामहेनागतो राजमंदिरं, सर्वैरभिषिक्तो राज्याभिषेकेण, अभिनवभानुमानिव तेजसाक्रांतविश्वोऽसौ धरित्रीं धारयामास. एवं स विक्रमराजा विक्रमाक्रांतविश्वो न्यायेन राज्यं पालयामास. तेन विक्रमराजेनोज्जयिनीस्वामिना विचारधवलेन सह मैत्री समारब्धा, तयोः परस्परमतीवप्रीतिर्जाता.

इतश्च देवदत्ता गणिका तादृशीं विटंबनां मूलदेवस्य दृष्ट्वातीवविरक्ता जाताचलोपरि, ततः स देवदत्तया निर्भर्त्स्य गृहान्निष्कासितः, प्रोक्तं च याहि मम गृहतः, अहं हि वेश्या, किमहं तव गृ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हिणी? येन त्वया मूलदेवस्यैवंविधा विडंबना कृता, इत्युक्त्वा सा गता राजसमीपं, राज्ञश्चरणे निपतिता, पूर्वदत्तो वरश्च मार्गितः, राज्ञोक्तं यत्तुभ्यं रोचते तद्वरं मार्गय? तया मार्गितो वरः स्वामिन्! मूलदेवं विना केनापि मम गृहे नागंतव्यं, एषोऽचलोऽपि मम गृहागमने निषेध्यः, राज्ञोक्तं यथा तुभ्यं रोचते तथाहं करिष्ये, परं कथय कोऽयं वृत्तांतः? तया देवदत्तया सकलोऽपि वृत्तांतः कथितः. तत श्रुत्वाचलोपरि रुष्टो राजा तं समाकार्यैवं कथयतिस्म, भो अचल! मम नगर्यामेको मूलदेवोऽपरा च देवदत्ता गणिका द्वे रत्ने वर्तेते, ते अपि त्वं विगोपयसि, तर्हि किमस्मिन्नगरे त्वं राजा वर्तसे? यत्त्वमेवंविधं व्यवहारं व्यवहरसि? कुरु शरणं? अन्यथा त्वशरणं त्वामहं हनिष्यामि. तदानीं देवदत्तया प्रोक्तं स्वामिन्नेतेन श्वानप्रायेण हतेन किं? अतो मुच्यतामेष इत्युक्त्वा मोचितः स देवदत्तया. राज्ञोक्तं भो अचल! त्वमस्या वचनेन मया मुक्तः, त्वमितो याहि? ग्रामनगराणि च विलोकय? मूलदेवशुद्धिं च समानय? अचलेन भणितं स्तोकदिनांते तस्य शुद्धिं समानयिष्ये, इत्युक्त्वा राज्ञश्चरणौ नत्वा तस्य शुद्ध्यर्थं नगरान्निर्गत्य स विलोकयितुं लग्नः, परं क्वापि स न लब्धः, तेनैव दुःखेन स प्रवहणं भांडेन भृत्वा प्रस्थितः पारसकुलं. इतश्च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलदेवेन सप्राभृतकः प्रेषितो विनयप्रतिपादको लेखो विचारधवलराजस्य, देवदत्तायाश्च द्वितीयो लेखः प्रेषितः प्रेमप्रतिपादकः. तत्र राज्ञो लेखे एवं लिखितमासीत, जो राजेंद्र! मम देवदत्तोपरि महान् प्रीतिबंधो वर्तते, तेन यद्यस्या जवतश्च रोचते तर्हि प्रसादं कृत्वैनां प्रेषयेति. तं लेखं प्राभृतं च वीक्ष्य हृष्टो राजावदत, अनेनैतावत् किमर्थितं? मम राज्यमप्येतदधीनमस्ति, तदा देवदत्तायाः का कथेति? ततो राज्ञा समाकारिता देवदत्ता, कथितो लेखवृत्तांतः, जो देवदत्ते यदि तुभ्यं रोचते तर्हि याहि विक्रमराजांतिके बेन्नातटनगरे, तयोक्तं महाप्रसादः, जवत्प्रसादेन मम मनोरथाः सिध्यंतु. ततो विचारधवलेन महत्या ऋध्ध्या प्रेषिता देवदत्ता बेन्नातटनगरे समागता, विक्रमराजेन महत्या ऋध्ध्या प्रवेशिता, तयोर्जाता परस्परं प्रीतिः, जजयो राज्ञोर्विक्रमविचारधवलयोरपि प्रीतिर्विशेषतो जाता. मूलदेवस्तया देवदत्तया समं विषयसुखान्यनुजवन् विचरति. सप्तक्षेत्रेषु धनं वपन् स राज्यं पालयामास.

इतश्च सोऽचलः पारसकूले व्यवहारं विधायानेकक्रयाणकानि समादाय प्रवरं जांमं प्रवहणे भृत्वा बेन्नातटनगरे समागात्. तेन सार्थवाहेन पृष्टा लोकाः, जो लोकाः कोऽत्र राजा? किंनामा च?

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोकैरुक्तं विक्रमनामात्र न्यायवान् राजास्ति, स च पितेव राज्यं पालयति. तत् श्रुत्वा हर्षितोऽचलः सुवर्णमुक्ताफलादिभिः स्थालं भृत्वा राज्ञः पुरो मुक्त्वा निपतितस्तत्पादेषु. राज्ञा पृष्टं भो श्रेष्ठिंस्त्वं कुतः समागतः? तेनोक्तं राजन् पारसकूलात्समागतोऽहं. ततो राज्ञा दापित आसने निषण्णोऽचलः क्षेमवार्तया तोषितश्च. तेनोक्तं राजन् कंचिन्मांडपिकं प्रेषय? यो भांडं विलोकयति. ततो राज्ञोक्तमहं स्वयमेवागत्य विलोकयिष्यामि. ततः पंचकुलसहितो गतो राजा यानपात्रे, विलोकितानि सर्वाण्यपि भांडानि शंखपूगीफलचंदनकदंतमांजिष्ठादीनि. ततो राज्ञा पृष्टं सर्वेषु पश्यत्सु भो श्रेष्ठिन्! एतावदेवास्ति क्रयाणकमथवान्यत्किमप्यस्ति? अचलेनोक्तं देव! एतावदेवास्ति. अन्यत्किमपि नास्ति. राज्ञा चार्धं शुल्कं मुक्तं, लोकेनोक्तं राज्ञा श्रेष्ठिनो महाप्रसादः कृतो यदर्धं शुल्कं मुक्तं. राज्ञोक्तं भो शुल्कपालकाः श्रेष्ठिनः सर्वं क्रयाणकं मम समक्षं तोल्यतां? तेऽपि तथा कुर्वंति, तदा पादप्रहारेण कानिचिद्भाजनानि स्फोटितानि, तेभ्यो निर्गतं बहुमूल्यं वस्तु. ततः सर्वाण्यपि तानि स्फोटितानि, तेभ्योऽपि निर्गतानि बहूनि बहुमूल्यभांडानि, यथा—कुत्रापि स्वर्णं, कुत्रापि रजतं, एवं मणिमुक्ताफलप्रवालकर्पूरकस्तूर्याद्यनेकबहुमूल्यभांडानि दृष्ट्वा रुष्टो राजा, आत्मपुरुषाणां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चादेशो दत्तो यथा भो भो सेवकाः! एनं श्रेष्टिनं प्रत्यक्षचौरं गृह्णीत? ततस्तैर्नयेन कंपमानहृदयः श्रेष्ठी गृहीतः, राजा समागतः स्वमंदिरे, सोऽपि श्रेष्ठी तैरानीतो राजभवने. ततो राज्ञा कथितं भो सेवकाः! एनं श्रेष्टिनं मुंचत? इत्युक्त्वा मोचितः. ततो राज्ञा पृष्टं भो श्रेष्टिंस्त्वं मा जानासि? अचलेनोक्तं देव! सम्यग्न जानामि, ततो राज्ञा समाकारिता देवदत्ता. समागता सर्वांगभूषणैर्विराजमाना द्युतिद्योतितदिङ्मुखा, तत्क्षणादेवोपलक्षिताचलेन, मनसि लज्जितोऽचलः, तयोक्तं भो अचल! एष विक्रमराजा मूलदेवो यस्त्वया तस्मिन्मज्जनावसरे मुक्तः, त्वया भणितश्च ममापि कदाचिद्विधियोगेन व्यसनं प्राप्तस्योपकारं कुर्वीथाः, तेन त्वमप्यस्मिन्नवसरे विक्रमराजेन मुक्तः, सोऽपि महाप्रसाद इत्युक्त्वा निपतितो द्वयोस्तयोश्चरणेषु, परमादरेण स्नपितो देवदत्तया भोजितो वस्त्रादि परिधापितश्च, राज्ञा मुक्तं शुल्कं, प्रेषितोऽचल उज्जयिन्यां मूलदेवाभ्यर्थनया विचारधवलेनापि मानितः स्वगृहे समागात्. विचारधवलो मूलदेवं राज्ये निविष्टं श्रुत्वा समागतो बेन्नातटे, एवं तयोर्द्वयो राज्ञोर्गाढं परस्परं प्रीतिर्जाता, स मूलदेवः श्रावकव्रतं समाराध्य पूर्णायुरंतेऽनशनेन मृत्वा देवलोकं जगाम. इद्धं श्रीमूलदेवेन । श्रद्धाशुद्धेन चेतसा ॥ कुल्माषदानतो लब्धं । प्राज्यं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राज्यं सुनिश्चलं ॥ १ ॥ इति प्रासुकान्नदानविषये मूलदेवकथानकं समाप्तं. ॥ अथ विक्रमादित्यदृष्टांतेन दानं दृढयन्नाह—

॥ मूलम् ॥—अइदाणमुहरकवियण—विअरिअ सयसंखकव्वविछरिअं ॥ विक्कमनरिंदचरिअं । अज्जवि लोए परिप्फुरइ ॥ १५ ॥ व्याख्या—अतिदानेनातित्यागेन ये मुखरा वाचालाः कविजनास्तैः विअरिअत्ति ' विचरितानि प्रसारितानि यानि शतसंख्यकाव्यानि, तैः 'विछरिअत्ति' विस्तृतं विस्तारं प्राप्तमेवंविधं विक्रमनरेन्द्रचरित्रं ' अज्जवित्ति ' अद्याप्यद्य यावल्लोके जगति परिस्फुरति जागर्तीति गाथार्थः. ॥ १५ ॥ विस्तरस्तु कथानकादवगंतव्यः, तत्कथा चेयं—

मालवदेशेऽवंती नाम नगर्यस्ति, कथंभूता? मालवावनितन्वंगी—भास्वद्भालविभूषणं ॥ अवंती विद्यते वर्या । पुरी स्वर्गपुरीनिभा ॥ १ ॥ यत्र धर्मं दयामूलं । कुर्वन् पौरजनोऽखिलः ॥ अर्थकामाविहाप्नोति । परत्र च शिवश्रियं ॥ २ ॥ धर्मसिद्धा ध्रुवं सिद्धि—र्हुम्मप्रद्युम्नयोरपि ॥ दुग्धोपलब्धौ सुलभा । संपत्तिर्दधिसर्पिषोः ॥ ३ ॥ तस्यां नगर्यां न्यायनिपुणः प्रजापालकः सकलजनतासुखदो जिताशेषशत्रुभूपो गंधर्वसेनो नाम भूपोऽभूद्विश्वविश्रुतः. अन्यदोज्जयिनीपार्श्ववर्तिग्रामे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लक्ष्मीपुराभिधे कांचिद्दर्यां विधवां ब्राह्मणीं राजा गंधर्वसेनो धनादिना लोभयित्वा भर्तृहरपुत्रसम- न्वितां स्वस्त्रीत्वेनांगीचकार, तया सह स सुखान्यनुभवन्नास्ते, तया पत्न्या सह रममाणस्य राज्ञः सूर्यस्वप्नसंसूचितः पुत्रो जातः, तस्य जन्मोत्सवं कृत्वा सुदिवसे सुमुहूर्ते सूर्यस्वप्नसूचितत्वाद्विक्रमादि- त्य इति विश्रुतं नाम ददौ, अथवा प्रकारांतरेण विक्रमादित्योत्पत्तिं कथयति, यथा तस्यामवंत्यां सर्वजनतासुखदो गर्दभिल्लो नाम राजा न्यायेन राज्यमपालयत् स्वर्गे स्वर्गिनाथ इव, स कीदृशोऽ- स्ति?—शत्रूणां तपनः सदैव सुहृदामानंदनश्चंद्रव—त्पात्रापात्रनिरीक्षणे सुरगुरुर्दानेषु कर्णोपमः ॥ नीतौ रामनिभो युधिष्ठिरसमः सत्ये श्रिया श्रीपतिः । स्वीयान्येष्वपि पक्षपातसुभगः स्वामी यथार्थो भवेत ॥ १ ॥ तस्य राज्ञो धीमतीश्रीमत्याह्वे द्वे पत्न्यावभूतां पंचबाणस्य रतिप्रीती इव. सा धीमत्य- न्यदा सुंदरस्वप्नसूचितं गर्भं दधार. पूर्णे मासि राज्ञी धीमती शुभेऽह्नि सुलग्ने स्फुरद्द्युतिं पूर्वार्कमि- व पुत्रं सुषुवे. नृपो जन्मोत्सवं कृत्वा सज्जनसमक्षं तस्य भर्तृहर इत्याख्यां ददौ. स वर्धमानः क- मान्मातापित्रोर्मुदं ददावब्धेरिंदुरिवानिशं. यतः—

उत्पतन् निपतन् रिंखन् । हसन् लालावलीर्वमन् ॥ कस्याश्चिदिह धन्यायाः । क्रोडमाक्रमते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुतः ॥ १ ॥ शर्वरीदीपकश्चंद्रः । प्रभाते रविदीपकः ॥ त्रैलोक्ये दीपको धर्मः । सुपुत्रः कुलदीपकः ॥ २ ॥ अथ द्वितीया पत्नी श्रीमतीनाम्नी सूर्यस्वप्नेन सूचितं गर्भं दधार. क्रमेण दानशीलतपोभावभेदैर्धर्मदोहदं दधाना गर्दभिल्लेन राज्ञा सन्मानिता संपूरितदोहदा नवमासार्धसप्तदिनांते रजनीप्रांतसमये सुलग्ने सुमुहूर्ते मेदिनी निधानमिव राज्ञी पुत्रं सुषुवे. तस्यापि पुत्रस्य गर्दभिल्लेन राज्ञा मुदा जन्मोत्सवो विदधे. अर्कसमयसूचितत्वादर्कोदयवेलायां जातत्वाच्च राज्ञा गर्दभिल्लेन तस्य पुत्रस्य विक्रमार्क इति नाम विदधे. सूर्योदयवेलायां जातो महान् भवति, यतः—सूर्योदयस्य वेलायां । जायते यस्य जन्म तु ॥ तस्य दीर्घं भवेदायुः । पश्चाया भदयः पुनः ॥ १ ॥ सोऽपि राज्ञा पंचधात्रीभिः स्तन्यपानादिना संवर्धितो मातापित्रोर्हर्षप्रदो बभूव. तौ द्वावपि पुत्रौ सद्रूपलावण्यगुणशालिनौ गर्दभिल्लक्षोणीपतेरत्यंतमोदकरावभूतां. तयोर्मध्ये प्रथमपुत्रो भर्तृहरः संजातोऽष्टवार्षिकः शिक्षितद्वासप्तिकलो यौवनाभिमुखो बभूव. राज्ञा गर्दभिल्लेन स भीमसेननृपांगजामनंगसेनां पुत्रीं महामहेन विवाहितः. ततो गर्दभिल्लो राजा सकलबलसमन्वितो निःशेषान् विद्वेषिमेदिनीपतीन् साधयामास. एवं साधितदेशो देशाधिपो गर्दभिल्लः सन्मार्गेण राज्यं पालयन् श्रीरामं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्मारयामास. एवं राज्यं पालयन् गर्दभिल्लोऽन्येद्युः शूलरोगेण मृत्वा मरुधाम जगाम. तस्य राज्ञो मृत्युकार्ये कृते मंत्रीश्वरादयः सदुत्सवपूर्वं भर्तृहरे राज्याभिषेचनं व्यधुः. तद्दिनादारभ्य भर्तृहरो राजा जातः, गजवाजिरथादिकं सर्वं तदधीनं जातं. विमातृजातत्वाऽऽज्ञा भर्तृहरेण विक्रमादित्योऽपमानितः, तदपमानं संस्मृत्य विक्रमादित्य एकाकी खड्गसखायो देशांतरे ययौ.

तस्मिन् समये तस्यामवंत्यां दरिद्रो नारायणाभिधो विप्रः पूजोपहारैर्होमधूपादिभिर्भुवनेश्वरीं देवीमाराधयामास. सा संतुष्टा बहुजीवितदायकं सदाकारं सुस्वादु बीजपूरफलं तस्मै ददौ. तत्फलं लात्वा द्विजोऽवादीत्, हे देवि! अनेन फलेन भक्षितेन बहुजीवितं भवति, निर्धनत्वेन च मम तेन जीवितेनापि किं? यतः—जीवंतो मृतकाः पंच। श्रूयंते किल भारत ॥ दरिद्रो व्याधितो मूर्खः। प्रवासी नित्यसेवकः ॥ १ ॥ तत् श्रुत्वा देवी प्रोवाच भो विप्र चिंतां मा विधेहि? त्वमितो याहि? तव किंचिद्धनमपि भविष्यति, तत् श्रुत्वा विप्रः स्वगृहे गतः, कृतस्नानदेवपूजाक्रमो यावता फलं भोक्तुमुपविष्टस्तावता पुनस्तेन चिंतितमहो ममानेन भक्षितेन किं? तथा बहुजीवितेनापि किं? यदि भर्तृहरनृपस्य दीयते तदा स राजा जगतः सुखंकरः स्यात्, यतः—दुर्बलानामनाथानां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

। बालवृद्धतपस्विनां ॥ अन्यायैः परिभूतानां । सर्वेषां पार्थिवो गतिः ॥ १ ॥ इति ध्यात्वा स वाडवस्तन्महिमानमुक्त्वा तत्फलं भर्तृहराय प्रददौ, भर्तृहरोऽपि तस्मै बहुधनं दत्वा विसर्जयामास, नृपतिस्तत्फलं भोक्तुमिछन् दध्यावहो पट्टराज्ञीं विना भुक्तेन किं? विचिंत्येति फलं नृपतिः स्नेहेन राज्ञ्यै ददौ, तयापि तस्य महिमानं श्रुत्वा स्वमित्राय हस्तिपकाय ददे, हस्तिपकोऽपि प्रीत्या राज्ञश्चामरधारिण्यै ददौ, चामरधारिण्यपि प्रीत्या तत्फलं पुना राज्ञे ददौ, उर्वीशस्तदेव फलं ज्ञात्वापृछद्धो सुंदरि! एतत्फलं त्वया कुतो लब्धं? तव केन दत्तं? तया सत्यमुक्तं. ततः परंपरया ज्ञातसकलवृत्तांतः पट्टराज्ञ्या दुश्चेष्टितं ज्ञात्वा संप्राप्तवैराग्यो नृप एवमचिंतयद्धिगहो स्त्रीविलसितं! मदनविलसितं च! यतः—यां चिंतयामि सततं मयि सा विरक्ता । साप्यन्यमिछति जनं स जनोऽन्यसक्तः ॥ अस्मत्कृते च परितुष्यति काचिदन्या । धिक्तां च तं च मदनं च इमां च मां च ॥ १ ॥ संमोहयंति दमयंति विडंबयंति । निर्भर्त्सयंति रमयंति विषादयंति ॥ एताः प्रविश्य सदयं हृदयं नराणां । किं नाम वामनयना न समाचरंति ॥ २ ॥ इत्यादि स्त्रीस्वरूपं ध्यात्वा भर्तृहरभूमिपालः संसाराद्विरक्तमानसस्तृणवद्राज्यं विमुच्य वने गत्वा योगपरायणस्तापसो बभूव, तस्मिन् समये सर्वेऽपि मंत्री-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्वरा भर्तृहरोपांते गत्वैवं जगुः, स्वामिंस्त्वया विनेदानीं सर्वं राज्यं विनंक्ष्यति, तत् श्रुत्वा भर्तृहरो जगौ, भो मंत्रीश्वराः कस्येदं राज्यं? कस्य बांधवाः? भवांतरे मया सहस्रशो राज्यलक्ष्मीः प्राप्ता, परं मया स्वर्गापवर्गदा वैराग्यश्रीर्न कुत्रापि लब्धा, अतो मे राज्येन कार्यं नास्ति, सृतं राज्येन, अनया वार्तयापि च सृतं, एवं भर्तृहरो जल्पन् मणितृणसमाशयस्तीव्रं तपः कर्तुं महाविपीने जगाम, तदा शून्यं राज्यं ज्ञात्वाग्निवेतालिकासुरः क्रूरात्मा तत्क्षणादेव तद्राज्यमशिश्रियत्. ततस्तद्राज्याधिष्टायका मंत्रिमुख्या राजानं वनगतं ज्ञात्वा विक्रमादित्यं च रुष्टं परदेशिनं च मत्वा श्रीपतिं क्षत्रियं कुलीनं ज्ञात्वा भर्तृहरराज्ये स्थापयामासुः, सोऽग्निवेतालिकासुरो रात्रौ तं श्रीपतिं राजानं जघान, प्रातस्तं मृतं दृष्ट्वा मंत्रिणो दुःखिनोऽभवन्. एवं यं यं नृपं मंत्रिणस्तत्र स्थापयंति, तं तं रात्रौ सदाग्निवेतालिकोऽसुरो हंति, एवं दिनानि यांति. मंत्रिणस्तस्य शांतये भूरिबलिं कुर्वंति तथापि स दुष्टोऽसुरः शांतिं नाप्नोति.

इतश्च विक्रमादित्यस्यान्यदा भट्टमात्राह्वो वणिगेको मिलितः, स तस्य सेवातत्परो बभूव. अथ तौ धनार्थिनौ रोहणाद्रिसमीपस्थग्रामे गतौ, प्रातःसमये तत्र गिरौ गत्वा भट्टमात्रो विक्रमार्कप्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ति प्राह भो नरेंद्र! इह यो नरः स्वकीयललाटपट्टे हस्तं दत्वा हा दैवेत्युक्त्वा प्रहारं ददाति तस्मै रोहणाचलो मणिं ददाति, नान्यथेति. भट्टमात्रस्थैतद्वचो निशम्य नृपतिश्चिंतयति, एवं तु कातरो वक्ति, परं नोत्तमः, तेन मयैतद्वचो विनैव प्रहारो देयः. ततो विक्रमनृपः खनीमध्ये खनित्रेण पुनः पुनर्घातं ददाति, परं मणिर्नो प्रादुर्भवति. तदा भट्टमात्रेण चिंतितं हा दैवेति वचो विना सर्वथा मणिर्न प्रादुर्भविष्यति, तेन केनचिच्छलेन नृपो यथैतद्वक्ति तथा कुर्वे. इति विचिंत्य भट्टमात्रेण नृपस्याग्रे नृपमातुरकुशलं कथितं, तावद्दृढदुःखितेन नृपेण बाढस्वरेण हा देवेति वचनमुक्त्वा प्रहारः प्रदत्तः, तदा सपादलक्षमूल्यं रत्नं प्रकटितं. तद्रत्नं निरीक्ष्य हृष्टो भट्टमात्रः, परं मातुर्दुःखदुःखितो नृपो न किमपि वक्ति. तदा भट्टमात्रेणोक्तं भो नरेंद्र! तव मातुः कुशलमस्ति, परं मयैतच्छलं कृतं. एतत् श्रुत्वा हृष्टमानसो नृपो रोहणंप्रति प्राह, यथा—धिग् रोहणगिरिं दीन—दारिद्र्यव्रणरोहणं ॥ दत्ते हा दैवमित्युक्ते । रत्नान्यर्थिजनाय यः ॥ १ ॥ इत्युक्त्वा रत्नमुत्सृज्य विक्रमार्कमहीपतिः क्षत्रियवेषं त्यक्त्वावधूतवेषं विधाय तापीनदीतीरमुपाययौ. रात्रौ तत्र शिवारवं श्रुत्वा भट्टमात्रोऽवग्भो राजन्नत्र तटिनीतटे भूषणैर्भूषिता परं मृता नारी वर्तते इति शिवा वक्ति. तत् श्रुत्वा वि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्मितो विक्रमार्कः समित्रस्तत्र गतः. तथास्थितां तां नारीं वीक्ष्य राजा प्राह भो मित्र! तव वचः सत्यं जातं, परमस्याः स्त्रिया भूषणानि मनागपि नाहं गृह्णामि, भो मित्र! यदि तव रोचते तर्हि त्वमेवास्या भूषणानि गृहाण? विनयावनम्रदेहो भट्टमात्रः प्रोचे, भो मित्र यदि त्वमस्या भूषणानि नादत्से, तर्ह्यहं सांप्रतं चांडालिकं कर्म न करोमि. पुनः शिवारवं श्रुत्वा भट्टमात्रो राजानं जगाद, एषा शिवैवं वक्ति यत्तवावंतीराज्यं मासेन भविष्यति. तत् श्रुत्वावंत्या राज्यं शून्यं ज्ञात्वा स भट्टमात्रं मित्रमेवं वक्ति, भो मित्र! अहं सांप्रतं राज्यकृते तत्र पुरे यास्यामि, यतः—ददाति प्रतिगृह्णाति । गुह्यमाख्याति पृच्छति ॥ भुंक्ते भोजयते चैव । षड्विधं प्रीतिलक्षणं ॥ १ ॥ एवं मित्रमालाप्य मार्गे मित्रगुणान् संस्मरन् स्वीयं नगरं विक्रमार्कः समुपागमत.

अवधूतवेषो विक्रमार्क एकस्मिन् पीठे समुपविश्य कस्यचिन्मंत्रिणोंतिके राज्यशून्यस्वरूपं पप्रछ. मंत्रीश्वरो जगौ भर्तृहरभूमीपतेः पदे यो यो मंत्रिभिर्नृपः स्थाप्यते तं तमग्निवैतालिकोऽसुरो हंति. तदानीमवधूतवेषो विक्रमार्को जगौ भो मंत्रिन्! सर्वेऽमात्या यदि मह्यं राज्यं ददते तदाहं दुष्टान्निहत्य सज्जनान् पालयामि, एष च राजधर्मः, यतः—दुष्टस्य दंडः स्वजनस्य पूजा । न्यायेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कोशस्य सदैव वृद्धिः ॥ अपक्षपातो रिपुराष्ट्ररक्षा । पंचैव धर्माः कथिता नृपाणां ॥ १ ॥ तस्य सत्वं निरीक्ष्य मंत्रिभिर्मंत्रयित्वा तस्यावधूतवेषभृतो विक्रमादित्यस्य राज्यं दत्वा सर्वेऽपि हृष्टा मंत्रिणो निर्भीकाः स्वस्थानं गताः, एवं च विक्रमादित्यस्य राज्यं जातं. ततः स राजा मनस्येवमचिंतयत्, अस्य देवस्य संतुष्ट्यर्थं बलिं कारयामि, यतो दुष्टदेवता बलिपूजातः शांतिमाप्नोति. इति विचिंत्य राजामात्यानाहूय बलिकृते मूटकत्रयपक्वान्नवटकक्षैरेयीबाकुलादीनि कारयति, तथा पुष्पागुरुधूपप्रभृतीनि शांत्यर्थं कारयित्वा पुरप्रतोल्या उपरितनभूम्यां स्थाने स्थाने राजमंदिरादिषु शय्यादिषु चतुर्दिक्षु पुष्पबलिधूपादिविधिं विधिना कारयित्वा, तथा स्थाने स्थाने महीपालः स्वसेवकैः राजमार्गं वेगतस्तलिकातोरणैर्भूषयित्वा स्वयं खड्गसखाय एकाकी पल्यंकस्योपरि स्थितः, सावधान उन्निद्रो निर्भयः सत्ववांश्च स भगवद्गुणान् संस्मरन्नस्थात, साहसिकानां सर्वं भव्यं भवति, यतः—सीह न जोए चंदबल । नवि जोए धणरिद्धि ॥ एकलमो बहुआं भडे । जिहां साहस तिहां सिद्धी ॥ १ ॥ एवं यावत्स तस्थौ तावत्स सुराधमो निःकारणशत्रुः पुरगोपुरमार्गेण राजगृहंप्रति निशाद्वितीयप्रहरसमये समागात्, खड्गव्यग्रकरश्च राजशय्यासमीपे समागत्य भीषणं रूपं कृत्वा भापयन् स नवीनं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नृपं हंतुं दधावे. नृपोऽवग्भो अग्निवेतालामर! सांप्रतमहं शयने स्थितोऽस्मि, पूर्वं बलिं लाहि? ततश्च मम विग्रहं गृहाण? तत् श्रुत्वाग्निवेतालिकोऽसुरो मनोऽभीष्टं बलिं प्राप्ता महीपतेर्निर्भयं वचश्च निशम्येति दध्यौ, अहो धन्योऽयं महासत्ववानिति. ततस्तस्य वचः श्रुत्वा धैर्यं च वीक्ष्यावधिज्ञानेन तं प्रवर्धमानभाग्यं च ज्ञात्वा पुरो भूत्वा प्रोवाच, भो महाभाग! संतुष्टोऽहं तवोपरि, सुखेन राज्यं कुरु? न्यायमार्गेण प्रजां च पालय? एवंविधो बलिश्च त्वया सदा मह्यं देयः. राज्ञा तथेमित्युक्ते स देवः स्वस्थानं गतः.

अथ प्रभाते मंत्रिणो नृपं जीवंतं वीक्ष्य हर्षिताः प्रोचुरहोऽस्य सत्वाधिकत्वं! ततो मंत्रिणो नगरमध्ये तलिकातोरणादिभिः सदुत्सवं कारयामासुः. एवं द्वित्रिदिनानि बलिपूजादिकं कृत्वा वैतालिकासुरंप्रति भूपो जगौ, भो वैतालिकासुर! ते ज्ञानं कियदस्ति? कियती शक्तिश्चास्ति? वैतालिको नृपं प्रत्याह भो नृपते यदहं ध्यायामि तत्करोमि, सर्वं जानामि सर्वत्र च गच्छामि. राजा प्राह ममायुः कियन्मात्रं वर्तते? तच्च न्यूनाधिकं भवेद्वा न? तद् ज्ञानेन ज्ञात्वा समाख्याहि? देवोऽवगेकवर्षशतं तवायुरस्ति, तच्च केनापि न्यूनाधिकं कर्तुं न शक्यते, ततः पूर्णायुर्भूत्वा त्वं स्वर्गं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यास्यसि, इति च मयाख्यातं त्वं सत्यं जानीहि? विसर्जितोऽग्निवेतालः स्वस्थानं गतः. तद्दिनादारभ्य निर्भयो भूमीशः सुखं सुष्वाप. प्रगे जागरितो नृपः प्राभातिकीं क्रियां कृत्वा महामहेन सकलं दिनं नीत्वा पुना रात्रौ शयनालये सुखं सुष्वाप. समागतोऽग्निवेतालः, सुप्तं राजानं वीक्ष्य क्रुद्धोऽसौ नृपंप्रत्याह, रेरे दुष्टाशयमहीपाल! ममाकृत्वा बलिं पूजां च त्वं शयनीये कथं सुखं सुप्तोऽसि? यमजिह्वासदृशेनानेन खड्गेन तव शिरश्छिनद्मि, सज्जो भव? अकस्मात्तद्वचो निशम्य जागरितो नृपो यमजिह्वासदृक्षं खड्गं कोशादाकृष्य कोपारुणो बाढस्वरेणैवं जगाद, रेरे दुष्टाशयाग्निवेताल! ममायुः केनापि न लोप्यते, अथाहं प्रत्यहं कुतस्तुभ्यं बलिं करोमि? यदि तव योध्धुं शक्तिरस्ति तर्हि संग्रामाय सज्जो भव? यथाहं तवाहंकृतिं स्फेटयामि, शक्त्यभावे च किंकरवत्त्वं मम सेवां कुरु? तस्य राज्ञ एतद्वचनचातुरीचमत्कृतस्तस्य सत्वेन प्रवृद्धभाग्योदयेन च संतुष्टोऽग्निवेतालिकः सुरः प्राह भो नृप! तव भाग्योदयेन संतुष्टोऽहं, यद्रोचते तद्याचस्व? अमोघं देवदर्शनं, यतः—अमोघा वासरे विद्यु—दमोघं निशि गर्जनं ॥ नारीबालवचोऽमोघ—ममोघं देवदर्शनं ॥ ॥ १ ॥ राजावक् हे निर्जर यदि मयि तुष्टोऽसि तदा यद्यहं त्वां स्मरामि तदा त्वया त्वरितमेवागत-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यं, मदुक्तं सर्वं कार्यं च कर्तव्यं, ममोपरि पितृवत्सदा स्नेहः कर्तव्यः, जवता मम चिंता च भृशं कार्या, अस्मिन्नर्थे कथमपि न प्रमाद्यं. वेतालो बजाषे जो महात्मन् जो विक्रमार्क! मम साहाय्यतो निःशंकं राज्यं कुर्वस्त्वं सुखेन तिष्ट? इति श्रुत्वा संतुष्टो जूपोऽप्यग्निकासुरं नत्वा स्तुत्वा पुष्पादिजिः संपूज्य च विससर्ज. सोऽपि स्वस्थानमगमत्.

अथ प्रजाते राजा मंत्रिमुख्यानाहूय नैशं वृत्तांतं वैतालिकासुरसत्कं समाचख्यौ. तत् श्रुत्वा ते भृशं हृष्टा जाताः, अथ तस्मिन्नेव दिनेऽवधूतवेषं मुक्त्वा नृपः पूर्ववेषं ललौ, इतश्च समागतो जट्टमात्रः, ततस्तौ द्वावपि सुहृदौ कुशलाजुदतप्रश्नपूर्वकं परस्परं मिलितौ. ततो जट्टमात्रः प्राह जो जो मंत्रिण एष गर्दजिल्लपुत्रो विक्रमार्कनामा. ततस्तं समुपलक्ष्य सर्वेऽपि हृष्टाः. तदा श्रीमती जननी सुतं समायातं श्रुत्वा यावद्रोमांचकंचुकितविग्रहा बजूव, तावद्भूपालो मातृवत्सलो मातृमिलनाय मातुः समीपे गत्वा जक्त्या च मातुः पादं ननाम, श्रीमती निजपुत्रस्य चरित्रं निशम्यातीवहृष्टाभूत्, यतः—ते पुत्रा ये पितुर्जक्ता । स पिता यस्तु पोषकः ॥ तन्मित्रं यत्र विश्वासः । सा जार्या यत्र निर्वृतिः ॥ १ ॥ मंत्रिजिर्विक्रमादित्यस्य सुदिवसे महामहोत्सवपूर्वकं पट्टाजिषेको विदधे, न्या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यमार्गेण पृथ्वीं पालयन् राजा जनेभ्योऽभीप्सितं दानं दत्ते, एवं कालो याति. एकस्मिन् दिने सेनया परिवृतोऽसौ देशसाधनाय निर्ययौ, अंगबंगतलिंगकाश्मीरसिंहलकलिंगकोकणसौराष्ट्रशबरबर्बरादीन् देशान् साधयित्वा लब्धजयो जयजयारवैः स्तूयमानो विक्रमार्कोऽभिनवार्क इव दिदीपे, एवं दीप्यमानोऽसाववंतीं प्राप्य मातुः पादौ प्रणनाम, मात्राभिनंदितो राज्यमपालयत.

अन्येद्युर्विक्रमादित्यजननी श्रीमती. रोगव्याप्तशरीरा सद्धर्मपरायणा वैद्यैश्चिकित्स्यमानापि जीवितक्षये स्वर्गं ययौ, अहो मरणं कोऽप्युल्लंघयितुं न क्षमते! यतः—बद्धा येन दिनाधिपप्रभृतयो मंचस्य पादे ग्रहाः । सर्वे येन कृताः कृतांजलिपुटाः शक्रादिदिक्पालकाः ॥ लंका यस्य पुरी समुद्रपरिखा सोऽप्यायुषः संक्षये । कष्टं विष्टपकंटको दशमुखो दैवाद्गतः पंचतां ॥ १ ॥ नृपमातुर्मृत्युकार्याणि कृत्वा शुचममुंचंतं तं वीक्ष्य मंत्रिण इति बोधयंतिस्म, यथा—धर्मशोकभयाहार—निद्राकामकलिक्रुधः ॥ यावन्माला विधीयंते । तावन्मात्रा भवंत्यमी ॥ १ ॥ तित्थयरा गणहारी । सुरवइणो चक्किकेसवा रामा ॥ अवहरिया हयविहिणा । सेसेसु जियेसु का गुणणा ॥ २ ॥ इत्यादि शोकहृद्वाक्यं मंत्रिणां श्रुत्वा नृपः शोकं त्यक्त्वा भृशं सुखी राज्यं कुर्वन्नासीत्. इतो लक्ष्मीपुरे सिंहस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेदिनीपतेः पद्मावत्यां पट्टराज्ञ्यां बहुपुत्रोपरि पुत्री जाता, तस्याः पिता कमलेत्यभिधां व्यधात, सा राजपुत्री क्रमेण वर्धमाना सकलकलासमन्विता यौवनोन्मुखी सिंहेन राज्ञा विक्रमार्काय दत्ता, विक्रमार्केण च परिणीता, राज्ञः पट्टदेवी च जाता, लक्ष्मीर्हरेरिव, एवमन्या अपि बहुकन्याः सदुत्सवेन परिणीय विक्रमादित्यभूपालोऽन्वहं राज्यं कुरुते. सर्वासां राज्ञीनां मध्ये विनीतत्वाद् भूमिनाथस्य कमला कमलेव वल्लभाभवत्, तस्य राज्ञो न्यायनिपुणो गंभीरो लोभरहितो राजभक्तो गुणसमुद्रस्तीक्ष्णधीर्भट्टमात्रो महामात्योऽभवत्, तथा तस्य भूपतेरग्निवेतालाभिधोऽसुरः साहसेन वशीभूतो सर्वकार्येषु सान्निध्यं चकार, अहो पुण्यानामुदये सर्वं भव्यं भवति, यतः—पत्नी प्रेमवती सुतः सुविनयो भ्राता गुणालंकृतः । स्निग्धो बंधुजनः सखातिचतुरो नित्यं प्रसन्नः प्रभुः ।। निर्लोभोऽनुचरः सुबंधुसुयतिप्रायोपभोग्यं धनं । पुण्यानामुदयेन संततमिदं कस्यापि संपद्यते ।। १ ।। अन्यदा श्रीविक्रमार्को भ्रातृविरहाद् भृशं दुःखितो भर्तृहरं विनयेन संतोष्य पुरे समानीतवान्, तस्य चरणौ प्रणम्य कृशत्वं च वीक्ष्य विक्रमार्को भूपतिस्तपोदुष्करत्वं दध्यौ, ततस्तस्य मुनेः पादौ प्रणम्य स इति जगाद, हे भगवन्! मयि प्रसन्नो भूत्वा त्वं राज्यमंगीकुरु? तत् श्रुत्वा भर्तृहरो ज-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गाद, भो नरोत्तम! महान् राज्यादिकं त्यक्त्वा पुनर्नांगीकरोत्यगंधनसर्पवत्, पुनर्नृपो जगाद तर्हि त्वयात्रैव स्थेयं, ग्रामादिषु कुत्रापि न गंतव्यं, ममोपरि कृपां चाधाय मदुक्तं कार्यं, ऋषिः प्राह साधोरेकत्र पुरे चिरं स्थातुं न युक्तं, पुनर्विक्रमार्को जगाद तर्हि मामकीने गेहे त्वया सदाभ्येत्याहारो लातव्यः, पुनर्मुनिः प्राह साधूनामेकसद्मन्याहारो न युज्यते दोषसंभवात्, राजा प्राह तथाप्येकवारं मम निकेतने दोषवर्जितमाहारं लातुमागंतव्यं, मुनिना मानिते नृपः प्रियांप्रत्याह, हे प्रिये! नित्यशस्त्वयास्य मुनेराहारः प्रदातव्यः, तत् श्रुत्वा संतुष्टा राज्ञी, स्वस्थानं गतो मुनिः, राजा च राज्यकार्यरतो बभूव.

अथ भर्तृहरो मुनिराहारार्थं प्रतिदिनं राजवेश्मनि समायाति. ततो नृपगेहे गच्छन्नन्यदा भर्तृहरो मुनिः स्नानपरां भूपगेहिनीं संवीक्ष्य द्रुतं ववले. तथावस्था नृपपत्नी कृतत्वरा समुत्थाय तस्यर्षेः पृष्टौ गत्वा स्फुटाक्षरमिति प्रोवाच—भो मुने! भवताशेषं बाह्येंद्रियजालं विजितं, परमंतरंगं तु न जितं, यतो भवान् ममांगं वीक्ष्य त्वरितं प्रत्यावृत्तः, यतः—शत्रौ मित्रे तृणे स्त्रैणे। स्वर्णेऽश्मनि मणौ मृदि ॥ मोक्षे भवे भविष्यामि। निर्विशेषमतिः कदा ॥ १ ॥ तद्दिनादारभ्य ध्यानमौनपरो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्तृहरो मुनिः पृथ्वीपीठं बोधितुमन्यत्र जगाम. इति विक्रमादित्योत्पत्तिचरित्रं. ॥ एकस्मिन् दिने मंत्रिसामंतमहेभ्यालीनतत्क्रमो विक्रमादित्यो राजा देवेंद्रसभातुल्यायां स्वसभायां यावता समुपविष्टस्तावदेको नापितो राज्ञः पुरः समागत्य सूर्यबिंबवद्भासुरं देहप्रमाणमादर्शं पुरो दधौ. विक्रमार्को महीपालस्तस्मिन्नादर्शे स्वीयां निखिलां देहछायां विलोकयन् यावच्चित्ते चमत्कृतोऽभूत्, तावन्नापितश्चमत्कृतं नृपं ज्ञात्वा तस्यां सभायां सर्वेषां मंत्रिमुख्यानां पुरो जगौ, हे राजंस्त्वयात्मीयं स्वरूपं विलोक्य यच्चिंतितं तदेते विज्ञा मंत्रिणः सांप्रतं कथयंतु, नो चेदहं जनोऽप्यत्र तवाग्रे सर्वं कथयामि. तदानीं भूमीभुजा पृष्टाः सर्वेऽमात्या दध्युः, सांप्रतं प्रायोऽसौ नरो वाक्सारो दृश्यते, एवं ते सर्वेऽमात्याः परस्परं ध्यात्वा राजानं जगुः. हे राजन्! म्लानिहेतवेऽयं महामानी पृच्छ्यतां, यतः—

मानिनो हतदर्पस्य । लाभोऽपि न सुखावहः ॥ जीवितं मानमूलं हि । माने म्लाने कुतः सुखं ॥ ॥ १ ॥

नृपेनोक्तं भो दिवाकीर्ते त्वमेव ब्रूहि? देहप्रमाणमादर्शं दृष्ट्वा किमहं चित्ते चमत्कृतः? नापितेनोक्तं राजंस्त्वया स्वरूपं दृष्ट्वा चिंतितं यन्महीमध्ये मत्तुल्यः कोऽपि मानवो नास्ति, इत्यभिमानस्तव चित्ते समागतः, परं भो नृप! त्वं शृणु? महांतो मनुजाः कदाप्येवं गर्वं न कुर्वंति, यतो-

For Private And Personal Use Only

ऽस्मिन् संसारे सर्वशरीरिषु तारतम्यं विद्यते, राजा प्राह भो दिवाकीर्ते त्वयाद्भुतं किं दृष्टं? यदद्भुतं दृष्टं भवति तत्सर्वं निर्भयः सन् मत्पुरः सद्यो भवान् जल्पतु. नापितोऽवग्भो भूशक्र! सावधानो भूत्वा श्रूयतां? स्वर्गिपुरोपमे प्रतिष्ठानपुरे शालिवाहनभूपालो न्यायतो भुवं शशास, तस्य राज्ञो विजयाभार्याकुक्ष्युद्भवा सुकोमलानाम पुत्र्यासीत, प्रसरद्रूपलावण्या सत्कलाकलापशालिनी सान्यदा जातिस्मरणज्ञानतो निजान् सप्त पूर्वभवान् वीक्ष्य पुरुषं च सापराधं ज्ञात्वा पुरुषद्वेषिणी जाता, तद्दिनादारभ्य दृष्टिपथागतं नरं सा लकुटैर्हंति, नरनामश्रुतेः स्नानं करोति, यस्याः पुरोऽन्या कापि रूपशोभां न धत्ते, यथा—सुकोमलातनूप्रोद्य—दीप्तिपुंजपुरो मनाग् ॥ भूपाल त्वद्गृहीतानां । देहदीप्तिरणूयते ॥ १ ॥ सा च पुरुषद्वेषात् सर्वर्तुपुष्पफलाढ्ये नगरबाह्यवने तिष्टति, तस्मिन् वने क्षीरवन्नीरपरिपूर्णं स्वर्णबद्धतलं स्वर्णपालिमनोहरं स्वर्णसोपानसुंदरं सरोवरमस्ति, मार्जारीरूपभृत्सुरी तयोर्वनसरोवरयो रक्षां करोति तृणकाष्टकचवराद्यपनयनादिना, तस्य तद्वचनं निशम्य विक्रमार्कोऽवग् हे महाभाग! त्वया सत्यमुक्तं, रूपतारतम्यं यच्च त्वयोदितं तत्सत्यमेव. अथ संतुष्टो राजा विक्रमार्कस्तस्मै यावद्धनं दापयामास तावत्स नापितो दिव्यमुकुटकुंडलहारकेयूरदिव्यवस्त्रयुग्म-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धारको देवोऽभवत्, तद्रूपं दृष्ट्वा भूपाद्याः सर्वेऽपि मंत्रिणः सभ्यलोकाश्च बाढं चित्ते चमत्कृता बभूवुः, राज्ञा पृष्टं भो सुरेश्वर! त्वं कुतः स्थानात्किमर्थं चागतोऽसि? स प्राहाहं सौधर्मदेवलोकवासी सुराचले देवनत्यै गतोऽभवं, तत्र जिनान्नत्वा भूमंडलेऽहं भ्रमन् प्रतिष्ठानपुरे गतः, तत्रापि देवान्नत्वा यावता नगरश्रियं पश्यामि तावन्मया नृपपुत्री सुकोमला दृष्टा, मया चिंतितमहो राजपुत्र्याः सुंदरं रूपं दृश्यते, ततश्चलितस्तावत् किन्नराणां मुखाद्गीयमानं तावकं साहसं रूपं च श्रुत्वाहं हे नृपते! त्वां वीक्षितुमागतः, त्वत्परीक्षाकृते चाबागां सुंदराभिधो देवः, त्वत्साहसेन तुष्टोऽस्मि, वांछितं वरं मार्गय? विक्रमोऽवग्भो सुरेशाधुना केनापि वस्तुना मम कार्यं नास्ति, यतो मम सदने लक्ष्म्यन्वितं सर्वं समीहितमस्ति, ततो देवो महीशाय दिव्यरूपकृद्गुटिकां बलाद्दत्वा हृष्टचित्तो विद्युदिव तिरोदधे, यतः—संतुष्टानाममर्त्यानां। दर्शनं जातमंगिनां॥ मोघ च जायते नैव। निशागर्जितवत्कदा॥ १॥

अथैकस्मिन् दिने भट्टमात्रो दीनमुखं तं नृपं दृष्ट्वेति पृष्टवान्, हे स्वामिंस्ते मनः किमर्थं बाधते? तत्सर्वं ममाग्रे सत्यं समाख्याहि? यथा तस्योपचारः क्रियते, भवतश्च तुष्टिर्भवति, राज्ञोक्तं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भो मंत्रीश्वर! सावधानीभूय श्रूयतां? सुरोक्तायाः शालभूभुजः कन्यायाः पाणिग्रहणं विना मम जीवितं नास्ति, यतः—अक्खाणसणी कम्माण । मोहणी तह य वयाण बंभवयं ॥ गुत्तीण य मणगुत्ती । चउरो दुक्खेण जिप्पंति ॥ १ ॥ दिवा पश्यति नो घूकः । काको नक्तं न पश्यति॥ अपूर्वः कोऽपि कामांधो । दिवानक्तं न पश्यति ॥ २ ॥ मंत्री प्राह हे राजंस्तस्याः पुरुषद्वेषिण्या योषितस्तव पाणिग्रहोऽनर्थमूलं भविष्यति, अतस्तव तया सह पाणिग्रहणं कर्तुं न युज्यते, राजा प्राह भो मंत्रिन्! यदि भवतो मदीयेन जीवितव्येन प्रयोजनं स्यात्तर्हि तत्रोद्यमः क्रियतां? अथ मंत्रिणा ये ये उपायाः कृताः, येन प्रकारेण च सा नृपपुत्री सुकोमलानाम्नी परिणीता, तस्याः कुक्षौ च विक्रमचरित्रनामा पुत्रो जात इत्यादिः सकलोऽपि वृत्तांतो विक्रमादित्यचरित्रादवसेयः, ग्रंथगौरवभयान्नास्माभिर्लिखितः. अथ विक्रमादित्यो राट्, तस्य सुकोमला च पट्टराज्ञी, तयोः पुत्रो विक्रमचरित्रनामा प्रतिष्ठानपुरान्मातृसहितः पितृमिलनाय सद्योऽवंतीपार्श्वे समागमत, राजा विक्रमादित्यो भार्यापुत्रागमं श्रुत्वा तत्क्षणात् सन्मुखमागत्य तयोः पूःप्रवेशं महामहेन कारयामास, ततस्तयोः सप्तभूमिकमावासं दत्वा न्यायवर्त्मना विक्रमार्कस्तेन पुत्रेण सह राज्यं पालयामास. एवं तेन

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विक्रमादित्येन बहवः कन्यकाः परिणीताः, ताभिः सार्धं च वैषयिकं सुखं भुंजानोऽसौ देवराज इव राज्यं करोति.

अथैकस्मिन् सर्वोत्कृष्टतमे दिवसे सुखप्रदे सन्मुहूर्ते सन्मानपूर्वकं सिद्धविद्यं तक्षकं समाकार्य कीरकाष्टमयं रत्नजटितं सिंहविस्तरं मनोरमं सिंहासनं नृपतिः कारयामास, तथा तस्मिन् सिंहासने कीरकाष्टमया रत्नखचिता द्वात्रिंशत्पाञ्चालिका नृपो योजयामास, सन्मुहूर्ते कृतत्वात् कीरकाष्टमयत्वाच्च द्वात्रिंशता सुरीभिस्तत्सिंहासनमधिष्ठितं, ततःप्रभृति विक्रमादित्यनृपालस्तस्मिन् सिंहासने समासीनो निरंतरं न्यायमार्गेण मेदिनीं पालयामास. अन्यदा कश्चिद्योगिराट् प्रतिहारनिवेदितो नृपोपांते समागत्यैकं बीजपूरकं ढुढौके, एवं वर्षावधिं यावन्निरंतरं स योगिराट् नृपतेरग्रे नृशिो बीजपूराणि दुढौके, एवं काले यात्येकस्मिन् दिने एको मर्कटो राज्ञो हस्तादेकं बीजपूरफलं समादाय नीत्वा च यावता बुभुजे तावत्तन्मध्यादेकं महामूल्यं रत्नं निर्गतं, तादृग्रत्नमालोक्य राजा कोशाध्यक्षांतिकात्सर्वाणि फलान्यानीतवान्, तानि फलानि भित्वा मणींश्चैकीकृत्य वीक्ष्य प्रमुदितो राजा प्राह भो योगींद्र! त्वं महार्घ्यानेतान् मणीन् किमर्थं प्राभृतीकरोषि? योगी जगौ राजेंद्र! नृणामु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पकारः कृतः सुखहेतवे जायते, ये च भवादृशाः सात्त्विका भवंति ते हि नृणां प्रार्थनाभंगं न कुर्वंति, यतः—क्षुद्राः संति सहस्रशः स्वभरणव्यापारबद्धादराः । स्वार्थो यस्य परार्थ एव स पुमानेकः सतामग्रणीः ॥ दुःपूरोदरपूरणाय पिबति श्रोतःपतिं वाडवो । जीमूतस्तु निदाघतापितजगत्संतापविच्छित्तये ॥ १ ॥ लच्छी सहावचवला । तत्तंवि चवलंपि जीवियं होई ॥ भावो उ तत्तंवि चवलो । उवयारविलंबणं कीस ॥ २ ॥

एवं योगिप्रोक्तं वचनं श्रुत्वा मेदिनीपतिः प्रोवाच भो योगिन्! यत्तव कार्यं विद्यते तत्त्वं ममाग्रतो ब्रूहि? योगी जगाद भो नृपाल! शरीरिणां साहसेन दुःशक्यापि कार्यसिद्धिः सुखकराद्भुतं भवति, यतः—विजेतव्या लंका चरणतरणीयो जलनिधि—र्विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ॥ तथाप्याजौ रामः सकलमवधीद्राक्षसबलं । क्रियासिद्धिः सत्वे वसति महतां नोपकरणे ॥ १ ॥ राजन्! मया काचित्पूर्वं मंत्रसाधना प्रारब्धा, तस्याः कोऽप्युत्तरसाधको नास्ति, हे सात्विकाग्रणि! त्वं तस्यामुत्तरसाधको भव? तद्वचो निशम्य राजा तस्य वचः प्रतिपद्य योगिसमन्वितो निर्भयो रात्रौ वनांतरे ययौ, यतः—एकोऽहमसहायोऽहं । कृशोऽहमपरिछदः ॥ स्वप्नेऽप्येवंविधा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चिंता । मृगेंद्रस्य न जायते ॥ १ ॥ एवमुत्तरसाधकत्वेन स स्थापितः, योगिनाज्ञापि भो राजेंद्रा· स्यां वटशाखायां बद्धस्य शबस्य समानयनं कुरु? इत्युक्त्वा स दुष्टधीः शबानयनाय महीपालं प्रेष· यामास, योगी स्वयं च खदिरदारुभिरग्निकुंडं ज्वलज्ज्वालं कृत्वा ध्यानं कर्तुं प्रवृत्तः, नृपस्तस्मिंस्तरौ गत्वा तं समारुह्य दवरकं छित्वा मृतकं पातयित्वा शीघ्रं वृक्षाद्भूमावुत्तीर्णवांस्तावत्तन्मृतकं पुनर्वृक्षे चटितं वीक्ष्य नृपतिः पुनर्वृक्षमारूढस्तथैव शबं पातयामास. एवं द्वित्रिवारान् कृत्वा शबं च पुनरू· र्ध्वगतं दृष्ट्वा कष्टं वीक्ष्य नृमिभुजाग्निवैतालिकः स्मृतः, सोऽपि स्मृतमात्रोपस्थितो मृतकशरीरमाश्रि· त्य मेदिनीनायकंप्रति प्राह हे राजन्! मया कथ्यमानं किंचित्कथानकं श्रूयतां? राजावग हे शब! पुरातनी कथा ममाग्रे कथ्यतां? महीपतीरग्रे शबेन पूर्वकथा कथिता. अत्र वेतालपंचविंशतिकाव· तार्या, पंचविंशतिकथानकैस्तां निशामतिवाह्य निशांते नृपंप्रति वैतालिकः प्राह यथा—राजन्नयं छली योगी । त्वां बलिं पुरुषोत्तमं ॥ विधाय स साधयिषु—रस्ति कांचनपौरुषं ॥ १ ॥ अतोऽस्य योगिनस्त्वं हि । मा विश्वासं कृथा नृप ॥ दुरात्मायं छली योगी । विद्यतेऽधर्मशेखरः ॥ २ ॥ यतः —मयोपकृतमेतस्य । वक्रस्येति न विश्वसेत् ॥ दत्तक्षीरोऽपि दुष्टाहि—र्दुर्जयो दशति ध्रुवं ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एतद्वैतालिकस्योक्तं श्रुत्वा सविस्मयं नृपेन चित्तेऽचिंति, अहो दुष्टधियः खला मर्त्यजन्म मुधा हारयंति तर्हि पश्याम्यहमयं छली योगी मे किं करिष्यति? तदानीं समयोचितमहमपि करिष्यामि, यतः—अतीतं नैव शोचंति । भविष्यन्नैव चिंतयेत् ॥ वर्तमानेन कालेन । वर्तयंति विचक्षणाः ॥ ॥ १ ॥ एवमुक्त्वा तच्छवं स्कंधे कृत्वा विक्रमार्को योगिराट्पार्श्वे मुमोच, शवं समानीतं दृष्ट्वा योगीशो मुदितः प्राह, अहो नृपते! तवाहं रक्षार्थं शिखाबंधं करोमि, यतो होमं वितन्वतस्तत्र विघ्नो न जायते, यतः—राक्षसव्यंतरप्रेत—भूतदैत्यादयः पुनः ॥ केऽपि तत्रापि नो विघ्नं । भवंति कर्तुमत्र हि ॥ १ ॥ अंगरक्षां यतो विद्या—साधका धुरि कुर्वते ॥ ततः समीहितं सर्वं । तेषां भवति निश्चितं ॥ २ ॥

एवमुक्त्वा स दुष्टमानसो योगी महीपतेः शिखाबंधं कर्तुं निखिलां सामग्रीमानयामास, महीशस्य मस्तकोपरि तत्क्षणाच्छिखाबंधं विधाय दुष्टमानसो योगिराट् स्वमानसे मुमुदे, राजा दध्यावयं पाखंडी स्फुटं दुष्टो विद्यते, मया तथा विधातव्यं यथा मम सुखं भवेत, ततो यावद्योगी नृपं वह्निकुंडे क्षिपति तावद्भूपोऽग्निवेतालं स्मृत्वा सावधानीभूय चिंतयत्यहो दुरात्मनाननेनेदानीं स्वोदरपू-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्तये किमेवंविधाः पापप्रपंचरचना मंडिताः! आहुतिसमये वह्निकुंडे तं योगिनमेव बलिं कृत्वा विक्रमार्को राट् स्वर्णमयं मर्त्यमसाधयत्, तदैव गांगेयनराधिष्ठायकः सुरः प्रत्यक्षीभूय राज्ञे तत्प्रभावं प्रकाश्य तूर्णं तिरोदधे, विक्रमादित्यो राजा तं कनकपुरुषमग्निकुंमादादाय महता महेन रवेरुदये पुर्यां प्रविवेश, तदा मंत्रिपृष्टो राजा योगिसंभवमशेषं वृत्तांतं मंत्रिलोकानां पुरतः कथयामास, मंत्रीश्वरा जगुः परप्राणिनां द्रोहः कृत आत्मन्येव पतति नात्र संशयः, यथा—आत्मनः कुशलाकांक्षी। परद्रोहं न चिंतयेत्॥ स्थविरायै कृतो द्रोहो। वध्वा एवापतद्यतः॥ १॥ अत्र वीरश्रेष्टिस्थविरामातृपुत्रभार्याकथा वाच्या. अथ विक्रमादित्यदानाधिकारः सूत्रोक्तः कथ्यते, यथा—एकस्मिन् दिने वृद्धवादिसूरिशिष्यः सिद्धसेनदिवाकरः सर्वज्ञसूनुबिरुदं वहन् महीतले विजहार, एवं नगरे नगरे ग्रामे ग्रामे जिनोदितं धर्मं प्ररूपयन् बहून् भव्यान् प्रतिबोधयन् स मह्यां विचरति, एकदावंत्यां श्रीसिद्धसेनदिवाकरमागच्छंतं गुरुं बहिः क्रीडायै गच्छन् विक्रमार्को निरीक्ष्य सर्वज्ञपुत्रपरीक्षार्थं चेतसा नमश्चक्रे, तदानीं सिद्धसेनसूरिर्दक्षिणं करमुत्क्षिप्य धर्मलाभं ददौ, तदा राजा प्राह मह्यं धर्मलाभः कथं दीयते? यूयं केन वंदिताः? सूरिराह भवता सर्वज्ञपुत्रपरीक्षार्थं वयं वंदिताः, यथा—सूरिः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रोवाच नृपाल । वंदमानाय दीयते ॥ कायेन वंदिता नैव । मनसा वंदिता वयं ॥ १ ॥ श्रुत्वैतद्ध-
र्षितो नृपो—ऽवरुह्य कुंजरात्ततः ॥ वंदित्वांतर्गुरुं स्वर्ण—कोटिं चादापयत्तदा ॥ २ ॥ निर्लोभत्वा-
त्तदाचार्यो । जगृहे न नृपार्पिता ॥ कथितत्वान्नृपः पश्चात् । स्वर्णकोटिं ललौ न हि ॥ ३ ॥ तदा
सूरेरनुज्ञया तद्धनं मंत्रिमुख्यैर्जीर्णोद्धारे व्ययितं, राजवहिकायां च लिखितं, तत्स्वरूपं दृष्ट्वा पंडि-
तैरुक्तं यथा—धर्मलाभ इति प्रोक्ते । दूरादुच्छ्रितपाणये ॥ सूरये सिद्धसेनाय । ददौ कोटिं नरा-
धिपः ॥ १ ॥ चमत्कृतिकृते भूमि—नायकस्यान्यदा प्रगे ॥ श्लोकचतुष्टयं कृत्वा । सिद्धसेनो दि-
वाकरः ॥ २ ॥ राज्ञो निकेतनद्वारे । गत्वा चेति जगौ तदा ॥ भो द्वाःस्थाहं महीशस्य । मिल-
नायागतोऽस्मि च ॥ ३ ॥ लिखित्वा पत्रके श्लोक—मेकं द्वारस्थपाणिना ॥ प्रेषयामास सूरीशो ।
नृपपार्श्वे विशारदः ॥ ४ ॥ तथाहि—दिदृक्षुर्भिक्षुरायात—स्तिष्ठति द्वारि वारितः ॥ हस्तन्यस्तच-
तुःश्लोकः । किंवागच्छतु गच्छतु ॥ ५ ॥ ज्ञात्वा श्लोकार्थमूर्वीशो । रंजितो द्वाःस्थपाणिना ॥ प्रति-
श्लोकं पुनः प्रेष—यामास गुरुसन्निधौ ॥ ६ ॥ तथाहि—

दीयतां दशलक्षाणि । शासनानि चतुर्दश ॥ हस्तन्यस्तचतुःश्लोको । यद्वागच्छतु गच्छतु ॥७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञातश्लोकार्थसूरीशो । गत्वा मध्यगृहं नृपं ॥ पूर्वाशास्थितमालोक्य । पुनः श्लोकं पपाठ च ॥ ८ ॥ अपूर्वेयं धनुर्विद्या । भवता शिक्षिता कुतः ॥ मार्गणौघः समभ्येति । गुणो याति दिगंतरं ॥ ९ ॥ पूर्वां मुक्त्वा राजा दक्षिणदिग्विभागे स्थितः, पुनरपि सूरिर्द्वितीयं श्लोकं प्राह—सर्वदा सर्वदोऽसीति । मिथ्या संस्तूयसे बुधैः ॥ नारयो लेभिरे पृष्टं । न वक्षः परयोषितः ॥ १० ॥ ततो पश्चिमां स्थिते राज्ञि सूरिस्तृतीयं श्लोकं जगौ—त्वत्कीर्तिर्जातजाड्येव । चतुरंभोधिमज्जनात् ॥ आतापाय महीनाथ । गता मार्तंडमंडलं ॥ ११ ॥ ततो नृपे उत्तरायां स्थिते चतुर्थं श्लोकं सूरिः पपाठ—आहते तव निःस्वाने । स्फुटितं रिपुहृद्घटैः ॥ गलिते तत्प्रियानेत्रे । राजंश्चित्रमिदं महत् ॥ १२ ॥ पुनः पपाठ—सरस्वती स्थिता वक्रे । लक्ष्मीः करसरोरुहे ॥ कीर्तिः किं कुपिता राजन् । येन देशांतरं गता ॥ १३ ॥ एतत् श्लोकचतुष्टयं श्रुत्वा महीपालो विक्रमार्कश्चेतसि चमत्कृतः सिंहासनाद्भूमौ समुत्तीर्य भक्त्या नत्वा गुरुं सिद्धसेनं जगाद हे महामुने ! लसद्धस्तिवाजिरत्नादिशालितमिदं राज्यं गृहाण? मां चानुग्रहं कुरु? सूरिर्जगाद हे राजन्! मया मातृपित्रादिनिःशेषा लक्ष्मीः पुरा त्यक्ता, तेन हेतुना मे मनः सदैव लोष्टुकांचनेषु समं वर्तते, यथा—रिपौ मित्रे तृणे स्त्रैणे । स्वर्ण-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऽश्मनि मणौ मृदि ॥ मोक्षे भवे च साधूनां । समं चित्तं सदा भवेत् ॥ १ ॥ भुंजीमहि सदा भोज्यं । रथ्यावासे वसीमहि ॥ शयीमहि महीपीठे । कुर्वीमहि किर्मीश्वरैः ॥ २ ॥ निर्लोभत्वं नृपो वीक्ष्य । सूरीशस्य तदा भृशं ॥ जिनधर्मरतः किंचि—द्बभूव न्यायतत्परः ॥ ३ ॥ एवं राजा विक्रमादित्यस्तस्मिन् कीरकाष्ठविनिर्मिते स्वर्णरत्नजटिते द्वात्रिंशत्पुत्तलिकासंयुक्ते सिंहासने समुपविष्टो राज्यं करोति.

अन्यदा श्रीसिद्धसेनसूरिः श्रीऋषभदेवजिनालये देवं नंतुं ययौ, तदा तत्र चैत्ये सिद्धसेनाचार्यं वंदितुं श्रावकवर्गः सद्यः समाजगाम, स श्रावकवर्गो देवं गुरुं च नत्वा गुरुणा सह गुरूक्तं चैत्यवंदनं शृणोति यथा—स मंगलं वो वृषभध्वजः क्रिया—ज्जटावलीसंवलितांसमंडलः ॥ यदीयमंगं किल सर्वमंगला—श्रितं प्रमोदाय न कस्य जायते ॥ १ ॥ भव्यांगभृत्कोकिलपुंडरीकं । दुःकर्मरुग्छेदनपुंडरीकं ॥ पद्भ्यां पवित्रीकृतपुंडरीकं । नताखिलाखंडलपुंडरीकं ॥ २ ॥ उन्मत्तमोहद्विपपुंडरीकं । बाल्ये कृतार्थीकृतपुंडरीकं ॥ शिरस्तुषाराद्रुधृतपुंडरीकं । त्वां स्तौति चंचत्पदपुंडरीकं ॥ ३ ॥ अतिस्फारनमस्कारान् । सदर्थसहितांस्तदा ॥ कथयित्वेति भावेन । सिद्धसेनो गुरुर्जगौ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ४ ॥ नेत्रानंदकरी भवोदधितरी श्रेयस्तरोर्मंजरी। हर्षोत्कर्षशुभप्रवाहलहरी व्यापल्लताधूमरी ॥ श्रीमद्धर्ममहानरेंद्रनगरी रागद्विषां जित्वरी। पूजा श्रीजिनपुंगवस्य विहिता क्षेमंकरी देहिनां ॥ १ ॥ ततो 'नमुत्थुणं' इत्यादिस्तुतिभिर्वंद्यमानं जिनेश्वरं वीक्ष्य श्रावकवर्गः सूरीशं प्राह हे भगवन्नेतैर्वर्षैरेतानि शास्त्राणि गुरुसन्निधौ कथं पठितानि? इत्थं श्रावकप्रशंसावाक्यानि श्रुत्वा मुदितमानसः सिद्धसेनो गुरुः 'आवस्सहीति' कृत्वा जिनगृहान्निर्गत्योपाश्रये समागतः, कियंति दिनानि च तत्र स्थित्वा ततः पृथिव्यां विचरन् पुनः प्रतिष्ठानपुरे समाययौ, तत्र वृद्धवादिसूरिगुरुं नत्वा च तत्र स्थितः. अथैकस्मिन् दिने सिद्धसेनाचार्यो गुरुं वृद्धवादिसूरीशं नत्वैवं बभाषे, हे भगवन्! वंदनादिकसूत्राणि प्राकृतानि न शोभंते, अतोऽहं संस्कृतान्येव कुर्वे यदि भवतां रोचते. गुरुः प्राह हे महाभाग! गौतमादिगणेश्वराश्चतुर्दशपूर्वपाथोधिपारगा वंदनादिकसूत्राणि संस्कृतानि च कर्तुं न जानंतिस्म? तैः संस्कृतानि कथं न कृतानि? त्वं किं ततोऽप्यभ्यधिको येनैवं प्रजल्पसि, पुनरेवं गुरुः प्राह हे महाभाग! तव पारांचितं पापं जातं, तेन च तव दुर्गतिपातो निश्चितं भविता, त्वया सिद्धांताशातना कृता, अनेन पापेन च तव संसारे परिभ्रमणं भविष्यति. सिद्धसेनोऽवक् स्वामि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्! मौढ्यान्मयेदृशं जल्पितं नरिद्धःखसंततिदायकं, तेनाधुना मम योग्यं प्रायश्चित्तं विश्राणय? गुरुराह तवात्यंतं पापं लग्नं, तीव्रतपश्च नवादृशां दातुं न शक्यते, अतोऽवधूतवेषेण यदि त्वं द्वादशाब्दिकां स्थित्वा प्रांते प्रौढं नृपं बोधयित्वा नवीनं तीर्थं च पालयिष्यसि, तदा ते पापाच्छुटनं नविष्यति, गुरोरेतद्वाक्यं श्रुत्वा सिद्धसेनो वेषपरावृत्तिं कृत्वा कृतावधूतवेषः स्थाने स्थाने ब्रमन् मेदिनीं प्रतिबोधयति, इत्यादि द्वादशवार्षिको विहारो ग्रंथांतरादवसेयः. अथ प्रस्तुतमेवाह—विक्रमादित्येन राज्ञा विक्रमचरित्रपुत्रस्य बहवः कन्यकाः परिणायिताः. कुमारस्ताभिः समं दोगुंदकदेव इव वैषयिकं सुखं नेजे.

एवं विक्रमादित्यस्य देवराज इव राज्यं कुर्वतो दिनानि यांतिस्म. अथ सिद्धसेनो दिवाकरो गुरूपदिष्टं प्रायश्चित्तं कुर्वन् द्वादशवर्षाण्यवधूतवेषेण भ्रांत्वा भ्रांत्वा देशनया नव्यजीवान् प्रतिबोध्य द्वादशवर्षपर्यंते विक्रमार्कं नृपं कुयोगतो मिथ्यात्वग्रसितमाकर्ण्य तत्प्रतिबोधाय मालवनिर्वृतिं ययौ. तत्रावधूतवेषेण सिद्धसेनो गुरुर्महीपतेः प्रतिबोधायोज्जयिन्यां समायातः. तत्र महाकालेश्वरप्रासादे गत्वा निजौ चरणौ लिंगाभिमुखौ कृत्वा सूरीश्वरः सुप्तः. तं तथास्थितं वीक्ष्य देवपूजकः प्राह भो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महापुरुष त्वमुत्तिष्ठ? एवं देवसन्मुखं शयनं नो क्रियते. एवं पुनः पुनः प्रोक्ते स यावन्नोत्तिष्ठति तावद्देवार्चको भूमीपतेः पार्श्वे गत्वा जगौ, स्वामिन्नेकः पुमानवधूतवेषधारक ईश्वरलिंगस्याभिमुखं पादौ दत्वा निश्चिंतं सुप्तोऽस्ति. राजा बभाषे भो देवार्चक! स यदि वचनेन न समुत्तिष्ठति तदा कंबादिभिराहत्य त्वया दूरतः कर्तव्यः. सोऽपि तत्र गत्वा भूरिशः कथयामास. तथापि यावता स नोत्तिष्ठति तावत्तेन कंबया हतः, तस्य कंबाप्रहारे दत्ते राज्ञोंतःपुरं कंबाभिस्ताड्यते, अंतःपुरपीडां ज्ञात्वा भूमिपतिर्भृशं दुःखपीडितो महाकालालयेऽभ्येत्य तमवधूतमिति जगाद, हे अवधूत! त्वं महेशं स्तुहि? एष स्तुतस्तव मोक्षं दास्यति, देवस्याशातनां मा विधेहि? एष कुपितस्तव पीडां करिष्यति, त्वमेनं महादेवं मा कोपय? तेनोक्तं हे महीपाल! एष देवो मम कृतां स्तुतिं न सहते, भूपः प्राह एष महादेवः सहिष्यति, गुरुराह हे राजन्नस्य स्तुत्या काचिद्विघ्नं भविष्यति, तदा भवता मनागपि मम दोषो न देयः, राज्ञोक्तं स्तुतिं कुरु? ततः सिद्धसेनो गुरुः पद्मासनस्थितो द्वात्रिंशद्द्वात्रिंशिकादिभिर्वीरजिनेश्वरमस्तवीत्, परं महावीरजिनेश्वराधिष्ठायको देवः कोऽपि नो प्रादुर्भूतः, तदा श्रीसिद्धसेनगुरुणा श्रीपार्श्वनाथस्य स्तुतिः समारब्धा ' कल्याणमंदिरमुदारमवद्यभेदीत्यादिः '

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्र स्तोत्रे 'क्रोधस्त्वयेति' त्रयोदशं काव्यं मंत्रगर्भितं सूरिर्यावद्व्यधात्तावत्तल्लिंगं द्विधाऽभवत्, तन्मध्यात्पार्श्वजिनः प्रकटीबभूव, तत् श्रीपार्श्वबिंबं निर्गतं वीक्ष्य सूरिराट् प्राहायं देवो मदीयां स्तुतिमद्भुतां सहते, राज्ञोक्तं भगवन् कस्त्वं? किं चेदमद्भुतं दृश्यते? स ऊचेऽवधूतोऽहं वृद्धवादिनः सूरिमुख्यशिष्यः सिद्धसेनाभिधः केनचित्कारणेन गणाद्बहिर्निर्गतः पृथ्व्यां भ्रमन् भूरिदेशेषु भव्यान् प्रतिबोधयन्नस्मिन् पुरे समागतोऽस्मि, एतत् श्रीपार्श्वनाथस्य बिंबं धरणेंद्रादिगीर्वाणसेवितं वसुधातलान्निर्गतं, त्वमेनं देवं मोक्षदायकं सेवस्व? तथा त्वं मां किं नोपलक्षयसे? येन मया त्वं पूर्वं दिदृक्षुर्भिक्षुरयात इत्यादिश्लोकैः स्तुतस्तत्किं विस्मृतं? तां स्तुतिं श्लोकचतुष्टयमयीं स्मृतिमानय? ततः स्मृतिमागतः सिद्धसेनाचार्यो गुरुः, तं गुरुं नत्वाग्रे समुपविश्य स धर्मं शृणोति, गुरुस्तस्य प्रासादस्य प्रबंधं प्राह, अत्रावंतिसुकुमालकथा ग्रंथांतराद्वाच्या. तस्य पुत्रेण महाकालनाम्नैष प्रासादः कारितः, कालक्रमाद् द्विजैरत्र पार्वतीपतेर्लिंगं स्थापितं, अतो हे राजेंद्रैनं देवं भजस्व? यतः—नीरागोऽसौ जिनो देवो । ददाति पदमव्ययं ॥ सुरासुरनराधीश—पदवीमपि सुंदरां ॥ १ ॥ सर्वज्ञो गतरागादि—दोषस्त्रैलोक्यपूजितः ॥ यथास्थितार्थवादी च । देवोऽर्हन् परमेश्वरः ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महाव्रतधरा धीरा । भैक्ष्यमात्रोपजीविनः ॥ सामायिकस्था धर्मोप—देशका गुरवो मताः ॥ ३ ॥ परिग्रहारंभमग्ना—स्तारयेयुः कथं परान् ॥ स्वयं दरिद्रो न पर—मीश्वरीकर्तुमीश्वरः ॥ ४ ॥ दुर्गति-प्रपतत्प्राणि—धारणाद्धर्म उच्यते ॥ संयमादिर्दशविधः । सर्वज्ञोक्तो विमुक्तये ॥ ५ ॥ इत्यादि सिद्धसेनगुरूदितं धर्ममाकर्ण्य विक्रमादित्यो राजा जिनधर्मरतो जातः, तेन राज्ञा सिद्धसेनाचार्य-समीपे श्रावकत्वं प्रपेदे, तस्मिन्महाकालप्रासादे नृपतिः श्रीपार्श्वजिनेशितुर्बिंबं स्थापयामास, आदरात् पूजयामास च.

तस्मिन्नेव दिने विक्रमार्को नृपतिस्तस्मिन् जिनालये देवपूजाकृते च ग्रामसहस्रं ददौ, द्वादश-व्रतसंयुक्तं सम्यक्त्वं च ललौ, पुनः सिद्धसेनो गुरुः प्राह राजन् ! जिनैः श्रियश्चारुफलं दानमेव प्रोक्तं, श्रेयःसौख्यं यतो भवेत्, यतः—पश्चाद्दत्तं परैर्दत्तं । लभ्यते वा न लभ्यते ॥ स्वहस्तेन च यद्दत्तं । लभ्यते नात्र संशयः ॥ १ ॥ मामंस्थाः क्षीयते वित्तं । दीयमानं कदाचन ॥ कूपारामग-वादीनां । ददतामेव संपदः ॥ २ ॥ पात्रे धर्मनिबंधनं तदितरे प्रोद्यद्दयाख्यापकं । मित्रे प्रीतिविव-र्धकं रिपुजने वैरापहारक्षमं ॥ भृत्ये भक्तिभरावहं नरपतौ सन्मानपूजाप्रदं । भट्टादौ च यशस्करं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वितरणं न काप्यहो निष्फलं ॥ ३ ॥ वर्षं यावज्जिनाः सर्वे । यथेष्टं दानमन्वहं ॥ ददते स्वर्णरूप्यादि । याचकेभ्यो मुखोदितं ॥ ४ ॥ अनृणां पृथिवीं सर्वां । कृत्वा सर्वे जिनेश्वराः ॥ दीक्षां लात्वा ततः क्षीण—कर्माणो यांति निर्वृतिं ॥ ५ ॥ इत्यादि सिद्धसेनोक्तधर्मकथां श्रुत्वा राजा राज्यं पालयन् जैनधर्मं चाराधयति, लोकानां च यथेप्सितं दानं ददाति, भूरिदानेन विक्रमादित्यो राजा श्रीवीरजिनेश्वरसंवत्सरपरावर्तं कृत्वा निजसंवत्सरं चक्रे.

पुनरेकस्मिन् दिने विक्रमादित्यः सिद्धसेनगुरोः पार्श्वे धर्मं श्रोतुं समागात्, सूरिस्तस्मिन् धर्मोपदेशे शत्रुंजयमाहात्म्यमब्रवीत्, यथा—यः श्रीशत्रुंजये तीर्थे । श्रीयुगादिजिनेश्वरं ॥ वंदते भक्तितस्तस्या—नंतं पुण्यं प्रजायते ॥ १ ॥ शत्रुंजये कोटिगुणं । स्वभावस्पर्शने मतं ॥ मनोवचनकायानां । शुद्ध्यानंतगुणं भवेत् ॥ २ ॥ एकैकस्मिन् पदे दत्ते । शत्रुंजयगिरिंप्रति ॥ भवकोटिसहस्रेभ्यः । पातकेभ्यः प्रमुच्यते ॥ ३ ॥ वज्रलेपायितैः पापै—र्जंतुरत्यंतदुःखभाक् ॥ तावद्यावन्न सिद्धाद्रि—मधिरुह्य जिनं नमेत् ॥ ४ ॥ मयूरसर्पसिंहाद्या । हिंस्रा अप्यत्र पर्वते ॥ सिद्धाः सिद्ध्यंति सेत्स्यंति । प्राणिनो जिनदर्शनात् ॥ ५ ॥ तेषां जन्म च वित्तं च । जीवितं सार्थकं च ये ॥ सि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्क्षेत्राचलं यांति । परेषां व्यर्थमेव तत् ॥ ६ ॥ तीर्थानामुत्तमं तीर्थं । नगानामुत्तमो नगः ॥ क्षेत्राणामुत्तमं क्षेत्रं । सिद्धाद्रिः श्रीजिनैर्मतः ॥ ७ ॥ इत्यादि. पुराणेऽप्युक्तं—अष्टषष्टिषु तीर्थेषु । यात्राया यत्फलं भवेत् ॥ आदिनाथस्य देवस्य । स्मरणेनापि तद्भवेत् ॥ ८ ॥ स्पृष्ट्वा शत्रुंजयं तीर्थं । नत्वा रैवतकाचलं ॥ स्नात्वा गजपदे कुंडे । पुनर्जन्म न विद्यते ॥ ९ ॥ पल्योपमसहस्रं तु । ध्यानाल्लक्षमभिग्रहात ॥ दुःकर्म क्षीयते मार्गे । सागरोपमसंचितं ॥ १० ॥ यस्मिन् शत्रुंजये तीर्थे । सिद्धिसौख्यप्रदे सदा ॥ पुंडरीकादयोऽनेके । सिद्धा गणभृतः पुरा ॥ ११ ॥ यतः—चित्तस्स पुन्निमाए । समणाणं पंचकोडिपरिवरिउ ॥ सिद्धिगउ पुंडरिउ । जयउ तं पुंडरीयतित्थं ॥ १२ ॥ जत्थाइच्चजसाई—सगरंता रिसहवंसजनरिंदा ॥ सिद्धिं गया असंखा । जयउ तं पुंडरीयतित्थं ॥ ॥ १३ ॥ जहिं रामाइ तिकोडी । इगनवइ नारया य मुणिलक्खा ॥ जाया उ सिद्धिराया । जयउ तं पुंडरीयतित्थं ॥ १४ ॥

एवं गुरूपदिष्टं श्रीशत्रुंजयमाहात्म्यं श्रुत्वा विक्रमादित्यः प्रोवाच हे भगवन्! भवदंतिके धर्मः श्रुतः, अधुना शत्रुंजयतीर्थं नंतु मे मनोरथो वर्तते. गुरुणोक्तं राजन् धर्मे मा प्रमादीः, श्रीगुर्वादे-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शमासाद्य विक्रमादित्यः श्रीसंघं मेलयामास. स्थाने स्थाने कुंकुमपत्रिकां प्रेष्य सर्वत्र च ज्ञापयामास. तेन संघेन सार्धं श्रीसिद्धसेनादिपंचशतसूरीशा ग्रंथांतरापेक्षया च पंचसहस्रसूरीशाः सत्क्रियाकलापकुशला जिनेश्वरं नंतु चेलुः. एकोनसप्ततिशतं हेमदेवालयाश्चेलुः, शतत्रयमिता जनमनोहरा रूप्यदेवालयाश्चेलुः, पंचशतमिता दंतमया देवालयाश्चेलुः, अष्टादशशतकाष्टमया देवालयाश्चेलुः, एका कोटिर्लक्षद्वयं नवशतानि रथानां, अष्टादशलक्षाणि वाजिनां, षट्सहस्राणि हस्तिनां च सह चेलुः. तथा—वेसरोष्ट्रवृषादीनां । मनुष्याणां च योषितां ॥ विक्रमादित्यभूपाल—संघसंख्या न विद्यते ॥ १ ॥ देवालयपताकास्थ—किंकिणीरुचिरक्कणाः ॥ रेणुराह्वयितुं सर्व—देशसंघजनानिव ॥ २ ॥ पीनस्कंधाः सदाकारा । नानाभूषणभूषिताः ॥ वहंति वृषभा देवा—लयान् कुंजरगामिनः ॥ ३ ॥ दिव्यरूपधराश्चारु—भूषणा हरिणेक्षणाः ॥ चतुःकोणस्थिता देवा—लये चामरपाणयः ॥ ४ ॥ गायंत्यो जिननाथस्य । गीतानि मधुरध्वनि ॥ लीलया चालयंतिस्म । चामराणि मनोहराः ॥ ५ ॥ एवं मार्गे चलन् ग्रामे ग्रामे स्नात्रपूजाध्वजादिभिः प्रभावनां च कुर्वन् विक्रमादित्यः शत्रुंजयोपांते ययौ. तत्रानर्गलं दानं ददन् जिनं नंतु श्रीशत्रुंजयं पर्वतमारुरोह. तत्र स्ना-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रपूजाध्वजारोपणादि सर्वं कार्यं कृत्वा स स्तुतिं चक्रे, यथा—सुरासुरमहीनाथ—मौलिमालानतक्रमं ॥ श्रीशत्रुंजयकोटीर—मणिं श्रीऋषभं स्तुवे ॥ १ ॥ विभो त्वत्पदराजीवं । ये सेवंते जनाः सदा ॥ सुरासुरनृपश्रेणि—र्भजते तान् सुभक्तितः ॥ २ ॥

इत्यादि जिनस्तुतिं कृत्वा हृष्टमानसोऽसौ यावता प्रासादं विलोकयति तावत्कुत्रापि किंचित्तं प्रासादं पतितं दृष्ट्वा नृपतिश्चिंतयति यदहं शत्रुंजयोद्धारं करोमि, तावता श्रीसिद्धसेनसूरिणोक्तं राजन्! श्रीजिननाथकैर्नव्यप्रासादकारापणादुद्धारे द्विगुणं पुण्यं प्रोक्तं, यतः—प्रासादोद्धारकरणे । भूरिपुण्यं निगद्यते ॥ उद्धारान्न परं पुण्यं । विद्यते जिनशासने ॥ १ ॥ पुरात्र पर्वते चक्रे । प्रासादं भरतो नृपः ॥ श्रीनाभेयजिनेशस्य । मणिस्वर्णमयं महत् ॥ २ ॥ अस्मिन्नेव महातीर्थे । प्रासादमृषभप्रभोः ॥ कारयामास सगर—चक्रवर्ती द्वितीयकः ॥ ३ ॥ यतः—मणिरुप्पकणयपडिमं । जह रिसहचेईयं भरहविहिश्चं ॥ सदुवास जिणाययणं । सो विमलगिरी जयउ तिबं ॥ ४ ॥ कयजिणपडिमुद्धारा । पांडवा जह वीसकोडीजुया ॥ मुत्तिनिलयंमि पत्ता । तं सित्तुंजयमहातिबं ॥ ५ ॥ असंखा उद्धारा । असंखपडिमा चेईया असंखा ॥ जहिं जाया जयउ तं । सिरिसित्तुं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जयमहातिर्थं ॥ ६ ॥ पूर्वं बहुभिरुर्वीशै-र्महेभ्यैश्च स्वभावतः ॥ प्रासादाः कारिता अस्मिं-स्तीर्थे भूरिधनव्ययात् ॥ ७ ॥ एवं गुरूपदिष्टं श्रीशत्रुंजयोद्धारमहिमानं श्रुत्वा विक्रमादित्यो राजा सारकीरकाष्टमयं महत्प्रासादोद्धारं कारयामास. ततः श्रीविक्रमादित्यः शत्रुंजयाच्चलन् क्रमेण रैवतगिरौ श्रीनेमिनाथं नत्वा तत्रापि पूजास्नात्रध्वजारोपणोद्धारादि सर्वं तीर्थकार्यं कृत्वा जिनस्तुतिं करोतिस्म. अत्र श्रीनेमिनाथस्तवनं वाच्यं. एवं द्वयोस्तीर्थयोस्तदा यात्रां कृत्वा प्रत्यावृत्तो गृहाभिमुखं समागच्छन्मार्गे यथेष्टं याचकेभ्यो दानं वितरन् स महामहेनावंतीं पुरीं समागात्. तद्दिनादारभ्य श्रीसिद्धसेनगुरोः पार्श्वे प्रत्यहं धर्मकथां शृण्वन् विक्रमादित्यो राजा धर्मकार्येण मनुजजन्म सफलीकरोतिस्म. साहसिकाग्रणी राजा विक्रमार्को न्यायमार्गेण पृथ्वीं पालयन्नत्यंतं दानधर्मतत्परो बभूव. कृपावान् स नृपालश्च दीनानाथेभ्यो दीनारसहस्रादि दापयामास.

एकस्मिन् दिने स कोशाध्यक्षं समाकार्योवाच, भो कोशाध्यक्ष! त्वयेत्थं प्रदातव्यं. तथाहि— आर्त्ते दर्शनमागते दशशती संभाषिते चायुतं । यद्वाचा च हसेद्भमाशु भवता लक्षोऽस्य विश्राण्यतां ॥ निष्काणां परितोषते मम पुनः कोटिं ममाज्ञा परा । कोशाधीश सदेति विक्रमनृपश्चक्रे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदानीं स्थितिं ॥ १ ॥ मंडितो विक्रमार्केण । दानपुण्योत्सवस्तदा ॥ निमंत्रिता जना एयु—र्भूरि-शः स्वस्वदेशतः ॥ २ ॥ राज्ञा तस्मिन् समयेऽष्टादश प्रजा राजकररहिताः कृताः. तत् श्रुत्वा तुष्टोऽब्धिदेवो भट्टं प्रत्याह भो भट्ट! इदं रत्नचतुष्कं गृहाण? अस्मन्मित्राय विक्रमार्काय च दातव्यं, एतेषां रत्नानां प्रभावश्च कथनीयः, यथा—आद्यं वित्तौघदं ज्ञेयं । द्वितीयं भोज्यदं तथा ॥ तृतीयं सैन्यदं तुर्यं । सर्वभूषणदायकं ॥ १ ॥ तान्यादाय विप्रो नृपांतिके गतः, नृपं च प्राह, राजेंद्र! एतानि चत्वार्यपि रत्नान्यब्धिदेवेन प्रेषितानि तव कीर्तिं श्रुत्वा तुष्टेन. ततस्तेषां महिमानमुक्त्वा स तानि राज्ञः करे ददौ. राजा प्राह भो विप्र! यत्तव रोचते तदेकं रत्नं त्वं गृहाण? विप्रः प्राह गृहे गत्वा स्वं कुटुंबं पृष्ट्वा याचिष्ये. राज्ञोक्तं त्वं स्वगृहे याहि? स गतो गृहे, स्वकुटुंबाग्रे च तेन सर्वं प्रोक्तं, तदा कुटुंबेनोक्तं यथा—पुत्रः सैन्यदायकं मणिं ययाचे, भार्या भोज्यदायकं, स्नुषा भूषणदायकं, विप्रश्च द्रव्यदायकं ययाचे, एवं तेषां चतुर्णां कलहो लग्नः, विप्रेणागत्य राज्ञोऽग्रे प्रोक्तं, तुष्टेन राज्ञा तानि चत्वार्यपि रत्नानि तेषां प्रदत्तानि. एवं श्रीविक्रमादित्योऽर्थिभ्यो दानं ददद्विख्यातोऽभूत्. विक्रमादित्यस्य राज्ञः शतवर्षांते पूर्णप्रायपुण्येऽन्यदा विक्रमादित्यस्य शत्रुः प्रतिष्ठा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नपुरे चतुरंगसेनासमन्वितो विद्यामंत्रबलिष्टः शालिवाहननामा राजा प्रकटीबभूव, स एकदा समागत्य विक्रमार्कस्य कतिचिद् ग्रामान् हत्वा पुनर्निजं नगरं जगाम, एतत्स्वरूपं वीक्ष्य भट्टमात्रो मंत्री जगौ, हे स्वामिन्! शालिवाहननृपतिर्भवतो ग्रामान् हत्वा याति, एतत्सुंदरं न दृश्यते, अतः कटकं कृत्वा तत्र गम्यते, तं च वशीकृत्य सेवकीक्रियते, सति सामर्थ्येऽन्यपराभवं को मर्त्यः सहते, यतः—न्यक्कारं सहते सिंहो—ऽन्येषां नैव कदाचन ॥ पराभवं सहंते तु । शृगालाः कातराशयाः ॥ १ ॥ नृपः प्राह भो मंत्रीश! त्वया सत्यं प्रोक्तं, परं भूभुज उपायानां चतुष्केण कार्यं कुर्वंति, यदि साम्ना कार्यं सिध्यति तर्हि किं क्रियते दाम्ना, दाम्ना यदि कार्यं सिध्येत तदा भेदेन, यदा भेदेन कार्यं सिध्येत तदा दंडेन किं क्रियते? पुनर्मंत्री भट्टमात्रो जगौ स्वामिंस्तर्हि तत्र दूतः प्रथमं प्रेष्यते, ततः शालिवाहनो यदा दूतवचनं न मन्यते तदा तं विजेतुमुपक्रमः क्रियते.

एवं विमृश्य महीशेन रिपुंप्रति प्रेषितो दूतः प्रतिष्ठानपुरे शालिवाहनसंसदि गत्वा विक्रमार्कनृपोदितमिति जगाद, हे शालिवाहननृपते! त्वयैतद्वरं न कृतं, यत्त्वया विक्रमार्कस्य ग्रामा भग्नाः, अथ तत्रागत्य तस्य नृपस्य सांप्रतं मिलित्वा स्वापराधं क्षम्यतां? अन्यथा सांप्रतं त्वां विजेतुं वि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्रमादित्यो राट् समेष्यति. दूतस्यैतद्वाक्यं श्रुत्वा शालिवाहनो राजा भृकुटीं कृत्वा बभाषे, भो दूत! भवतः स्वाम्यागच्छतु, अहमपि सैन्यसमेतो विक्रमार्केण सह युद्धाय समेष्यामि, त्वं याहि स्वस्थानं? दूतत्वादवध्योऽसीति मुक्तः. ततो दूतो विक्रमार्कनृपोपांते गत्वा शालिवाहनवाचिकं सर्वं समाचख्यौ, राजन्नेष तवाज्ञां न मन्यते, भवता सह युद्धाय च सज्जो जातः, अथ यत्कर्तव्यं तत्कुरुष्व? दूतोक्तं श्रुत्वा कुपितो विक्रमादित्यः सैन्यं सज्जीकृत्य सेवकेभ्यो भूयसीं लक्ष्मीं मार्गे ददानः शालिवाहनं विजेतुं प्रतिष्ठानपुरंप्रत्यचालीत्, शालिवाहनोऽपि सैन्यसमेतः सन्मुखमागात्, ततस्ते द्वे अपि सैन्ये मिलिते, ततस्तयोः परस्परं संग्रामो बभूव, यथा—अनेकमत्तमातंग—वाजिवीरविराजितं ॥ अंतरा मिलितं सैन्यं । द्वयोर्भूमिभुजोस्तदा ॥ १ ॥ रथी च रथिना सार्धं । सादी च सादिना सह पदिकाः पदिकैः सार्धं । निषादिनो निषादिभिः ॥ २ ॥ खड्गी च खड्गिना सार्धं । कुंती च कुंतिना सह ॥ वर्मिता वर्मितैः सार्धं । तूणी च तूणिना सह ॥ ३ ॥ शाक्तीकेनाथ शाक्तीकः । पत्री च पत्रिणा समं ॥ बाणिको बाणिना सार्धं । दांभिकेन च दांभिकः ॥ ४ ॥ इत्यादि तयोर्द्वयोर्बलयोर्गाढं दारुणः संग्रामो बभूव, यं दृष्टुं स्वर्गतो देवा अपि समागमन्. एवं तयोर्द्वयोः सैन्ययोर्युद्ध

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जायमाने पुण्यक्षयादायुष्यक्षयाच्च विक्रमार्कवक्षसि शालिवाहनेन राज्ञा मुक्तस्तीक्ष्णो बाणो लग्नः, यतः—क्वचिद्वीणानादः क्वचिदपि च हाहेति रुदितं । क्वचिद्विद्वद्गोष्ठिः क्वचिदपि सुरामत्तकलहः ॥ क्वचिद्रम्या रामा क्वचिदपि च जराजर्जरवपु—र्न जाने संसारः किममृतमयः किं विषमयः ॥१॥ कुमुदवनमपश्रि श्रीमदंभोजखंडं । त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ॥ उदयमहिमरश्मिर्याति शीतांशुरस्तं । हतविधिललितानां ह्री विचित्रो विपाकः ॥ २ ॥ तदानीं चमूमध्ये हाहाकारो जज्ञे, अहो विधिना किमकार्यं कृतं यदीदृशा राजान एवं पीड्यंते, तावद्भट्टमात्रादयो मंत्रिमुख्याः प्रोचुः, स्वामि-र्तध्यानं न कर्तव्यं, यतो दुर्ध्यानेन जीवाः कुगतिं लभंते, ततः श्रीविक्रमादित्यः शुभध्यानपरायणः पंचनमस्कारं ध्यायन् संस्थितस्तदैव स्वर्गसुखं प्राप, यतः—

तावच्चंद्रबलं ततो ग्रहबलं ताराबलं भूबलं । मुद्रामंडलमंत्रतंत्रमहिमा तावत्कृतं पौरुषं ॥ तावत् सिध्यति वांछितार्थमखिलं तावज्जनः सज्जनो । यावत्पुण्यमिदं नृणां विजयते पुण्यक्षये क्षीयते॥ ॥ १ ॥ यस्मिन् देशे यदा काले । यन्मुहूर्ते च यद्दिने ॥ हानिर्वृद्धिर्यशोलाभ—स्तत्तथा न तद-न्यथा ॥ २ ॥ अहो विरोधो दुःखकारणं! तस्मात्कारणाद्विरोधो न कर्तव्यः. अथ विक्रमचरित्रो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वितीयवासरे प्रभातसमये शालिवाहनेन समं रणं कर्तुं प्रवृत्तः, श्रीविक्रमचरित्रेण शालिवाहनो रणे भग्नः, ततस्तस्य सैनिकाश्च प्रतिदिशं नष्टाः, ततः शालिवाहनो राज्ञ विक्रमादित्यपुत्रेण विक्रमचरित्रेण सह मेलं कृत्वा नत्वा च स्वे नगरे प्रतिष्ठानपुरे समागात, श्रीविक्रमचरित्रो लब्धजयो निजपुर्यामवंत्यां समागतः. परं विक्रमचरित्रः पितुर्मरणजं दुःखं हृदयान्न मुमोच. अथ सिद्धसेनो गुरुस्तत्रागत्य शोकच्छिदे विक्रमार्कसुतंप्रत्येवमुपदेशं ददौ. यथा—धर्मशोकभयाहार—निद्राकामकलिक्रुधः ॥ यावन्मात्रा विधीयंते । तावन्मात्रा भवंत्यमी ॥ १ ॥ तित्थयरा गणहारी । सुरवइणो चक्किकेसवा रामा ॥ अवहरिया हयविहीणा । अवरजीवाण का वत्ता ॥ २ ॥ वज्रकायशरीराणा—मर्हतां यदनित्यता ॥ कदलीगर्भसारेषु । का कथा शेषजंतुषु ॥३॥ अहो राजन्! येन शत्रुंजयादितीर्थेषु यात्रा कृता, येनानेके प्रासादाः कारिताः, येन पृथ्व्यनृणीकृता, तस्य शोकः कथं भवेत ? तथा—भुक्त्वा स्वर्गसुखं च्युत्वा । ततो विक्रमभानुमान् ॥ स्तोकैरेव भवैर्मोक्ष—सौख्यमादर्शयिष्यति ॥ १ ॥ इत्यादि गुरोर्वाक्यं श्रुत्वा विक्रमचरित्रो विक्रमादित्यपुत्रो द्रुतं शोकं मुक्त्वा पितुर्मृत्युकृत्यं व्यधात्. ततः सुमुहूर्ते सुदिवसे सुलग्नयोगे विक्रमादित्यपुत्रस्य विक्रमचरित्रस्य मंत्रिभी रा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

-ज्यं दत्तं, यावता तं नृपं तस्मिन् सिंहासने मंत्रिणो न्यसंति, तावत्सिंहासनस्था द्वात्रिंशत्पुत्रिका दिव्यानुभावतः प्रोचुः, भो भो मंत्रिमुख्या अस्मिन् विक्रमादित्यसिंहासनेऽस्योपवेशने योग्यता नास्ति, यो विक्रमादित्यतुल्यो दानेन शीलेन च भवति सोऽस्मिन् विष्टरे समुपविशति. मंत्रिभिरुक्तं तर्ह्यस्य सिंहासनस्य का गतिः? ताः प्रोचुरधुना विष्टरं भूमौ स्थापयंतु. ततो मंत्रिभिः तत्सिंहासनं भूमौ स्थापितं, विक्रमचरित्रश्च राज्यं करोति. 'अईणदाणमुद्दरकविअण' इति गाथार्थो निरूपितः. एवं श्रीविक्रमादित्यो । दत्वा दानं मनोहरं ॥ बभूव भुवि विख्यातो । वर्णितो कविकोटिभिः ॥ १ ॥ इति श्रीविक्रमादित्यदानकथानकं समाप्तं. ॥ अथ सांवत्सरिकमहादानमाह—

॥ मूलम् ॥—तिअलोअबंधवेहिं । तब्भवचरिमेहिं जिणवरिंदेहिं ॥ कयकिच्चेहिंवि दिन्नं । संवच्छरियं महादाणं ॥ १६ ॥ व्याख्या—त्रैलोक्यबांधवैः, 'तब्भवचरिमेहिं' स एव भवश्चरमो येषां ते तद्भवचरमास्तैर्जिनवरेंद्रैस्तीर्थकृद्भिः, पुनः कीदृशैः? कृतकृत्यैरपि, मुक्तिगमनाद्यवधारणात्, कृतं निष्पन्नं कृत्यं येषां ते तथा तैः, 'दिन्नं' दत्तं सांवत्सरिकं वार्षिकं 'महादाणं' महादानं, तस्य दानस्य सर्वोत्कृष्टत्वात्, यतः—एगा हिरणकोमी । अठेवयणूणगा सयसहस्सा ॥ सूरोदयमाई-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यं । दिज्जइजा पायरासाउ ॥ १ ॥ वरह वरं वरह वरं । इह घोसिज्जइ महंतसद्देणं ॥ पुरतिअ-
चजक्कचच्चर—रज्ञारायप्पहाईसु ॥ २ ॥ जो जं वरेइ तं तस्स । दिज्जइ हेमवझमाईयं ॥ विअरं-
ति तह तिअसा । सक्काएसेण सव्वंपि ॥ ३ ॥ तिन्नेव य कोडीसया । अठासिअं च हुंति कोडीउ
॥ असियं च सयसहस्सा । एयं संवछरे दिन्नं ॥ ४ ॥ एतद्दानं सर्वैरपि जिनैर्दत्तमिति गाथार्थः ॥
॥ १६ ॥ अस्यामवसर्पिण्यां प्रथमं प्रासुकदानदातारमुपदर्शयति—

॥ मूलम् ॥—सिरिसेअंस कुमारो । निस्सेअससामिउ कह न होइ ॥ फासुयदाणपवाहो ।
पयासिउ जेण जरहंमि ॥ १७ ॥ व्याख्या—श्रीश्रेयांसकुमारः श्रीऋषभदेवस्वामिपुत्रबाहुबलिस्त-
त्पौत्रः, 'निस्सेयससामिउत्ति' निःश्रेयसस्वामिकः, अर्थान्मोक्षगतिगंता कथं न जवति? अपि
तु जवत्येव, 'फासुअत्ति' प्रासुकदानप्रवाहः, 'पयासिउत्ति' प्रकाशितो येन श्रेयांसेन 'जरह-
म्मित्ति' जरतक्षेत्रे, इति गाथार्थः. ॥ १७ ॥ व्यासार्थस्तु कथानकादवधार्यस्तच्चेदं—

कुरुजनपदे गजपुरनगरे ऋषभदेवपुत्रो बाहुबलिः, तत्पुत्रः सोमप्रजः, तत्पुत्रः श्रेयांसः, स च
पित्रा युवराजपदे स्थापितः, तेन श्रेयांसेन स्वप्ने मेरुपर्वतः श्यामवर्णो दृष्टः, ततो मया सोऽमृतक-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लशेनाभिषिक्तोऽतीव शोभितवान्. तत्रैव सुबुद्धिश्रेष्टिना स्वप्नो दृष्टः, सूर्यमंडलात स्रस्तं किरणसह-स्रं श्रेयांसेन तत्र पुनर्योजितं, तेनाधिकतरं स च संपूर्णो जातः, राज्ञापि पुनस्तत्र स्वप्नो लब्धः, यथा कश्चिदेको महान् पुरुषो महता रिपुबलेन सह युद्धं कुर्वाणः श्रेयांससहायाज्जयी जातः, एवं त्रयोऽपि प्रातरंतःसन्नं संभूय परस्परं निजं निजं स्वप्नं निवेदयंतिस्म, न पुनस्ते जानंति किं भवि-ष्यतीति. तदानीं राज्ञोक्तं श्रेयांसकुमारस्य कोऽपि महान् लाभो भविष्यतीति निर्णीय विसर्जितायां पर्षदि श्रेयांसोऽपि स्वभवने गत्वा गवाक्षे यावदुपविष्टोऽवलोकते, तावत स्वामी न किंचिल्लातीति ज-नोत्कलिकाकोलाहलमाकर्ण्योत्थितः, स्वामिनं प्रविशंतं प्रेक्ष्यमाणश्चिंतयति, मया क्वापीदृशं नेपथ्यं दृष्टपूर्वं यादृशं मे पितामहस्येति जातिमस्मार्षीत्, अहोऽहं भगवतः पूर्वभवे सारथिस्तेन समं ती-र्थंकरसमीपे प्रव्रज्यामासवान्, तत्र वज्रसेनेन तीर्थकृता कथितमासीद्यदयं वज्रनाभो भरतक्षेत्रे प्रथ-मस्तीर्थकृद्भावीति, स एष भगवान्. तदानीमेव तस्यैको मनुष्यः प्रधानेक्षुरसकुंभेन सहागत आसी-त्, तमेवेक्षुरसकुंभमादायोपस्थितः श्रेयांसो भणति भगवन्! गृहाण योग्यामिमामीक्षुरसभिक्षां? प्रसारय पाणिं? निस्तारय च मामिति, कल्पते इति कृत्वा स्वामिनापि पाणी प्रसारितौ, निःसृष्टश्च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेन सर्वोऽपि रसः, न चात्र बिंदुरप्यधः क्षरति, किंतूपरि शिखा परिवर्धते, यतः—माइज्ज घमस-हस्सं । अहवा मायंति सागरा सव्वे ॥ जस्सेआरिसलद्धी । सो पाणिपडिग्गही होइ ॥ १ ॥ अत्र करविघटना—स्वाम्याह दक्षिणं हस्तं । कथं भिक्षां न लासि भोः ॥ स प्राह दातृहस्तस्या—धो भवामि कथं यतः ॥ १ ॥ पूजाभोजनदानशांतिककलापाणिग्रहस्थापना—चोक्षप्रेक्षणहस्तकार्पण-मुखव्यापारबहुस्त्वहं ॥ इत्युक्त्वा दक्षिणे करे स्थिते वामो ब्रूते—वामोऽहं रणसंमुखांकगणना वा-मांगशय्यादिकृद् । द्यूतादिव्यसनी त्वसौ स तु जगौ चोक्षोऽस्मि न त्वं शुचिः ॥ २ ॥ ततः—रा-ज्यश्रीभवतार्जितार्थिनिवहस्त्यागैः कृतार्थीकृतः । संतुष्टोऽस्मि गृहाण दानमधुना तन्वन् दयां दानि-षु ॥ इत्यद्दं प्रतिबोध्य दक्षिणकरं श्रेयांसतोऽकारय—त्प्रत्यग्रेक्षुरसेन पूर्णमृषभः पायात्स वः श्री-जिनः ॥ ३ ॥ श्रेयांसस्य दानावसरे यज्जातं तन्निशम्यतां—

नेत्रांबुधारा वाग्दुग्ध—धारा धारा रसस्य च ॥ स्पर्धया वर्धयामासुः । श्रीधर्मकंदं तदाशये ॥४॥ ततस्तेन भगवान् सांवत्सरिकतपःपारणं कृतवान्, तत्र पंच दिव्यानि प्रादुर्भूतानि, तद्यथा—वसुधा-रावृष्टिः १, चेलोत्क्षेपः २, व्योम्नि देवदुंदुभिः ३, गंधोदककुसुमवृष्टिः ४, आकाशेऽहो दानमिति घो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षणं चेति. ५. तत्र वसुधाराप्रमाणं यथा—अद्धतेरसकोडी। उक्कोसा तत्थ होइ वसुहारा ॥ अद्धतेरसलक्खा। जहन्निया होइ वसुहारा ॥ १ ॥ ततो देवसन्निपातं दृष्ट्वा राजप्रमुखोऽखिलोऽपि लोकस्ते च तापसाः श्रेयांसभवनमुपागताः, तान् श्रेयांसः प्रतिपादयति यथा, भो जनाः! सद्गतिलिप्सयैवं भिक्षा प्रदीयते. लोकः पृच्छति कथं भवता ज्ञातं? यत्स्वामिन एवं भिक्षा प्रदीयते. सोऽवक् जातिस्मृत्या, मम तु स्वामिना सहाष्टभवसंबंधः पूर्वमासीत्, कौतुकाज्जनः पृच्छति, के तेऽष्टौ भवाः? श्रेयांस आह यदा स्वामीशाने ललितांगनामा देवस्तदानीमहं स्वयंप्रभानाम्नी तस्य देव्यभवं १. ततः पूर्वविदेहे पुष्कलावतीविजये लोहार्गले नगरे भगवान् वज्रजंघस्तदानीमहं श्रीमतीभार्याभवं २. तत उत्तरकुरौ भगवान् युगलिकोऽहं च युगलिन्यभवं ३. ततः सौधर्मे द्वावपि मित्रदेवौ जातौ ४. ततो भगवानपरविदेहे वैद्यपुत्रः, अहं च तदा जीर्णश्रेष्ठिपुत्रः केशवनामा मित्रमभवं ५. तत आवामच्युतकल्पे देवौ जातौ ६. ततः पुंडरीकिण्यां भगवान् वज्रनाभराडहं च सारथ्यभवं ७. ततः सर्वार्थसिद्धिविमाने स्वामिना सहाहं देवो जातः ८. इह पुनरहं भगवतः प्रपौत्र इति. तेषां च स्वप्नानामिदं फलं यद्भगवता भिक्षा दत्तेति.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं च श्रुत्वा सर्वोऽपि जनः साधुभ्यः प्राशुकदानं ददाति. यतः—भुवणं जसेण भयवं । रसेण भवणं धणेण पडिहत्थो ॥ अप्पा निरुवमसुक्खे । सुपत्तदाणं महग्घविअं ॥ १ ॥ रिसहेससमं पत्तं । निरवज्जं इक्खुरससमं दाणं ॥ सेअंससमो भावो । हविज्ज जइ मग्गिअं हुज्जा ॥ २ ॥ इत्यादि वचोभिरभिनंद्य सर्वोऽपि जनः स्वस्थानं गतः. श्रेयांसोऽपि यत्र स्थितो भगवान् प्रतिलाभितस्तत्स्थानस्य पादैराक्रमणं मा भवत्विति भक्त्या रत्नपीठं कारयित्वोभय ध्यं पूजयति, विशेषतः प्रातःकाले पूजयित्वैव भुंक्ते. लोको पृछति किमेतकं? श्रेयांस आह आदिकरमंडलकं. ततो लोकेनापि यत्र यत्र भगवान् स्थितस्तत्र तत्र पीठं कृतं. कालेन तस्यादित्यपीठ इति संज्ञा जाता. एवं श्रीश्रेयांसेन भरतक्षेत्रे प्राशुकदानप्रवाहः प्रकाशित इति. इत्थं श्रेयांसतो दानं । प्रवृत्तं प्राशुकं पुरा ॥ अस्मिन् भरतभूभागे । देयं भो भविका मुदा ॥ १ ॥ इति श्रीश्रेयांसकथानकं समाप्तं ॥ जिनवरेभ्यः प्राशुकदानफलमाह—

॥ मूलम् ॥—कह सा न पसंसिज्जइ । चंदनबाला जिणिंददाणेणं ॥ छम्मासिअतवतविओ । निव्वविओ जीइ वीरजिणो ॥ १० ॥ व्याख्या—सा चंदनबालानाम्नी दधिवाहनपुत्री जिनेंद्रदाने-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न कथं न प्रशस्यते? अपितु प्रशस्यते एव, सा का? यथा श्रीवीरजिनो ' निव्वविउत्ति ' निर्वापितः शीतलीकृतः कुल्माषदानेन. कथंभूतो वीरजिनः? ' छम्मासिअत्ति ' पंचदिनोनषाण्मासिकतपसा तप्त इति गाथार्थः. व्यासार्थस्तु कथानकादवसेयः, तच्चेदं—

स्वामी श्रीवीरो दीक्षादिनादारभ्य द्वादशे वर्षे मह्यां विहरन् कौशांबीं नगरीं समाययौ. तस्यां नगर्यां परानीकभयंकरः शतानीको नाम राजास्ति, तद्राज्ञी चेटकोर्वीशदुहिता मृगावतीनाम्न्यस्ति. सा परमश्राविका जिनाज्ञापालनतत्परा च वर्तते. तस्य राज्ञः सुगुप्तनामा सचिवः, तस्य प्रिया सुनंदा, सा मृगावतीराज्याः सखी श्राविका च वर्तते. तस्यां नगर्यां धनावहनामा श्रेष्ठी, मूलेतिनाम्नी च तस्य प्रियास्ति. तत्र स्वामी पौषमासबहुलपक्षप्रतिपद्दिने दुराचारं दुर्ग्रहं चाभिग्रहं जग्राह. यथा— काचिद्राजकन्यकाष्टमपारणे १ अयोनिगडबद्धांघ्रियुगला २ मुंडितमस्तका ३ रुदंती ४ प्रेष्यतां गता ५ देहल्यंतःस्थितैकपादा ६ बहिःक्षिप्तद्वितीयपादा ७ निवृत्तेषु सर्वभिक्षाचरेषु ८ सूर्पकोणके स्थितान् ९ कुल्माषान् १० यदि प्रदास्यति तदाहं पारणं करिष्ये, नान्यथेत्यभिग्रहं कृत्वा प्रतिदिनमुच्चावचेषु गेहेषु भिक्षार्थं परिभ्रमति, अभिग्रहवशाच्च लोकैर्दीयमानां भिक्षां न गृह्णाति, पौराश्च ता-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्यंति. अनात्तभिक्षः स्वाम्येवं द्वाविंशतिपरीषहान् सहमानश्चतुरो मासांश्चतुःप्रहरानिव निर्गमयामास. स्वाम्येकदा भिक्षार्थं भ्रमन् सुगुप्तामात्यवेश्मनि विवेश. श्रेष्ठीपत्नी नंदानाम्नी प्रवरानंदपूरिता प्रवरासनात् समुत्थाय स्वाम्यग्रे कल्पनीयभोज्यानि पुरो मुक्त्वा न्यमंत्रयत्, स्वामिन् शुद्धां भिक्षामिमां गृहाण? स्वाम्यभिग्रहवशात्तान्यनादाय तद्गृहान्निर्ययौ, धिगरे मंदभाग्यास्मि, न पूर्णो मे मनोरथः, इति खेदमापन्नां मंदमानसां नंदां दृष्ट्वा तस्या दास्य ऊचुः, हे स्वामिनि! देवार्यो भगवानेवं दिने दिनेऽनात्तभिक्षः प्रत्यहं निर्याति, न त्वद्यैव निर्गतः. एवमाकर्ण्य सा नंदैवमचिंतयत्, स्वामिना निश्चयेन कश्चिदभिग्रहो गृहीतः. स्वामिनोऽभिग्रहः कथं ज्ञेय इति चिंतया सा नंदा निरानंदा सुगुप्तमंत्रिणा ददृशे. पृष्टं मंत्रिणा, भो सुंदरि! त्वं किं निरानंदाद्य दृश्यसे? किं ते दुःखस्य कारणं? तयोक्तं वीरो भगवान् भिक्षार्थी अनात्तभिक्षः प्रत्यहमायाति याति च, तन्नूनं तेन कश्चिदभिग्रहः कृतो विद्यते, स कथं ज्ञास्यत इति मम मनसि चिंता वर्तते. सुगुप्तो जगाद हे प्रिये! प्रातस्तथा यतिष्ये यथा जगद्भर्तुरभिग्रहो ज्ञास्यते. एवं तयोर्वार्ता कुर्वतोर्मृगावत्याः पट्टराज्या वेत्रिणी विजयाह्वया तत्रागता. तयोस्तमालापं श्रुत्वा देव्यग्रे गत्वा तत्पूर्वोक्तं सर्वं शशंस. तत श्रु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वा मृगावत्यपि तथैव खेदं विदधे. शतानीकोऽपि मृगावत्याः खेदकारणमपृच्छत्. किंचिदुन्नमितभ्रूका मृगावती व्याजहार, हे राजन्! भूभुजश्चरैः सर्वं चराचरं जगज्जानंति, त्वं तु सुखसागरनिमग्नः स्वपत्तनस्यापि स्वरूपं न वेत्सि. त्रैलोक्यपूज्यो भगवान् श्रीमन्महावीरः प्रत्यहं भिक्षार्थं भ्रमति, परं शुद्धमप्यन्नं न गृह्णाति, तन्नूनं तस्य कश्चिदभिग्रहो वर्तते, राजंस्त्वं तु सुखलालसः किमपि न जानासि. अथ तथा कुरु यथा स्वाम्यभिग्रहः पूर्णीभवति. राजा चिंतयति धिग्मां, धिग्ममामात्यादीन्, यत्परमेश्वरः श्रीमन्महावीरः कृताभिग्रहः प्रमादतो न ज्ञातः. भूयोऽपि राजा प्रत्यभाषिष्ट, हे शुभाशये! एषोऽहं प्रमादी त्वया शिक्षितोऽस्मि, हे धर्मविचक्षणे! प्रातः प्रभोरभिग्रहं विज्ञाय पारणं कारयिष्यामि, इत्युक्त्वा राजा सचिवमाह्वयत, समागतो मंत्री, ततो नृपतिरमात्यमूचे, भो मंत्रिन्! मत्पुरे त्रिजगद्गुरुः श्रीवीरोऽनात्तभिक्षश्चतुरो मासांस्तस्थौ, परं न ज्ञातोऽस्याभिग्रहोऽस्माभिः, अथ यथा ज्ञायते तथा कुरु? अमात्येनोक्तं भर्तुरभिग्रहो न ज्ञायते, ततो राजा तथ्यवादिनमुपाध्यायं नैमित्तिकमित्रमाह्वयत, उक्तं च हे महामते! सर्वधर्माणामाचाराः शास्त्रे वर्तते, त्वं तु शास्त्रज्ञोऽसि, अतो भर्तुरभिग्रहं शास्त्रेणावलोक्य सत्यं समाख्याहि? तदानीमुपाध्यायोऽप्यभाषिष्ट, रा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जन ! महर्षीणां द्रव्यक्षेत्रकालभावभेदतो बहवोऽभिग्रहाः संति, अतः स्वामिनापि कश्चिदभिग्रहो गृहीतः संभाव्यते, परं विशिष्टज्ञानिनं विना तन्न ज्ञायते, यावत्कश्चिद्विशिष्टज्ञानी नायाति तावदस्मिन्नगरेऽभिग्रहपूरणार्थं बहव उपायाः क्रियंतां? ततोऽभिग्रहपूरणार्थं नृपाज्ञया लोको बहूनुपायान् करोति, यथा—काचि ायका हास्यं कुर्वाणा करे मोदकं कृत्वा स्वामिनं प्रतिलाभयति, तथापि स्वामी तदन्नं नादत्ते, एवं काचिद्रोदनं कुर्वाणा, काचिन्नृत्यं कुर्वाणा, काचित्पुत्रसंयुक्ता, काचिद्भर्तृसंयुक्ता, काचिदुद्घाटितमस्तका, एवमनेकप्रकारैर्दानं ददाति, तथापि स्वामी किंचिदपि नादत्ते, अत्युत्कटभीषणाभिग्रहवशात, तथाप्यम्लानांगो भगवान् विशुद्धध्यानभाग्मह्यां विचरतिस्म.

इतश्च तन्नगरनायकः शतानीको राजा सह सैन्यैर्निशि चंपां पुरीं झंपापातेनेव समागत्यारुणात, ततश्चंपापतिर्दधिवाहनो बलीयसा रुद्धं स्वं ज्ञात्वा सकुटुंबः पलायिष्टः, यतो बलीयसा रुद्धानां पलायनादन्यत्र त्राणं नास्ति, ततस्तन्नगरं शतानीकसैन्येन लुंटितं, तस्मिन् नमये दधिवाहनराजपट्टराज्ञी धारिणी वसुमत्या पुत्र्या सममेकेनौष्ट्रिकेन नश्यंती गृहीता, कृतकृत्यः शतानीकोऽप्यनीकैः परिवृतः पुनः कौशांबीं समाजगाम, सोऽप्यौष्ट्रिको धारिण्या देव्या रूपेण मोहितो मार्गे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धारिण्या पृष्टो भो महात्मंस्त्वं नगरे गत्वा मां किं करिष्यसि? सोऽप्येवं जगाद गृहे गतोऽहं त्वां स्वभार्यां करिष्ये, तथा चैनां तव पुत्रीं कन्यकां विक्रीय तेन धनेनाहं त्वया सह भोगान् भोक्ष्ये, तत् श्रुत्वा धारिणीदेवी मनस्येवमचिंतयत्, अहोऽहं निर्मले कुले जाता, राज्ञा दधिवाहनेन परिणीता, दधिवाहनपत्नी भूत्वोष्ट्रपालकस्य पत्नी भविष्यामि, रे प्राणाः श्रुत्वैतान्यप्यक्षराणि यूयमद्याप्यवतिष्ठध्वे? निस्सरतास्मात्, यदि न निस्सरथ तर्हि बलात्कारेणाप्यहं निःसारयिष्यामि नीडाद्विहंगमानिव. एवं निर्भर्त्स्यमानाः प्राणास्तत्क्षणादेव निर्गताः, प्रस्फुटितहृदया धारिणी निधनं गता. औष्ट्रिकस्तां मृतां प्रेक्ष्य दध्यौ, अहो मया किमुक्तं दुर्वचनं! येन दुर्वचनेनैषा मृता. यथांगुलीदर्शनेन कुष्मांडं विनश्यति तथैषा मम दुर्वचनेन विनष्टा. एवं पश्चात्तापपर औष्ट्रिकस्तां वसुमतीं तत्पुत्रीं कोमलवाक्यैः संतोष्य यावता स्वगृहे समागतस्तावता पत्न्या निर्भर्त्सितो रे त्वयान्यत् किमपि न लब्धं? एषैव मम सपत्नी समानीता! याहि चतुष्पथे, एनां विक्रीय धनं लात्वा शीघ्रं समागच्छ? तत्पत्नीवचो निशम्य तां बालां विक्रीतुं स चतुष्पथे गतः, यावता च तां चतुष्पथे धृत्वा स्थितस्तावता दैवात्तत्र धनावहः श्रेष्ठी समागतः, तां बालां च दृष्ट्वा स मनस्येवमचिंतयत्, नूनमेषा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बालिका मूर्त्या ज्ञायते यदियं सामान्यपुत्री न भवति, अतोऽहं बहुधनं दत्वैनां गृह्णामि. असौ वराकी मूल्यगृहीतान्यस्य कस्यचिद्दीनस्य हस्ते यास्यति, अतोऽहमेनां स्वगृहे गत्वा पुत्रीवत्पालयिष्ये, मम गृहे तिष्ठंत्याश्च कदाचिद्दैवयोगतोऽस्याः स्वजनवर्गसंगमोऽपि भवति. धनावह एवं विमृश्य तदीप्सितं मूल्यं दत्वा वसुमतीं बालां सानुकंपः स्ववेश्मनि निन्ये. स्वच्छधीः श्रेष्ठी तामपृछत्, हे वत्से! त्वं कस्य कन्यकासि? ते स्वजनवर्गः कः? त्वं मा भैषीः, त्वं मम दुहितासि, अहं त्वां पुत्रीवत्पालयिष्ये.

एवं वारंवारं श्रेष्ठिना पृच्छ्यमानापि लज्जयाधोमुखी यावत्सा किंचिन्न जल्पति, तावता मूलां बभाषे, प्रियाऽसावावयोर्दुहितातियत्नेन पुष्पवत्पाल्या लाल्या च. एवं तयोर्गिरा स्वस्थचित्ता सा बाला स्वगेहे इव बालेंदुलेखेव नेत्रानंददायिनी तद्गृहे सुखं ववृधे. तस्या वाचश्चंदनवच्छीतलत्वेन हृष्टः श्रेष्ठी परिजनैः सह चंदनबालेति तस्या अभिधानं विदधे. सा चंदनबाला विनयतो रूपतश्च श्रेष्ठिनोऽतीवमुदं ददाना मूलया ददृशे. ततः समत्सरा मूला चिंतयति, पुत्रीं कृत्वेयं पालिता, अथ तामेव रूपवतीं वीक्ष्य मोहितः श्रेष्ठी यद्येनां परिणयेत्तर्हि जीवंत्यपि मृतास्म्यहं. एवं स्त्रैणसुलभतु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्रत्वेन च दिवानिशं ताम्यंती दुराशया मूला चंदनबालायाश्छिद्राणि विलोकयामास. एकस्मिन् दिने ग्रीष्मर्त्तौ धनश्रेष्ठी हट्टाद्देश्मन्यागमत्, तदांह्रिक्षालकः कोऽपि भृत्यो नासीत्, तावता विनया- चंदनोत्थाय श्रेष्ठिना वारितापि पितृभक्त्या तत्पादौ क्षालयितुं प्रावर्तत. तदानीं तस्यास्तन्वंग्याः स्निग्धः श्यामलः कोमलः केशपाशः परिस्नस्तः. जलपंकिले क्ष्मातले पंकिलो मा भूयादिति धिया श्रेष्ठिना सादरं तत्केशपाशः स्वकरेण समुद्दध्रे. तत्केशपाशोद्धरणस्वरूपं गवाक्षस्था मूला निरीक्ष्यैवमचिंतयत्. अहो यस्याः केशपाशोपरि महानेतावान् स्नेहो वर्तते. तस्याः शरीरोपरि न ज्ञायते कीयान् स्नेहोऽस्य भविष्यतीति. तदियं मूलाद्व्याधिरिवोच्छेदनीया. अथ सा शाकिनीव दुराशया मूला श्रेष्ठिगमनानंतरं नापितं समाहूय चंदनायाः शिरोऽमुंडापयत, पादयोर्निगडान् क्षिप्त्वार्द्रकंबया निर्दया सा तां बहुताडयत्. दूरस्थे गृहैकदेशेऽपवरके तां क्षिप्त्वा कपाटानि दत्वा परिवारमुवाच, श्रेष्ठिनः पृष्टतोऽप्येतत्केनापि न कथनीयं, यः कोऽपि कथयिष्यति स मत्कोपाग्नौ शलभत्वं यास्यति. एवं सर्वेषां कथयित्वा मूला मूलगृहं ययौ. सायं श्रेष्ठी समागतो मूलामपृच्छच्चंदना कास्तीति? मूलयोक्तं न जाने सा क्वास्तीति. तद्भयादन्योऽपि कोऽपि तच्छुद्धिं नाचख्यौ, एवं रात्रावपि कोऽपि ना-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चख्यौ. श्रेष्टिना चिंतिमुपरितनभूम्यां सुप्ता भविष्यति. एवं द्वितीयेऽपि दिने श्रेष्टिना पृष्टं, श्रेष्टिन्या च तथैवोक्तं.

एवं तृतीयेऽपि दिने श्रेष्टिना तच्छुद्धिर्न प्राप्ता. ततः श्रेष्टी शंकाकोपाकुलः परिजनं प्रोचे रे रे कथयत? मम नंदना चंदना क्वास्ति? यदि नाख्यास्यथ यूयमहं च जानिष्ये तदाहं सर्वान्निग्रहिष्ये, तद् श्रुत्वा काचित्स्थविरा चेटयेवमचिंतयदहं चिरतरं जीवाता, अथासन्नमृतिश्च, चंदनोदंते च कथिते मूला मे किं करिष्यति? यत्करिष्यति तदहं सर्वं सहिष्ये, परं चंदनां जीवापयामि, एवं विचिंत्य सा मूलाचरित्रं मूलतः समाख्यत्. ततः श्रेष्टी तस्मिन्नपवरके गत्वा द्वारमुद्घाटयामास, मध्ये गत्वा च चंदनां धनावहः समालोकयत्. कथंभूतां? क्षुत्पिपासार्तां, दवस्पृष्टलतामिव म्लानांगीं, अंध्रयोर्निगडितां, नवात्तां करिणीमिव बद्धां, परिमुंडितमस्तकां, भिक्षुकीमिव स्फटितवस्त्रांकितां, अश्रुपूरितनेत्राब्जां च, एवंविधां चंदनां दृष्ट्वा मनसि खिन्नो धनावहः, अहो पापिन्या मत्प्रियया किं कृतं! हे वत्से! त्वं स्वस्था भवेत्युक्त्वा साश्रुदृक् श्रेष्टी तद्भोज्यार्थं रसवतीं द्रुतं द्रुतं समभिलोकयति, परं तादृग्भोज्यमलभमानो दैवात्कुल्माषभाजनं ददर्श, स्थाल्यभावात्सूर्पकोणके कुल्मा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षान् क्षिप्त्वा भोज्यार्थं चंदनायै समर्पयत्, कथितं च तेन हे पुत्रि! एतान् कुल्माषांस्तावत्त्वं भुंजीथा यावदहं तव निगडछिदे लोहकारमानयामीति प्रोच्य श्रेष्ठी लोहकाराकारणार्थं बहिर्गतः, ऊर्ध्वस्थिता चंदना दध्यौ, अहो तस्मिन् राजकुले क्व मे जन्म? क्वावस्थेयमीदृशी? अहो धिग् संसारनाटकमिदं, जीवानां स्थिरं सौख्यं नास्ति, मयानुभूतं सुखं, पुनर्दुःखं च. अथ किं भविष्यति? किं करोमि? क्व यामि? कस्याग्रे पूत्करोमि? षष्टस्य पारणकेऽमी कुल्माषाः संति. अस्मिन् समये यदि कश्चिदतिथिः समायाति तदाहं तस्य किंचिद्दत्वा पारणकं करोमि तदा वरं. एवं विचिंत्य द्वारदेशे सा गता महता कष्टेन. एकः पाद उत्पाट्य देहल्या बहिर्मुक्तः, द्वितीयं पादं चोत्पाटयितुमशक्यत्वाद्देहल्या मध्ये स्थितः.

एवमवस्थया स्थिता चंदना वारंवारमिमां भावनां भावयंती यावत्तिष्ठति, तावत्तस्याः पुण्यानुभावतो भगवान् श्रीमहावीरो भिक्षायै पर्यटंस्तत्रागात, जंगमकल्पद्रुरिव चंदनागृहद्वारे समुपस्थितः. निगडैर्देहलीमुल्लंघयितुमक्षमा चंदना परया भक्त्या भगवंतमभाषत, स्वामिन् यद्यप्यनुचितं भोज्यं वर्तते, तथापि परोपकारार्थमिमं कुल्माषान्नं गृहाण? ममोपरि चानुग्रहं कुरु? इत्यादिभेदसंयुक्तं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तमाहारं ज्ञानेन ज्ञात्वा पूर्णाभिग्रहो भगवान् तस्यै कुल्माषभिक्षायै करौ प्रसारयामास. अहोऽहं धन्येति ध्यायंती चंदना सूर्पकोणेन स्वामिनः करे कुल्माषांश्चिक्षेप. स्वाम्यभिग्रहपूर्त्या प्रीताः संतः सुरास्तत्रायपुः. तत्र वसुधारादीनि पंचदिव्यानि प्रादुर्बभूवुः. तस्मिन् समये तस्या निगडानि तुत्रुटुः, तत्पदे कांचनानि नूपुराणि जज्ञिरे, केशपाशश्च पूर्ववद्बभूव. श्रीवीरभक्तैर्विबुधैश्चंदना सर्वालंकारधारिणी चक्रे, तथोत्कृष्टनादपूर्वकं देवैर्नृत्यं चक्रे. अहो दानमहो दानमित्याघोषणं चक्रे. सार्धद्वादशकोटीसुवर्णवृष्टिः सुरैश्चक्रे, देवैर्दुंदुभिनादो विदधे. तं दुंदुभिध्वनिं श्रुत्वा मृगावत्या सह शतानीकस्तत्रागात्, नंदया सह सुगुप्तो मंत्री चापि तत्रागात. मुदितमानसः शक्रो देवराजः समाययौ, धन्यो धनावहः श्रेष्ठ्यपि तत्रागतः, धनलिप्सया सा दुराशया मूलापि समागता, दधिवाहनराजस्य कंचुकी सपुलो नाम बंधान्मुक्तः, सोऽपि समागतो वसुमतीं वीक्ष्य तस्याः पादयोः पतित्वा विमुक्तकंठमरुदत. शतानीकेनोक्तं भो संपुल! त्वमेनां कुमारीं वीक्ष्य किं रोदिषि? तदानीं साश्रुनेत्रः कंचुकी प्रोवाच, राजन्नेषा बालिका दधिवाहनधारिण्योः पुत्री वसुमतीनाम्नी तादृशकुलोत्पन्ना तादृग्विभवपरिभ्रष्टा पितृभ्यां रहितान्यगृहे दासत्वं प्राप्ता, तेन चाहं रोदिमि. राजोचे न शोच्येयं, यया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जगत्त्रयत्राणवीरः श्रीवीरो भगवान् प्रतिलाभितः. तत् श्रुत्वा राज्ञी मृगावती प्राह तर्हि राजन्नेषा मम भागिनेयीयं बाला धारिणीदुहिता, तर्हि ममापि दुहिता. अथ भगवान् वीरः पंचाहन्यूनषण्मासतपःपर्यंते पारणं कृत्वा धनावहगृहान्निर्ययौ, वसुधाराद्रव्यमादातुं समागतं शतानीकंप्रति सौधर्माधिपतिः स्वयं व्याजहार भो राजन्नेह स्वस्वामिभावो यत्त्वं स्वर्णरत्नवृष्टिं जिघृक्षसि, यस्मै कन्या वसुमती धनं ददाति स एव धनं लभते, एषा धनस्वामिनी, कन्या प्रोवाच धनावहः श्रेष्ठी मम पिता पालनात्, अतो धनावह एतां वसुधारां कन्याग्रहाज्जग्राह. अनर्थमूलं मूला च श्रेष्ठिना गृहाद्विवासितापध्यानवती क्रमेण मृत्वा नरकं गता, भूयोऽप्याखंडलोऽवोचच्छतानीकंप्रति यदियं बाला चरमदेहधरेयं भोगपराङ्मुखा श्रीवीरस्य केवले समुत्पन्ने एषा प्रथमसाध्वी भविष्यति, भो शतानीक! त्वया स्वामिकेवलोत्पत्तिं यावद्यत्नेनासौ रक्षणीया, इत्युक्त्वा स्वामिनं नत्वा मघवा देवलोकं गतः, तथा शतानीकेन राज्ञा चंदना कन्यकांतःपुरे निन्ये. ततः सा चंदना मातृस्वसुरगृहे सुखं दिनानि निर्गमयामास. स्वामिनः केवले समुत्पन्ने चंदना दीक्षां लात्वा प्रथमप्रवर्तिनी जाता, षट्त्रिंशत्सहस्रसाध्वीनां स्वामित्वं च लब्धा, मृगावतीव्यतिकरे केवलं च लब्ध्वा क्रमेण सा मोक्षमग-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मत्. इत्थं चंदनबाला—चरितं परिकीर्तितं मया भक्त्या ॥ श्रुत्वा भो भविकजना । दाने यत्नो महान् कार्यः ॥ १ ॥ इति श्रीचंदनबालाकथानकं संक्षेपतः समाख्यातं. ॥ जिनवरप्रथमपारणकदानफलमाह—

॥ मूलम् ॥—पढमाइं पारणाइं । अकरिंसु करिंति तह करिस्संति ॥ अरहंतः भगवंतो । जेसि घरे तेसि धुवसिद्धी ॥ १७ ॥ व्याख्या—तेषां पुरुषाणां ध्रुवं निश्चितं शुद्धिर्भवति, मोक्षसुखानि करतलस्थानि भवंति तेषां, केषां? येषां गृहे 'अरिहंता भगवंतोत्ति' अर्हंति त्रिभुवनकृतां पूजामित्यर्हंतस्तीर्थंकराः, भगवंतो ज्ञानादिमंतः, प्रथमानि पारणकानि 'अकरिंसुत्ति' पूर्वमकार्षुः, 'करिंतित्ति' वर्तमानकाले कुर्वंति, 'करिस्संतित्ति' भविष्यत्काले करिष्यंतीति गाथार्थः. ॥१७॥

अथ सप्तक्षेत्रीधनवपनफलमाह—

॥ मूलम् ॥—जिणभवण १ बिंब २ पुत्थय ३ । संघरूवेसु ७ सत्तखित्तेसु ॥ ववियं धणंपि जायइ । सिवफलयमहो अणंतगुणं ॥ २० ॥ व्याख्या—जिनानां भवनानि जिनभवनानि, तेषु जिनप्रासादेष्वित्यर्थः १, एवं बिंबेषु प्रतिमारूपेषु जिनेषु २, पुस्तकेषु जिनवचनलिपिन्यासरूपेषु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३, संघेषु साधु ४ साध्वी ५ श्राद्ध ६ श्राद्धी ७ रूपेषु चतुर्विधसंघेषु, एवं सप्तक्षेत्रेषु ' वपयंति ' उ-प्तं धनं स्वर्णरजताद्यपि ' सिवफलयमिति ' मोक्षफलं जायते, अहो इत्याश्चर्ये, अनंतगुणं भवतीत्यक्षरार्थः. ॥ २० ॥ इति श्रीमत्तपागच्छाधिराजभट्टारकश्रीआनंदविमलसूरितत्पट्टालंकारहारभट्टारकश्रीविजयदानसूरितत्पट्टप्रभावकपातिशाहिप्रतिबोधकभट्टारकजगद्गुरुबिरुदधारकश्रीहीरविजयसूरितत्पट्टालंकारसंप्रतिविजयमानभट्टारकश्रीविजयसेनसूरिराज्ये आचार्यश्रीविजयदेवसूरियौवराज्ये पंडितदेवविजयगणिविरचितायां श्रीकुलकवृत्तौ धर्मरत्नमंजूषानाम्न्यां दानधर्मरूपः प्रथमो वक्षस्कारः समाप्तः. ॥ श्रीरस्तु ॥

॥ इति श्रीधर्मरत्नमंजूषायाः प्रथमो भागः समाप्तो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

लब्ध्वा यदीयचरणांबुजतारसारं । स्वादच्छटाधरितदिव्यसुधासमूहं ॥
संसारकाननतटे ह्यटतालिनेव । पीतो मया प्रवरबोधरसप्रवाहः ॥ १ ॥
वंदे मम गुरुं तं च । चारित्रविजयाह्वयं ॥ परोपकारिणां धुर्यं । चित्रं चारित्रमाश्रितं ॥ २ ॥ युग्मं.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चारित्रपूर्वा विजयाभिधाना । मुनीश्वराः सूरिवरस्य शिष्याः ।
आनंदपूर्वविजयाभिधस्य । जातास्तपागच्छमुनेतुरेते ॥ ३ ॥

आ ग्रंथ श्रीजामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे
पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीधर्मरत्नमंजूषायां प्रथमो भागः समाप्तः ॥

For Private And Personal Use Only